केशवमिश्रप्रणीतः

गौतमीयसूत्रप्रकाशः

सम्पादकः

डॉ॰ किशोरनाथ झा

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्, प्रयागः

केशवमिश्रप्रणीतः

गौतमीयसूत्रप्रकाशः

सम्पादकः

डा० किशोरनाथ झा

गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठम्
मोतीलाल नेहरू पार्क
इलाहाबाद-२
१९७८ ई०

प्रकाशकः

डा० गया चरण त्रिपाठी
प्राचार्यः
गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
इलाहाबाद

मूल्यम्......

978-93-83135-06-6

मुद्रक :
नागरी प्रेस, अलोपीबाग, इलाहाबाद

FOREWORD

We feel great pleasure in placing before the scholarly world the treatise Gautamiyasutraprakasha by Keshava Mishra which has been ably edited by Dr. Kishore Nath Jha, Lecturer in this Vidyapeetha. The work is a short, lucid and coherent commentary on the Nyayasutras of Gautama written by a scholar who hailed from Mithila, the traditional homeland of Nyayashastra. Keshava Mishra flourished in the 16th century and was a reputed teacher of Nyaya in the holy city of Kashi with "thousands" of students when he composed this work.

Dr. Kishore Nath Jha has prepared the text on the basis of four manuscripts one of which is preserved in our Vidyapeetha whereas the other three—have been procured by him from Darbhanga, Varanasi and Calcutta respectively. All the manuscripts, however, seem to go back to one incomplete source since all of them contain the same big lacuna of omitting the second Ahnika of the second Adhyaya. The text of the Sutras not found in any of the manuscripts is given at the end as an appendix.

Dr. Jha who himself belongs to Mithila with the tradition of Nyayasashtra still living in his family has acquired commendable proficiency in this branch of philosophy and is well equipped to undertake the editing of such a work. The scholarly introduction to the text supplied by him at the beginning adds much to the value of the work.

I feel confident that the scholars shall welcome the publication of this work and appreciate the labour of Dr. Jha in making it available to them in this nice form.

Allahabad
27th May, 1978

Dr. G. C. TRIPATHI
Principal
G. N. Jha Kendriya Sanskrit Vidyapeetha,
ALLAHABAD.


२५-९-१८७१ ई
९-११-१९४१ ई

विषयसूची

अवतरणम्

१—उपक्रमः ।

न्यायदर्शनस्य व्याख्याधारा सरणिद्वयमवलम्ब्य प्रवहमाना दृश्यते । गौतमीय-सूत्राणामभिप्रायावबोधाय भाष्यं, वार्त्तिकं, तात्पर्यटीका, परिशुद्धिश्च सरणिमेका-मवलम्ब्य प्रवर्तमाना न्यायचतुर्ग्रन्थिका रूपेण प्रथिताः सन्ति ।

"यदप्यतिपटीयसी जयति सा चतुर्ग्रन्थिका"

इति न्यायतत्त्वालोके नवीनवाचस्पतिमिश्रभणितिः । पुनरस्याश्चतुर्ग्रन्थिकायाः व्याख्याग्रन्थाः वर्द्धमानोपाध्यायस्य न्यायनिबन्धप्रकाशः श्रीकण्ठाचार्यस्य पञ्चप्रस्थान-न्यायटिप्पणकम् अभयतिलकाचार्यस्य न्यायालङ्कारश्च दृश्यन्ते । भाष्यवार्तिकतात्पर्य-टीकाशयपरिष्कारविधौ पटीयानयं विवरणपञ्जिकाकृद् वृद्धोऽनिरुद्धाचार्य आचार्यो-दयनस्य समये लब्धप्रतिष्ठोऽपीदानीं प्रयत्नोपलभ्यपरिचयः धाराया अस्याः परिपोषक आसीत् । उदयनाचार्यस्तु नैयायिकादस्मादनिरुद्धाद् बिभेति स्म । तद् यथा स्वकीयायां परिशुद्धौ कथयत्ययम्—"विवरणकाराणां संकुलानीव वचांसीति तदत्र निपुणेन प्रतिपत्त्रा भवितव्यम्" इति [१।१।४० न्या० सू०]

एवमपरां सरणिमाश्रित्य सूत्राशयं संक्षेपतोऽवगमयितुं कृतसंकल्पा वृत्ति-स्वरूपा व्याख्याधारा मनांसि हरन्त्येव विदुषाम् । इमाश्च वृत्तयः विविधेषु कालेषु विभिन्नैर्नैयायिकैः प्रणीता अधुना मातृकासूचीग्रन्थेषु लब्धास्पदानि केवलं मातृका-गारानलङ्कुर्वन्ति । विश्वनाथन्यायपञ्चाननराधामोहनगोस्वामिभ्यां प्रणीते न्याय-सूत्राणां वृत्ती एव तद्विदां पुरतो दर्शितात्मानौ राजेते ।

नवीनवाचस्पतेर्न्यायतत्त्वालोकः, वर्द्धमानोपाध्यायस्य अन्वीक्षानयतत्त्वबोधः, वंशधरोपाध्यायस्य न्यायतत्त्वपरीक्षा, भट्टवागीश्वरस्य न्यायतात्पर्यदीपिका, सोदर-पुरकटकामूलकमैथिलनैयायिकस्य तर्काचार्यवेदान्तव्यासादिविविधविरुदविभूषितस्य अलङ्कारशेखराद्यनेकग्रन्थप्रणेतुः केशवमिश्रस्य गौतमीयसूत्रप्रकाशश्चास्मिन् प्रसङ्गे विशेषेणोल्लेखमर्हन्ति । अन्याश्च काश्चन न्यायसूत्रवृत्तयः सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयस्य मातृकागारेऽन्यत्र च लब्धस्थाना गवेषकाणां दृष्टिमपेक्षमाणा विद्यन्ते । एता न्यायसूत्रवृत्तयः प्राकाश्यं नीताः सत्यः न केवलं गवेषकाणामुपकृतये कल्पिष्यन्ते अपि तु गुरुपरम्परातो लब्धप्रसराणां न्यायमतवादानां विकासक्रमनिर्देशेऽपि साहाय्यं विधास्यन्तीत्यभिज्ञानां विश्वासः । अतएव चिरादेव प्रकाशनायाभिलषितस्यास्य गौतमीयसूत्रप्रकाशस्य सामीक्षिकं संस्करणं प्रस्तोतुमायासः साफल्यं गत इति हर्षातिरेकः ।

२—मातृकाविवरणम् ।

अस्य चतस्रो मातृकाः समुपलब्धाः, या आश्रित्य सम्पादनं सञ्जातमस्ति । प्रथमा मातृका कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालये संरक्षिता मन्ये ग्रन्थकर्तुः

स्वहस्तलेखरूपा मिथिलाक्षरैस्तालपत्रेषु लिखिता द्विनवतिपत्रमिता कीटैश्च यत्र तत्र भक्षिता मस्याः पुरातनत्वेन भ्रमाक्षरयुक्ता आद्यन्तरहिता च विद्यते। इह मातृकायां प्रथमाध्यायान्ते, तृतीयाध्यायान्ते, तुर्याध्यायान्ते च यथाक्रमं ४३४, ४३८, ४४१ इति लक्ष्मणाब्दाः सन्त्यङ्किताः। पञ्चाध्यायिन्यायशास्त्रेऽस्मिन् दश आह्निकानि सन्ति। तत्र केवलं द्वितीयाध्यायस्य द्वितीयमाह्निकं न विद्यते कस्यामपि मातृकायामिति दुःखस्थानम्। पुष्पिकायामिहाध्यायान्ते कस्यापि लिपिकारस्य नामनिर्देशोऽपि नावलं क्यते। अक्षराशुद्धिरस्यां मातृकायां प्रयत्नप्रेक्षणीयतामपि न गच्छति। इयं च क मातृकारूपेण सम्पादनावसरेऽत्र व्यवहृता।

अपरा चास्य मातृका सम्पूर्णानन्दसंस्कृतविश्वविद्यालयपुस्तकालये 'सरस्वती भवने' वर्तते। तत्रत्या बौद्धदर्शनविभागाध्यक्षा पण्डित जगन्नाथ उपाध्याय महाशया मां प्रति निष्कारणं स्नेहं प्रदर्शयन्त एतां मातृकां सुलभामकुर्वन्। एष जनस्तेषां हार्दिकीं कृतज्ञतामावहति। इयं मातृका मैथिलाक्षरैः कागजाधारे लिखिता पञ्चदशपत्रमिता उपचारच्छललक्षणसूत्रव्याख्यां यावदुपलभ्यते ख मातृकारूपेण सम्पादनावसरेऽत्र व्यवहृता।

तावतोंऽशस्य च तृतीया मातृका विद्यापीठेऽस्मिन् पञ्चविंशतिमितेषु तालपत्रेषु मैथिलाक्षरैः लिखिता ग मातृकारूपेणेह व्यवहृता। परमेतासु सर्वासु नाधिकमुपलभ्यते पाठभेदः। यश्च पाठभेदस्तत्र तात्त्विकमन्तरं नास्ति। अतएव दरभंगामातृकैव मूलमनयोर्द्वयोर्मातृकयोरिति मादृशां धारणा।

चतुर्थी मातृका कलिकातास्थिते एशियाटिकसोसाइटीसंस्थाने समुपलब्धा। या च चतुर्विंशतिपत्रमिता देवाक्षरैः कागजाधारे लिखिता आद्यन्तयुक्ता अक्षराशुद्धिबहुला विकीर्णतां गता विद्यते। पत्रपञ्चकं प्रथमाध्यायस्य, दशपत्राणि चतुर्थाध्यायस्य, नवपत्राणि पञ्चमाध्यायस्य सूत्राणां वृत्तिमावहन्ति। गोपीभट्टनामा कश्चन मातृकाया अस्या लेखकः पुष्पिकायां स्वनामधेयं समुल्लिखति। अनया च मातृकया सम्पादने सुमहानुपकारः सञ्जातः। यत्र दरभंगामातृकायां कीटभक्षिताक्षरपंक्तिजातमासीत् तत्र शुद्धः समुचितश्च पाठोऽस्याः संगृहीतः।

अस्य गौतमीयसूत्रप्रकाशस्याध्ययनेन कानिचन महत्त्वपूर्णानि आलोचनापेक्षाणि च तथ्यानि तत्र निर्दिष्टानि परिचर्चितुं मादृशान् मुखरयन्ति।

३—ग्रन्थकर्तृपरिचयः।

मैथिलोऽयं केशवमिश्रोऽलङ्कारशेखरसंख्यापरिमाणाद्यनेकग्रन्थानां प्रणेता सौभाग्येन स्वपरिचयमस्मभ्य प्रददातीति प्रमोदस्थानम्। संख्यापरिमाणाभिधग्रन्थस्य समाप्तावस्य परिचय एवं समुल्लिखितो विद्यते—"इति महामहोपाध्याय कटकावासिसोदरपुरकमलदिवाकरमिश्रश्रीकेशवकृतं संख्यापरिमाणपुस्तकं समाप्तम्" इति। मैथिलपञ्जीप्रवन्धे पुरुषानुक्रमोऽस्य परिचय उपलभ्यते। तथा हि तत्र—"म०म० विश्वनाथ-रतिनाथ-मिश्रदालू-मिश्रगदाधर महोपाध्याय विसो (विश्वधर) महोपाध्यायकेशव" इति दृश्यते। अयं च केशवः कुसुमाञ्जलेरामोदस्यात्मतत्त्व-

विवेकस्य कल्पलतायाश्च रचयितुः प्रसिद्धात् भवनाथात्मजात् शङ्करमिश्रात् पुरुषानुक्रमेण तृतीयस्तद्वंशज एवासीत्। मिथिलाया ओइनवारवंशीयान्तिममहाराजस्य लक्ष्मीनाथकंसनारायणस्य सभायां सम्मान्यपण्डितरूपेणास्यावस्थितिरासीत्। अतएव ख्रैष्टाब्दस्य षोडशशतकस्यादिभागे मिथिलायां प्रसिद्धावदातवंशे सोदरपुरकटका मूलग्रामे केशवमिश्रो जनिं लेभे इति निश्चेतुं शक्यम्। एवञ्च मातृकायामुल्लिखितस्य लक्ष्मणाब्दस्य सङ्गतिरपि भवति। इदानीं ८६८ लक्ष्मणाब्दः प्रचलति।

अयमेव केशवमिश्रः कवीन्द्राचार्यसरस्वत्यभिधानस्य प्रशंसायां श्लोकचतुष्टयं[1] व्यरचयत्। हरदत्तशर्मसम्पादिते पुण्यपत्तनतः प्रकाशिते कवीन्द्रचन्द्रोदये तेषां श्लोकानां विद्यते समावेशः। तत्र च सम्पादकः ख्रिष्टीयषोडशशताब्द्या अन्तिमांशे सप्तदशशताब्द्याश्च प्रारम्भे केशवमिश्रमनुमानतः प्रस्थापयामास प्रत्यपादयच्च कोटकाङ्गराराज्यस्य नृपतेः माणिक्यचन्द्रस्य सभापण्डित आसीदिति। स च १५६३ ख्रिष्टाब्दे शासनमकरोत्।

सम्भवति कदाचित् मिथिलामहीपालस्य परिषदि प्रारम्भे वयसि कोटकाङ्गरामहीपतेः माणिक्यचन्द्रस्य च परिषदि अन्तिमे वयसि आसीदयमिति।

यद्यपि केशव इति विभिन्नसमयभवानां मैथिलपण्डितानामभिधानं समुपलभ्यते। तैः प्रणीताः ग्रन्थाश्च सन्ति। यथा तर्कभाषाकृत् केशवमिश्रः नैयायिकेषु प्रसिद्ध एव

१—पृथ्वीशार्ककरेण दुःसहतरेणावग्रहात्तं नृणां
दृष्टादृष्टफलप्रदं सुकृतिनां क्षेत्रं प्रयागादिकम्।
सूक्त्यैवामृतधारया प्रशमयन् योऽमूमुचत्तद्व्यथां
कुर्वन् सुग्रहसत्फलं जयति तच्छ्रीमान् कवीन्द्रो बुधः ॥६३।

अम्भोजं श्रीनिवासो व्यभिचरितमिदं व्याप्तिरेषा न तादृक्
यद्दृष्टं श्रीकवीन्द्रेक्षणयुगकमलं यं यमेवावृणीते।
सम्पत्तिस्तं तमेव श्रयति बहुगुणा तत्र सङ्केत ईदृक्
चन्द्रस्येवाब्जताया ध्रुवमिदमुदितं भावितं तत्त्वविज्ञैः ॥६४॥

विद्या श्रीः कीर्तितुष्टी धृतिरतिशयिता ह्रीश्च धर्मैकसीमा
श्रेयः सत्त्वप्रधानं दधति हि मतुपं यं समासाद्य चाद्य।
तस्मिन् श्रीमत्कवीन्द्रे गुणिगणगणनारम्भसंख्यायमाने
मिश्रश्रीकेशवस्यानतिरतिगणितासंमदाव्यूहदास्तु ॥६५॥

स्वामिश्रीमत्कवीन्द्रे चरणसरसिजानम्रविश्वम्भरेन्द्रे
योगीन्द्रे भूमिपेन्द्रेऽर्जुन इव कपिले ज्ञानशास्त्रे द्विजेन्द्रे।
दिङ्नागेन्द्रे मृगेन्द्रे सुनयवितरणन्यूनदेवासुरेन्द्रे
शब्दाम्भोधौ फणीन्द्रे निवसतु कमला चातके मय्यपीन्द्रे ॥६६॥

तथापि तद्भिन्नः गौतमीयसूत्रप्रकाशस्यालङ्कारशेखरस्य द्वैतपरिशिष्टस्य संख्या-परिमाणाभिधस्यान्यस्य च ग्रन्थस्य प्रणेता एक एव केशवमिश्र ऊर्ध्वंदर्शितपरिचय इत्यत्र विवादाभावः। यतो मङ्गलश्लोकोपसंहारपद्ययोरेषु ग्रन्थेषु सर्वथैक्यं लेखकस्यैक्येन विना असम्भवमेवेति नात्र प्रमाणान्तरापेक्षा।

"तीरभुक्तिमहीपालपरिषन्मुख्यसूरिणा।
श्रीकेशवकवीन्द्रेण निबन्धोऽयं विधीयते॥"

इति संख्यापरिमाणभिधे ग्रन्थे प्रारम्भश्लोकः। अस्यैव चतुर्थचरणं "कृता सूत्रप्रकाशिका" इति रूपेण परिवृत्य गौतमीयसूत्रप्रकाशस्य प्रथमाध्यायान्ते विनिवेशः। अलङ्कारशेखरस्य गौतमीयसूत्रप्रकाशस्य च मङ्गलाचरणमेकेनैव पद्येन विहितम्। तच्च पद्यम्

"प्राणान् कृशोदरीणां राधानयनान्तसर्वस्वम्।
तेजस्तमालनीलं शरणागतवज्रपञ्जरं वन्दे"॥ इति।

"उमापतिसगर्भस्य श्रीविश्वधरजन्मनः।
श्रीमत्केशवमिश्रस्य कृतिर्विजयतेतराम्॥"

इति गौतमीयसूत्रप्रकाशस्यान्तिमश्लोकः पञ्जीप्रबन्धाभिहितं विश्वधरात्मजत्वं केशवस्य स्फुटं प्रतिपादयति।

अयं च मुख्यतो नैयायिकः, वेदान्ते च लब्धप्रतिष्ठः काव्यस्यापि मर्मज्ञ आसीत्। न केवलं जन्मभूमौ मिथिलायामपि तु विद्यायाः केन्द्रे वाराणसीनगरेऽपि वेदान्तं न्यायदर्शनं चाध्यापयन् प्राख्यापयत् वैदुष्यमुपार्जयच्च यशांसीति स्वयमनेन प्रत्यपादि निम्नपद्ये

"सुखेनाध्यापयन् काश्यां न्यायवेदान्तदर्शने।
श्रीकेशवकविश्चक्रे न्यायसूत्रप्रकाशनम्॥" इति।

गौतमीयसूत्रप्रकाशान्तिमश्लोकस्तत्रत्या निम्ननिर्दिष्टपुष्पिका चास्मिन् प्रसङ्गे सर्वथावलोकनीया। तद्यथा—"इति महामहोपाध्यायतर्काचार्यवेदान्तव्यासश्रीकेशव-मिश्रकृते गौतमीयसूत्रप्रकाशे पञ्चमोऽध्यायः।" एवमलङ्कारशेखरस्यारम्भिकश्लोको-ऽप्यत्र द्रष्टव्यः। यत्र—

"वेदान्तन्यायविद्यापरिचयचतुरं केशवं सन्नियुज्य"।

इति लिखितमस्ति। साहित्यशास्त्रे न केवलमलङ्कारशेखरमपि तु सप्तान्यानि पुस्तकानि नैयायिकैरेव ज्ञातुं योग्यानि समारचि कवीन्द्रेण केशवेनेति स्वयमारम्भे अलङ्कारशेखरस्याभिदधात्ययम्—

"ग्रन्थाः काव्यकृतां हिताय विहिता ये सप्त पूर्वं मया।
ते तर्कार्णवसंप्लवव्यसनिभिः शक्याः परं वेदितुम्"। इति।

अस्य च परःसहस्रं शिष्याः विद्याप्रचाराय समुद्रपारमपि समगच्छन्निति निम्नश्लोकस्तदीयः प्रतिपादयति—

"श्रीकेशवेन व्यरचि प्रवन्धः पूर्णानि विश्वान्यपि यद् यशोभिः।
शिष्यैर्यदीयैश्च परः सहस्रैः पारे समुद्रानपि भूषिता भूः" ॥ इति ।

सत्यपि नव्यन्यायप्रचारबाहुल्ये सूत्राणामध्ययने संलग्नचेतसः स्वल्पायासेन प्राचीनन्यायसिद्धान्तसारानवगमयितुं बद्धपरिकराः शिष्याणां हितकामनया शास्त्र-संरक्षणप्रवृत्त्या च वृत्तिप्रणयने तत्परा इमे विद्वांसो वस्तुतः प्रशंसापात्रमस्माकम्। न्यायचतुर्ग्रन्थिकारूपाकरतः सिद्धान्तरत्नान्युद्धृत्य वृत्तौ तदीयस्रजं विनिवेश्य च न केवलं ग्रन्थप्रणयने रत्नमाला विनिर्माणे वा कौशलमेभिः प्रादर्शि अपि तु संप्रदाय-संरक्षणपरैस्तैः सिद्धान्तानामुद्भवविकासपरम्पराप्रदर्शनपुरस्सरं पश्चाद्भवानां न्याया-ध्येतॄणां मार्गप्रदर्शनमप्यकारि।

४—(क) एतद्ग्रन्थवैशिष्टचम्

केशवमिश्रकृतेर्वैशिष्टचं संक्षेपतस्तत्प्रणीतेनैवाधो निर्दिष्टपद्येनावगन्तुं शक्यम्। यत्रायं कथयति—पूर्वापरसंबन्धयुक्तस्य निर्दोषस्य गुणविशिष्टस्य च सारसिद्धान्तस्य स्वल्पशब्देनाभिधानात्मकं व्याख्यासौष्ठवं मदीयायां वृत्तौ विद्यत इति। तद्यथा—

"आस्ते यद्यपि पूर्वपण्डितकृता व्याख्यैव संख्यावता—
मानन्दाय तथापि केशवकवेर्वाचामियं गुम्फना।
व्याख्यासौष्ठवशब्दलाघवमिथःसंबन्धपूर्वापर—
प्रत्यर्थप्रतिबद्धनिर्मलगुणा कुत्रान्यतो लभ्यताम् ॥"

श्लोकोऽयं गौतमीयसूत्रप्रकाशप्रारम्भे अलङ्कारशेखरोपसंहारे च दृश्यते। एतेनैव श्लोकेन सत्यपि विविधे व्याख्याग्रन्थे मम व्याख्या न भवति तैर्ग्रन्थैर्गतार्थेति महत्त्वपूर्णं विषयमपि प्रतिपादयति केशवमिश्रः। अपरेणापि पद्येनायं स्वकृतेर्वैशिष्टचं ख्यापयति। तद्यथा—

"इह न्यायारण्ये प्रकृतिगहने तर्कसरणि—
प्रवीणा विद्वांसः कति कति न पूर्वं समभवन्।
परं पञ्चाध्यायीपरिणतरहस्यप्रणयिनो।
विरोधव्यासेधव्यसनपटवः केचन पुनः ॥"

इति गौतमीयसूत्रप्रकाशस्य प्रारम्भश्लोकः। इह "केचन पुनः" इत्यनेनात्मा-नमेव सङ्केतयति ग्रन्थकृदिति न तिरोहितं विद्वल्लोचनेभ्यः।

(ख) अपरं च वृत्तेरस्याः वैशिष्टचं न्यायसूत्राणां पाठस्य तत्संख्यायाश्च निर्णय-प्रयासः। तेषां प्रकरणनिर्देशः प्रकरणमध्यपतितसूत्रसंख्यानिर्देशश्च। अतएव यत्प्रयो-जनं न्यायसूचीनिबन्धनिर्माणद्वारा वृद्धवाचस्पतिमिश्रेण न्यायसूत्रोद्धारप्रणयनद्वारा द्वितीयवाचस्पतिमिश्रेण पूरितं, संशोधनपूर्वकं तदेवानेनापि सम्पादितम्। तस्मादिह वृत्तौ संख्यात्रयनिर्देशो यथास्थानमधिकं शोभते। प्रथमा संख्या आह्निकमध्यसूत्र-क्रमानुसारिणी प्रचलति, द्वितीया प्रकरणपतितसूत्राणि निर्धारयति, तृतीया च प्रकरणं निर्दिशति। मुद्रितपुस्तके प्रकरणनिर्देशावसरेऽत्र सौविध्याय प्रथमं प्रकरणपतितसूत्र-

संख्या पश्चात् तत्रैव प्रकरणसंख्यानिर्देशश्च विहितोऽस्तीति पाठकैः सुधीभिराकलनीयम्। सूत्रेण सह प्रथितक्रमस्याध्यायाह्निकसूत्रसंख्यानिर्देशात्मकस्य परिपालनमिहापि विहितम्। पुनः पञ्चमाध्यायान्ते सूत्रसंख्या एवमुल्लिखिता यया ग्रन्थस्थसकलसूत्राणां सङ्कलनं सुशकम्। तद्यथा प्रथमे ४०+२०=६०। द्वितीये ६८+६८=१३६। तृतीये ६९+७३=१४२। चतुर्थे ६८+४९=११७। पञ्चमे ४३+२४=६७। सङ्कलनेन द्वाविंशत्यधिकपञ्चशतानि सूत्राणि ५२२ भवन्ति। न्यायसूचीनिबन्धे अष्टाविंशत्यधिकं पञ्चशतानि सूत्राणि सन्ति निर्दिष्टानि। अत एवालोचनमेतस्य सूत्रसंख्यायां न्यूनाधिक्यज्ञानार्थं तत्त्वाववोधाय चापेक्ष्यते।

५—न्यायसूत्रालोचनम्।

यथा वृद्धवाचस्पतिमिश्रात् प्राक् न्यायसूत्राणां पाठविधौ संख्यानिर्णयविधौ च नासीदैकमत्यमिति कृत्वा न्यायसूचीनिबन्धप्रणयनस्यावश्यकता मिश्रवर्येणानुभूता। तथैव पश्चादपि तत्र नैकमत्यमिति प्रतीयते। अतएव संख्यायां निबन्धतोऽधिकं सूत्रत्रयं न्यायसूत्रोद्धारे नवीनवाचस्पतिमिश्रोऽङ्गीकृतवान्। केशवमिश्रस्तु कानिचन सूत्राणि नाङ्गीकरोति कतिचनाधिकं च सूत्राणि पठति। अतएव ५२२ सूत्राण्येवास्य संमतानि। म० म० तर्कवागीशचरणाः म० म० गङ्गानाथझा महाशयाश्च निबन्धानुसारिण एव। विश्वनाथपञ्चाननस्तु ऊनचत्वारिंशदधिकपञ्चशतानि सूत्राणि वृत्तौ व्याख्याति।

फलितार्थस्तु न्यायसूत्राणामालोचनावसरे न्यायसूचीनिबन्धन्यायसूत्रोद्धाराभ्यां सह अनिरुद्धाचार्यस्य विवरणपञ्जिकायाः, आचार्योदयनस्य परिशुद्धेः, केशवमिश्रप्रणीतस्यास्य प्रकाशस्य, विश्वनाथपञ्चाननकृताया वृत्तेः म० म० गङ्गानाथझा सम्पादितस्य खद्योतसहितस्य न्यायदर्शनस्य, म० म० फणिभूषणतर्कवागीशसंशोधितन्यायभाष्यस्य, न्यायभूषणस्य, जयन्तभट्टप्रणीताया न्यायमञ्जर्याः, अन्येषां च ग्रन्थानाम् (यत्रोद्धरणरूपेण समागतानि सन्ति न्यायसूत्राणि) अवलोकनमावश्यकम्। एते हि पुरातना आधुनिकाश्च प्रसिद्धपाण्डित्या अस्माकं पूज्यास्तद्विदः न्यायसूत्राणां पाठप्रसङ्गे तत्संख्यानिर्णयावसरे च दत्तावधानाः सन्तीत्येतेषां ग्रन्थजातस्यावलोकनेन सुकरतयाऽवगन्तुं शक्नुयात् कश्चिदपि।

एष जनस्तु स्वातन्त्र्येण न्यायसूत्राणां पाठालोचनं न्यायसूत्रशब्दकोषं चाचिरमेव प्रस्तोतुं यतमान आस्ते। तदर्थं सामग्रीसंकलनादिके चास्ति संलग्नचेताः।

(क) अस्तु प्रकृतमनुसरामः। (१) प्रमाणलक्षणप्रकरणे सर्वसम्मतं शब्दद्वैविध्यबोधकं सूत्रं—'स द्विविधः दृष्टादृष्टार्थत्वात्' १।१।७। इति। एतत् नैव व्याख्याति केशवमिश्रोऽत्र प्रकाशे। आप्तोपदेशः शब्दः।१।१।६। इति सूत्रव्याख्यायां कथयति—"स चायं द्विविधः दृष्टादृष्टार्थभेदात्। अस्मदादिप्रत्यक्षतदन्यार्थप्रतिपादकत्वात्। वेदतदन्यत्वाद्वेति प्रपञ्चितं मयैव तर्कताण्डवे" इति।

(२) 'प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचन'मिति २।१।२६ सूत्रं द्वाभ्यामपि वाचस्पतिमिश्राभ्यां स्वीकृतं केशवेन नाङ्गीकृतम्।

(३) 'अनेकद्रव्यसमवायात् रूपविशेषाच्च रूपोपलब्धिः' ।३।१।३८ इति सूत्रं वृद्धनवीनवाचस्पतिमिश्राभ्यामिन्द्रियस्य भौतिकत्वपरीक्षायां परिगृहीतं नाङ्गीकरोति केशवमिश्रः । वस्तुतः वैशेषिकसूत्रमेतत् प्रमादादिह संगृहीतमिति पूज्यचरणैः प्रो० श्रीअनन्तलालठक्कुरमहाशयैः स्वनिबन्धे[1] प्रतिपादितम् ।

(४) इन्द्रियनानात्वपरीक्षाप्रकरणे समापतिते 'विप्रतिषेधाच्च न त्वगेका' ३।१।५५। 'भूतगुणविशेषोपलब्धेस्तादात्म्यम्' ।३।१।६१ । इति सूत्रे वृद्धनवीन वाचस्पतिमिश्राभ्यामनुमते नाङ्गीकरोति केशवमिश्रः । अयं तथा मौनमवलम्बते यथैतस्य सविधे एतयोः सूत्रत्वख्यापनाय कुत्रचिच् चर्चापि नासीत् ।

(५) अर्थपरीक्षाप्रकरणपतितमुभाभ्यां वाचस्पतिमिश्राभ्यां स्वीकृतं सूत्रं 'तेनैव तस्याग्रहणाच्च' ३।१।७१। इति नैव मनुते केशवमिश्रः ।

(६) अवयविपरीक्षाप्रकरणपतिते 'कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः' ४।२।७ । 'तेषु चावृत्तेरवयव्यभावः' ।४।२।८। इति द्वे सूत्रे वाचस्पतिमिश्राभ्यामुभाभ्यां स्वीकृते केशवमिश्रेण नाङ्गीकृते एव विद्येते । फलतोऽष्टानां सूत्राणां वृद्धनवीनवाचस्पतिमिश्राभ्यां स्वीकृतानामनङ्गीकार एकस्य च बुद्धयनित्यताप्रकरणोपसंहारे "न हेत्वभावात्" इति ३।२।१०। सूत्रस्याधिकं पाठः केशवमिश्रस्य सम्मतोऽस्ति ।

(७) अस्य सूत्रत्वस्वीकाराय सयत्नश्चायं दृश्यते । तथाह्यत्र "केचित्तु नैतत् सूत्रम् । [इत्याहुः] तत्र पूर्वविचारासमाप्तौ उत्तरविचारानवतारात् । न चाक्षेपलभ्यः सिद्धान्तः । शाब्दे पूर्वपक्षे सिद्धान्तस्यापि तथौचित्यात्" । वाचस्पतिमिश्रस्तु भाष्यपंक्तितयैतदादाय तात्पर्यटीकायां व्याख्यातवान् । अत एवात्र वृत्तावग्रेऽभिहितम् "हेत्वभावादिति भाष्यमिति टीका च सूत्रव्याख्यानपरभाष्याभिप्रायेणेति" । न्यायनिबन्धप्रकाशे वर्धमानोपाध्यायोऽपि सूत्रत्वमस्य समर्थयति ।

(८) एवं 'प्रागुत्पत्तेरभावनित्यत्वात् स्वाभाविकेऽप्यनित्यत्वम्' ।४।१।६६ । 'अणुश्यामतानित्यत्ववद्वा' ।४।१।६७ । इति सूत्रद्वयं केचिदन्यकर्तृकं मत्वा न्यायसूत्रेषु प्रक्षिप्ततयैतयोः परिगणनमित्युक्तवन्तः । तन्मतं निरसितुकामोऽयं केशवमिश्रः वृत्तौ कथयति "केचित् भिन्नवक्तृकं सूत्रद्वयमिति तन्न । वादिभेदे वाक्यार्थानुपपत्तेर्मानाभावाच्चे"ति ।

(ख) (१) २।१।१५। तमं सूत्रं निबन्धे त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत् तत्सिद्धेरिति पठितम् । किन्तु केशवमिश्रः चकारान्तं सूत्रांशं सूत्रतया नैव गृह्णाति । शब्दादातोद्यसिद्धिवत् तत्सिद्धेरित्येतावन्मात्रं सूत्रं पठति । एष च नवीनवाचस्पतिमिश्रप्रभाव इत्यत्र टिप्पण्यामस्ति प्रतिपादितम् ।

(२) जयन्तभट्टस्तु १।२।१५ तमसूत्रे "तदविशेषादिति" सूत्रबहिर्भूतमित्यगादीत् तन्निरस्यति केशवमिश्रः ।

---

१. द्रष्टव्यम् दरभंगा मिथिलासंस्कृतानुसन्धानसंस्थानस्य शोधपत्रम्, महारानीराजलक्ष्मी अभिनन्दनग्रन्थः, १९७० तमख्रिष्टाब्दे प्रकाशितः ।

(३) न चैकदेशोपलब्धिरवयवविसद्भावात् ।२।१।३२। इति सूत्रं न्यायसूत्रोद्धारपरिगृहीतं केशवमिश्रः स्वीकरोति। म० म० फणिभूषणतर्कवागीशचरणास्तु नाङ्गीकुर्वन्ति सूत्रतया । यद्यपि म० म० गङ्गानाथझा महाशयाः न्यायसूचीनिबन्धे सूत्रमेतत् मुद्रापितवन्तः, किन्तु एष प्रमादः। स्वयं खद्योते टिप्पणयन्ति यन्न्यायसूचीनिबन्धे नैतदुपलभ्यत इति ।

(४) इयमेव स्थितिः 'न सद्यः कालान्तरोपभोग्यत्वात्' इति ४।१।४५। तमसूत्रस्य ।

(ग) महामहोपाध्याय फणिभूषणतर्कवागीशचरणाः जातिलक्षणावसरे ५।१।१। सूत्रं प्रथितपाठस्य व्यत्यासं विधाय नित्यानित्यकार्यसमेत्यस्य स्थाने अनित्यनित्यकार्यसमेति पठन्ति । यतो हि प्रथममनित्यसमजातेर्लक्षणं कृत्वा पश्चात् नित्यसमजातिलक्षणं सूत्रकृता कृतम् यथाक्रमं ३२-३५ तम सूत्रयोः ।

केशवमिश्रस्तु विषयममुं समुत्थापयति ५।१।३४। तम सूत्रवृतौ—"ननु नित्यानित्यसमयोर्विभागोद्देशातिक्रमः किमर्थं इति । उत्तरे यद्यपि स्वयं न किमपि कथयति। परं कस्यचिदेके पदवाच्यस्य मतमुद्धरति यत् "वर्ण्यावर्ण्यवदनयोर्मिथो विपर्ययात्मकत्वभ्रमनिरासार्थ"मिति । अपरे इति पदवाच्यस्य कस्यचिन्मते तु क्रमे वीजान्तरं नास्ति वाचो न्यायादेव क्रमः। भाष्यव्युत्क्रमं दृष्ट्वा सूत्रे न तथा व्युत्क्रमो विधेय इति सानातनिमतं चोद्धरति ।

(घ) उभयोर्वाचस्पतिमिश्रयोरप्यत्र न्यायसूत्रपाठालोचने परस्परं मतभेदो दृश्यते । न्यायसूचीनिबन्धपरिगृहीतानि चत्वारि सूत्राणि नैव दृश्यन्ते न्यायसूत्रोद्धारे । तानि चाधोनिर्दिष्टानि—

(१) क्वचित्तु निवृत्तिदर्शनात् अनिवृत्तिदर्शनाच्च क्वचिदनैकान्तः ।२।१।२०।

(२) उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः ।२।२।२८।

(३) द्विविधस्यापि हेतोरभावादसाधनं दृष्टान्तः ।२।२।४२।

(४) न तद्विकारणां सुवर्णभावाव्यतिरेकात् ।२।२।४६। इति ।

एषु क्वचित्तु इत्यादिसूत्रं केशवमिश्रसंमतम् । अतएवायमत्र तद् व्याख्याति । द्वितीयाध्यायद्वितीयाह्निकप्रकाशस्य मातृकाया अनुपलब्धचरत्वादन्येषामिह विचार्यतया समागतानां सूत्राणां विषये न किमपि वक्तुं शक्यम् ।

(ङ) न्यायसूत्रोद्धारे च कानिचन सूत्राण्यधिकं पठितानि यानि निबन्धे नोपलभ्यन्ते—

(१) 'अपरिसंख्यानाच्च स्मृतिविषयस्य' ।३।१।१५। (२) 'प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्ते यौगपद्यप्रसङ्गः' ।३।२।३४। (३) 'कुम्भादिष्वनुपलब्धेरहेतुः' ।३।२।३८। (४) 'ग्रहणे हेतुविकल्पाद् ग्रहणविकल्पो न बुद्धिविकल्पात्' ।३।२।४७।

(५) 'उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः' ।३।२।७१। (६) 'न करणाकरणयोरारम्भदर्शनात्' ।३।२।७३।

अस्मिन् प्रकाशेऽपि एतानि न्यायसूत्रोद्धारपरिगृहीतानि सूत्राणि नोपलभ्यन्ते। अतः वक्तुं शक्यते यत् केशवमिश्रः न्यायसूत्राणां पाठविधौ संख्यावधारणविधौ च कमपि वाचस्पतिं नानुगच्छति अपि तु विचारस्वातन्त्र्यं प्रकटयति।

(च) अन्यानि सूत्राण्यादायापि पूर्वं सूत्रत्वसन्देह आसीत्। अत एव 'पृथिव्यापस्तेजोवायुराकाशमिति भूतानि' ।१।१।१२। इत्येतत्सूत्रस्य कस्यचिन् मते भाष्यपंक्तित्वम्। किन्तु न्यायसूचीनिबन्धे न्यायसूत्रोद्धारे प्रकाशे चास्य पाठः सूत्रत्वं दृढं समर्थयति।

'ज्ञानलिङ्गत्वादात्मनो नानवरोधः' ।२।१।२४। 'तदयौगपद्यलिङ्गत्वाच्च न मनसः' २।१।२५। एतत्सूत्रद्वयं वृद्धवाचस्पतिमिश्रमतेन सूत्रत्वं संरक्षति। किन्तु मञ्जरीमतेनार्थात् त्रिलोचनाचार्यमतेन भाष्यपंक्तिरिति विवरणपञ्जिकायामनिरुद्धाचार्यः प्रतिपादयति।

'न चैकदेशोपलब्धिरवयविसद्भावादिति' ।२।१।३२। सूत्रं न्यायसूचीनिबन्धे नोपलभ्यते इति खद्योतः। परं मुद्रापितं सूत्रमेतत् न्यायसूचीनिबन्धे गङ्गानाथझा महाशयेन प्रमादादेवेति मन्ये। केशवमिश्रस्तु सूत्रतयैतद् परिगृह्णाति।

३।२।२०, ३।२।२१, ३।२।२३ एतेषां सूत्राणां सूत्रत्वं परिशुद्धौ समर्थितमित्येतावता निश्चीयते यत् तदानीमेतेषां सूत्रत्वे सन्देह आसीदत एव सूत्रत्वसमर्थनायाचार्योदयनस्य प्रयासः।

(छ) विश्वनाथवृत्तौ तु न्यायसूचीनिबन्धपरिगृहीतानामूर्ध्वंदर्शितानां सूत्राणां समावेशेन सह न हेत्वभावादिति केशवमिश्रस्वीकृतस्य सूत्रस्य न्यायसूत्रोद्धारस्य अपरिसंख्यानाच्चेति, प्रातिभवत्तु इति, कुम्भादिष्विति, न करणाकरणयोरिति सूत्रचतुष्टयानां निवेशो दृश्यते। अथैतस्मादधिकं कानिचनाधोनिर्दिष्टानि सूत्राणीह स्वीकृतानि। तानि यथा (१) प्रमाणतोऽनुपलब्धेः ।२।१।५१। (२) विमर्शहेत्वनुयोगे च विप्रतिपत्तेः संशयः ।२।२।१३। (३) वर्णत्वव्यतिरेकाद् वर्णविकाराणामप्रतिषेधः ।२।२।५०। (४) सामान्यवतो धर्मयोगो न सामान्यस्य ।२।२।५१। (५) अव्यभिचाराच्च प्रतिघातो भौतिकधर्मः ।३।१।३८। (६) नेन्द्रियार्थानुपलब्धेः ।३।१।५३। (७) व्याहतत्वादहेतुः ।३।१।५४। (८) संसर्गाच्चानेकगुणग्रहणम् ।३।१।६७। (९) बुद्ध्यवस्थानात् प्रत्यक्षत्वे स्मृत्यभावः ।३।२।४६। (१०) उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः ।३।२।७२। (११) अधिकाराच्च विधानं विद्यान्तरवत् ।४।१।६१। (१२) अनुवादे त्वपुनरुक्तं शब्दाभ्यासादर्थविशेषोपपत्तेः ।५।२।१५।

(ज) सूत्रद्वयं निबन्धधृतं केवलमिह न दृश्यते (१) 'क्वचिन्निवृत्तीति' ।२।१।२०। 'द्विविधिस्यापि' २।२।४३। इति च।

(झ) भट्टवागीश्वरप्रणीतायां न्यायतात्पर्यदीपिकायामपि न्यायभाष्यपंक्तिरूपेण प्रसिद्धानि सूत्रतया कानिचन पदानि परिगृहीतानि तान्यधिकृत्य इतः विद्यापीठादेव प्रकाश्यमानायाः न्यायतात्पर्यदीपिकाया भूमिकायां वक्ष्यते ।

६—ग्रन्थस्योपसंहारपद्यानामभिप्रायः ।

वृत्ताविहाध्यायान्ते प्रकरणानां प्राकरणिकविषयाणां तत्प्रकरणपतितसूत्र-संख्यानां च निर्देशं पद्यैरपि करोति केशवमिश्रः । तथाहि प्रथमाध्यायान्ते—

"अक्षिपञ्चध्रुवश्चैव त्रिषडश्व[षड्वसु]युगन्धरः ।
पश्चात् त्रिषड्वसुत्रीणि प्रथमाध्यायसूत्रकम् ॥
संवन्धमानमेयानि तत्पूर्वाङ्गं तदाश्रयः ।
तत्स्वरूपं चोत्तराङ्गं प्रथमे चरमे पुनः ॥

कथा च हेत्वाभासाश्च छलञ्चाशक्तिलिङ्गकम्" । इति । पुनरत्र प्रत्येकमाह्निके कति प्रकरणानि भवन्तीत्यपि समुल्लिखितं विद्यते—

"सप्तश्रुती ग्रहाम्भोधी ग्रहाश्वौ वासवर्तुकौ ।
जीमूत [?] वाहावाद्यन्ताह्निके प्रकरणं क्रमात्" ॥ इति ।

अस्याभिप्रायस्तु प्रथमाध्याये यथायथं सप्त चत्वारि प्रकरणानि सन्ति । द्वितीयाध्याये नव चत्वारि, तृतीयाध्याये नव सप्त, चतुर्थाध्याये चतुर्दश षट्, पञ्चमाध्याये सप्तदश सप्त च प्रकरणानि सन्ति । किन्तु जीमूतोऽद्रौ भृतिकरे देवताडे पयोधरे' इति मेदिनीकोशनिर्देशदर्शनात् कथं सप्तदश संख्यावाचकत्वं जीमूतस्ये त्यालोचनीयं विपश्चिदपश्चिमैः । अत एव चात्र प्रश्नचिह्नं प्रदत्तम् ।

द्वितीयाध्यायद्वितीयाह्निकमात्रस्यानुपलब्ध्या तत्रत्योपसंहारश्लोको नाभूत् दृष्टिगोचरः । तृतीयाध्यान्तोपसंहारश्लोकास्तु—

"त्रिस्त्रिरष्टौ त्रिरङ्को त्रि[?]ग्रहैकं वसुरीश्वरः ।
दिशोऽष्टौ श्रुतिदृक्वेदा दिशो वेदास्त्रिरूपकम् ॥

अत्र त्रिग्रहैकमिति न समञ्जसम् । पञ्चभिः सूत्रैः प्रकरणस्य परिपूर्णता । अत-एव त्रिपदमसंलग्नं प्रतीयते । ग्रहैकमित्यनेनैकोनविंशतिः संख्या विवक्षिता । सा च संलग्ना । अन्यत्सर्वं संलग्नम् ।

नियोग-विकल्प-समुच्चय-विषयसंशय-प्रयोजन-पूर्वपक्ष-सिद्धान्त-विचाराङ्गानि पञ्च ।

अनिन्द्रियमकायञ्च चक्षुरेकं मनोऽन्यथा[ता] ।
नित्यता च शरीरं च भौतिकत्वं च भूरिता ॥
अर्थाः शेषे ह्यनित्यत्वं स्थैर्यं बुद्ध्यात्मवृत्तिता ।
विनाशित्वमलङ्घ्यत्वं मनश्चादृष्टजन्यता" ॥ इति ।

एवं चतुर्थाध्यायान्तोपसंहारश्लोकाः—

"द्वौ वाहाः श्रुतयो वाणास्त्रिस्त्रिवेदाः शरास्त्रयः।
वेदा रामा हरा वेदा दिशश्च प्रथमाह्निके॥
त्रिसूर्याः वसवः सूर्याः सूर्यायुग्मं द्वितीयके।
आद्येऽनुकीर्तनं दोषत्रैराश्यं प्रेत्यभावकम्॥
शून्येश्वरावुपादानमकस्मात् सर्वनाश्यता।
सर्वनित्यत्वपार्थक्याभावाः संख्याफलक्रमाः॥
मोक्षो द्वितीये दोषोऽर्थोऽवयवी तद्विपर्ययः।
बाह्यार्थो ज्ञाविवृद्धिश्च ज्ञानरक्षा त्वनुक्रमात्॥" इति।

पञ्चमाध्यायान्तोपसंहारश्लोकास्तु—

"उमापतिसगर्भस्य श्रीविश्वधरजन्मनः।
श्रीमत्केशवमिश्रस्य कृतिर्विजयतेतराम्॥

श्री केशवेन व्यरचि प्रबन्धः
पूर्णानि विश्वान्यपि यद्यशोभिः।
शिष्यैर्यदीयैश्च परःसहस्त्रैः
पारे समुद्रानपि भूषिता भूः॥

नमामि सज्जनान् प्रीत्या न तु भीत्यापि दुर्जनान्।
सज्जनः सानुबन्धश्चेद् दुर्जनः किं करिष्यति॥
त्रि-त्रि-द्वि-त्रि द्वि-त्रि[द्वि]क द्वि-त्रि-द्वि-द्वि त्रिवाम [द्विराम] दृक्।
द्विपैनाद्ये [द्विके नागे] षडाम्नाय-त्रिद्वि-श्रुत्यग्नि-युग्मकम्॥
जाति-षट्कं [च] युग्म-द्वा [द्वा] दशैकैकशः क्रमात्।
षट्पक्षी पञ्च वेदाग्निचन्द्राब्ध्यग्निद्विनिग्रहाः॥" इति।

श्लोकाभ्यामाभ्यां पञ्चमाध्यायस्य प्रकरणपतितसूत्रसंख्या प्रकरणविषयश्च निर्दिश्येते।

(७) अस्योपजीव्या आचार्याः ग्रन्थाश्च

अस्यां वृत्तावुपजीव्यतया वात्स्यायन उद्द्योतकरस्तात्पर्यटीकाकृद् वाचस्पतिः, जयन्तभट्टः, विद्यासागरः, भास्करः, उदयनः, सानातनिः, स्वायम्भुवः, तरणिमिश्रः, अन्ये चाचार्या वृद्धाः, केचिद् परे अन्ये इतिपदवाच्याः परिगृहीताः सन्ति। अत एव अवयविपरीक्षोपसंहारे २।१।३६ तमसूत्रव्याख्यायाम्—"अत्र परीक्षितं प्रत्यक्षमिति भाष्यदर्शनादवयविप्रकरणमपि प्रत्यक्षपरीक्षापरम्……" इत्युक्तम्। फललक्षणसूत्र १।१।१९। व्याख्यावसरे "फलशब्दः सुखदुःखोपभोगे मुख्यः शरीरादौ गौण इति वार्त्तिकम्" इत्यभिहितं वर्तते ।१।२।१५ तमसूत्रव्याख्यायां खण्डनार्थं जयन्तभट्टः, अरुचिप्रदर्शनार्थं वार्त्तिककारः, समादरार्थं टीका च समुद्धृताः सन्ति। छललक्षणसूत्रे १।२।१०। भास्करनामा कश्चिन्नैयायिकः समुद्धृतस्तस्य परिचयस्तु

नास्मदादिभिरुपलब्धः। यत्र तत्र प्राचीनस्य वृद्धस्याचार्यस्य च समुद्धरणमिह विलोक्यते। के चाभिप्रेतास्तैः शब्दैरिति निर्णेतुं नास्मदादयः प्रभवन्ति। यद्यपि उदयनस्य न्यायसम्प्रदाये आचार्यत्वमस्ति प्रसिद्धम्। विद्यासागरस्योल्लेखस्तु प्रत्यक्षपरीक्षा-प्रकरणे 'प्रत्यक्षमनुमानम्' २।१।३०। इति सूत्रवृत्तौ ईश्वरसिद्धिप्रकरणे "तत्कारितत्वादहेतुः" ४।१।२१। इति सूत्रव्याख्यायां च दृश्यते। वासुदेवसार्वभौमस्य पितृव्यजो भ्राता पुण्डरीकाक्षविद्यासागरोऽयमिति गुरुचरणाः प्रो० अनन्तलालठाक्कुरमहाशयाः[1]। ईश्वरसिद्धिप्रसङ्गे केशवमिश्रस्तात्पर्यटीकाकृतो वाचस्पतेः प्रभावितः परिलक्ष्यते न तूद्द्योतकरतः। अतएवेदं प्रकरणमीश्वरोपादानतानिराकरणपरमयं मनुते। "कार्यमात्रं ब्रह्मोपादानकं न वेति संशयः" इत्यवतरणपूर्वकं पूर्वपक्षतया "ईश्वरः कारणम्" इति सूत्रं व्याख्याति। न वायमीश्वर-निमित्तकारणतावादपरं सिद्धान्तसूत्रमेतद् वार्तिककाराभिमतं स्वीकरोति।

अत्र "विद्यासागरास्तु परिणामेणेश्वरोपादानकं जगदित्याक्षिप्तपूर्वपक्षकं सिद्धान्तसूत्रम्—"ईश्वरः कारणम् इत्यादि। ईश्वरः कारणं निमित्तकारणं पुरुषकर्माफल्यदर्शनात् पुरुषव्यापारोऽफलोऽपि दृश्यते यतोऽतः कारणान्तरापेक्षेत्यर्थः। न तूपादानं कार्यैकजात्यादि" ति भावः इत्येवंरूपेण वार्तिककाराभिहितमत एव विद्यासागरस्य समादरः दृश्यते। एवञ्च विद्यासागरकेशवमिश्रयोः मतपार्थक्यमवलोकनीयम्। परं मिश्रवर्योऽयं विद्यासागरमतं नैव खण्डयतीति विभावनीयम्।

"तदात्मगुणसद्भावादप्रतिषेधः" इति ३।१।१४। तमसूत्रवृत्ताविहोद्धृतस्तरणिमिश्रस्तु रत्नकोषकार इत्यधुना गुरुचरणैः प्रा० श्रीअनन्तलालठाक्कुर-महानुभावैः सयुक्तिकं प्रतिपादितम्[2]।

सानातनिस्तु उदयनाचार्येण परिशुद्धौ प्रौढगौडनैयायिकरूपेणोल्लिखितः वाचस्पतेः समसामयिकः शङ्करमिश्रेण वादिविनोदे समुद्धृतः प्रतिष्ठितनैयायिक आसीदिति तथैवात्राप्युल्लिखितः ५।१।३७ तमसूत्रवृत्तौ—"सानातनिस्तु प्रयत्नकार्यानेकत्वादित्यनेन दृष्टान्तानेकत्वमुक्तम्। तथा च साध्यत्वेनैव हेतुना दृष्टान्तान्तरेणानिष्टापादनं कार्यसम" इति।

(८) उपसंहारः

एवं प्रत्यक्षलक्षणसूत्रव्याख्यायामन्यत्र च बहुषु स्थलेषु वृत्तिकृतोऽस्य तात्पर्य-टीकाकृतोऽनुगामित्वं सुस्पष्टं परिलक्ष्यते। नान्यथा तत्र सविकल्पक-निर्विकल्पक-प्रत्यक्षयोस्तात्पर्य-टीकानुसारमुल्लेखः चक्षुरद्वैतनिराकरणप्रकरणविचारो वा संगच्छेते। ईश्वरसिद्धिप्रकरणमपि वाचस्पतिव्याख्यानुगामिनीमेव वृत्तिं कलयतीति प्रदर्शितपूर्वम्। आलोचनात्मिकायां टिप्पण्यां प्रदर्शितं यदयं वृत्तिकृत् केशवमिश्रः

---

१. द्रष्टव्यम्—बड़ोदा प्राच्यविद्यानुसंधानशोधपत्रम् १९७६ ई० द्वितीयोऽङ्कः।

२. द्रष्टव्यम्—कविशेखरपुष्पाञ्जलिः पृ० ४०९-१६, (दरभंगातः प्रकाशितम्)

भाष्यवार्तिकतात्पर्यटीकापरिशुद्धिस्वरूपां न्यायचतुर्ग्रन्थिकां वर्द्धमानोपाध्यायस्य न्यायनिबन्धप्रकाशं पञ्चमाध्याये तु शङ्करमिश्रस्य वादिविनोदञ्चाश्रित्य सारं संगृह्णाति स्वकीयेऽत्र प्रकाशे। यद्यपि केशवमिश्रः द्वितीयाध्यायद्वितीयाह्निके अष्टाधिकषष्टिसूत्राण्येव स्वीकरोति निबन्धे चैकोनसप्ततिसूत्राणि दृश्यन्ते। तथापि किं सूत्रं मिश्रवर्येणानङ्गीकृतमिति निश्चेतुं कश्चिदप्याधारः प्रमाणं वा किमपि नास्त्यस्मादृशां सविधे। अतएवात्र परिशिष्टे निबन्धधृतपाठ एवानुसृतः। नात्र विस्मरणीयं पुनः निर्वाणमहार्णवस्य तर्कताण्डवस्य वा स्वकीयग्रन्थस्य समुल्लेखः। यत्रानेन न्यायमतवादाः सविस्तरमालोचिता इति। परमस्माकं दौर्भाग्यं यदद्यावधि नायं ग्रन्थः मातृकागारेष्वपि क्वचिद् दृष्टिगोचरोऽभूदिति, विद्वद्भिरत्र प्रयत्नः कर्तव्यः। एवञ्च "पूर्वप्रतिष्ठापित योजनासु मूलप्रतिष्ठाफलमामनन्ति" इति रीत्या पूर्वाचार्यप्रणीतान् ग्रन्थान् सम्यगधीत्य तेभ्यश्च नवनीतभूतं सारं संगृह्य "नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते" इति मल्लिनाथदर्शितदिशा वृत्तिं विदधता केशवमिश्रेणेह पाण्डित्यं प्रदर्शितम्। आलोचनात्मिका टिप्पण्यपि द्वितीये परिशिष्टे संकलिता। यत्र न केवलं पूर्वाचार्यप्रणीतग्रन्थानां पंक्तिसाम्यं भावसाम्यं वा प्रदर्शितमपि नु सूत्रालोचनप्रसंगपतितसूत्राणां ग्राह्याग्राह्यत्वविषये पूर्वाचार्याभिप्रायोऽपि सप्रमाणं प्रदर्शितोऽस्ति। न्यायसूत्राणां वर्णानुक्रमसूची च तृतीये परिशिष्टे सन्निवेशिता। चतुर्थे परिशिष्टे वृत्ताविहोल्लिखितानामाचार्याणां सम्प्रदायानां ग्रन्थानां च सूची समाविष्टा विद्यते। पञ्चमे परिशिष्टे वृत्तिगतानां विशिष्टशब्दानां चास्ति सूची। एतैश्च परिशिष्टैः न्यायशास्त्ररसिकाः पाठकाः गवेषकाश्च मन्ये लाभान्विता भवेयुरिति।

(९) कृतज्ञताज्ञापनम्।

सत्यामप्यवधानतायां प्रमादान् कुर्वन्त्येव मादृशा मानवसुलभदोषसंपन्नाः। नवीनवाचस्पतिवचः "को न मुह्यति वचःपथे चरन्" इति संस्मृत्यैव शास्त्रप्रचारबुद्ध्या सम्पादनेऽत्र प्रवृत्तिः। अतएव प्रार्थये विदुषः न्यायशास्त्रप्रियान् प्रमादजातमपाकृत्य "गुणगृह्या वचने विपश्चितः" भवेयुरिति।

सन्तीदानीं संस्मरणीयाः दरभंगासंस्कृतविश्वविद्यालयस्य कुलपतयः डा० रामकरणशर्ममहाशयाः तत्रत्यपुस्तकालयाध्यक्षाः श्री जागेश्वर महतो प० श्री जीवानन्दठक्कुरशर्माणः। एतेषामौदार्येण मातृका सुलभाऽभवदेतं जनं प्रति। सम्पादनावसरे विविधविधमनुकूलं परामर्शादिकं कुर्वन्तः पितृचरणाः पण्डितश्री कृष्णमाधवझामहाशयाः गुरुचरणा अनन्तलालठक्कुरदेवशर्माणश्च। एतैर्महाशयैः परिशुद्धिग्रन्थस्याप्रकाशितोंऽशः यथावसरं प्रदत्तः। येनात्र सुमहानुपकारः सञ्जातः। प्रकाशनायास्य तत्पराः विद्यापीठस्यास्य तात्कालिककार्यकारिप्राचार्याः डा०

हरिहरझाशर्माणः यथारुचिप्रकाशनाय दत्तानुमतयः कल्याणमित्राणि आचार्याः डा० गयाचरणत्रिपाठिवर्याश्च । एतेषामाभारमावहन्नेषजनस्तान् प्रति हार्दिकीं कृतवेदितां निवेदयति ।

प्रयागस्थनागरीप्रेसाधिकारिणः श्री सरयूप्रसादपाण्डेयमहोदयाः धन्यवादार्हाः । एते हि मुद्रणसंबन्धिकार्यजातं सुचारुतया धैर्येण च सम्पाद्य कृतकार्यमकुर्वन् एतं जनमिति ।

विदुषामाश्रवः
किशोरनाथ झा
व्याख्याता
गंगानाथझा केन्द्रीय संस्कृत विद्यापीठ,
इलाहाबाद

बुद्धपूर्णिमा, वि० स० २०३५

केशवमिश्रप्रणीतः

गौतमीयसूत्रप्रकाशः

ओं नमः शिवाय ।

राधापीनपयोधरभूधरधाराधरः कृष्णः ।
शेषफणावलिकोमलकमलवनीषट्पदः पायात् ॥
प्राणान् कृशोदरीणां राधानयनान्तसर्वस्वम् ।
तेजस्तमालनीलं शरणागतवज्रपञ्जरं वन्दे ॥
पारसर्षाणि सूत्राणि व्याचिख्यासोर्ममाधुना ।
एक एव जगन्नाथः सहायीभवनक्षमः ॥
इह न्यायारण्ये प्रकृतिगहने तर्कसरणि-
प्रवीणा विद्वांसः कति कति न पूर्वं समभवन् ।
परं पञ्चाध्यायीपरिणतरहस्यप्रणयिणो
विरोधव्यासेधव्यसनपटवः केचन पुनः ॥
आस्ते यद्यपि पूर्वपण्डितकृता व्याख्यैव संख्यावताम्—
आनन्दाय तथापि केशवकवेर्वाचामियं गुम्फना ।
व्याख्यासौष्ठवशब्दलाघवमिथः संबन्धपूर्वापर—
प्रत्यर्थप्रतिबद्धनिर्मलगुणा कुत्रान्यतो लभ्यताम् ॥

[प्रयोजनाभिधेयसम्बन्धप्रकरणम् २।१।]

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्प-वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः । १।१।१।

मोक्षानुकूलतत्त्वज्ञानार्थाः शास्त्रवक्तव्याः । तेषां लक्षणमाद्ये सपरिकरं न्याय-लक्षणं चाद्ये ।

अथ परमकारुणिको भगवान् गौतमो महर्षिः संसाराङ्गारेषु पच्यमानान् समुद्दिधीर्षुः सकलविद्याशिरोरत्नभूतामान्वीक्षिकीं प्रणीतवान् । तत्र प्रतिपाद्यतत्प्रयो-जनतत्सम्बन्धप्रतिपादनं विना न प्रेक्षावत्प्रवृत्तिरिति तत्त्रितयप्रतिपादनार्थमाद्यं सूत्रम्—"प्रमाण···साधिगमः" ।

तत्र तत्त्वं ज्ञायतेऽनेनेति व्युत्पत्त्या शास्त्रस्य निःश्रेयसे कर्तव्ये तत्त्वज्ञानस्य व्यापारवत्त्वे दर्शिते व्यापारव्यापारिणोः कार्यकारणभावः, व्यापारवता शास्त्रेण

व्यापारविषयस्य प्रमाणादेः प्रतिपाद्यप्रतिपादकभावः, व्यापारविषयेण प्रमाणादिना व्यापारस्य तत्त्वज्ञानस्य विषयविषयिभावः, व्यपारेण तत्त्वज्ञानेन व्यापारफलस्य निःश्रेयसस्य कार्यकारणभावः, व्यापारविषयफलयोर्हेतुहेतुमद्भावः सूचितः, नान्तरीयकत्वात्। नहि अतद्धेतुस्तद्व्यापारो नाप्यतत्कर्मं तद्व्यापारविषयो नाप्यतद्व्यापारविषयस्तत्कर्म नाप्यतद्फलजनकस्तद्व्यापारविषयः। न च प्रमाणादीनामानन्त्यात् अशक्यज्ञानत्वम्, प्रमाणत्वादिना संगृहीतादीनां शक्यज्ञानत्वात्।

नन्वेवमपि प्रमाणादितत्त्वज्ञानजन्यप्रयोजनप्रतिज्ञानवत् प्रमाणादीनां शास्त्राभिधेयत्वेन अप्रतिज्ञानात्, न तानि शास्त्राभिधेयानि, ततो न तद्द्वारा शास्त्रस्य निःश्रेयसेन संङ्गतिः [इति चेत्] ? न, शिष्याकाङ्क्षाक्रमेण शास्त्रप्रवृत्तेः[1]। ते च निःश्रेयसार्थिनः कुतो न[2] लभ्यत इति जिज्ञासते। ननु[3] किं वक्ष्यतीति तत्राद्यसूत्रेणोत्तरम्। कथमित्यपेक्षायां च द्वितीयं सूत्रम्। ततः के कति किं लक्षणाः प्रमाणादय इति। तत्रोद्देशविभागलक्षणानीति। ततः कथमित्यपेक्षायां द्वितीयाध्यायादि।

अत्रापवर्गानुकूलतत्त्वज्ञानविषयाः पदार्थाः शास्त्रप्रतिपाद्याः। तल्लक्षणं प्रथमाध्यायार्थः। तत्र सपरिकरन्यायलक्षणं प्रथमाह्निकार्थः। प्रयोजनाभि[धेय]सम्बन्धप्रतिपादनैकार्थतया प्रथमद्वितीयसूत्राभ्यामेकं प्रकरणम्। एवं प्रमाणप्रकरणम्, प्रमेयप्रकरणम्, न्यायपूर्वाङ्गप्रकरण, न्यायाश्रयप्रकरणम्, न्यायस्वरूपप्रकरणम्, न्यायोत्तराङ्गप्रकरणम्।

अत्र निर्देश सर्वपदार्थप्रधानो द्वन्द्वसमासः। यदेवाग्रे तन्निर्देशे वचनभेदोपादान[ने] प्रयोजनं तदेवात्रापि द्रष्टव्यम्। तथाहि प्रमाणानि च प्रमेयं च संशयाश्च प्रयोजनं च दृष्टान्तौ च सिद्धान्ताश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलानि च जातयश्च निग्रहस्थानानि चेत्येवं तत्र तत्र च वक्ष्यामः। अत्र प्रमाणादीनां तत्त्वमित्यन्वयः। तत्त्वस्य नित्यसापेक्षत्वात् नासमर्थसमासः। न चाधिगमपदाधिक्यं ? निःश्रेयसे सति पटादिवत् न तत् प्राप्त्यर्थं यत्नान्तरापेक्षेति तात्पर्यकत्वात्। न चाद्यसूत्रात् [प्रयोजन ज्ञानं ?] प्रयोजनज्ञाने सति प्रवृत्तिरित्यन्योन्याश्रयः गर्जितादिवत् [?] श्रुतात् प्रथमसूत्रात् सर्वोपपत्तेरिति। यो यद्धर्मः स तस्य तत्त्वम्, न च तत् प्रमाणाद्यभिन्नमेव कथं भेदगर्भा षष्ठी ? उपाधिभेदावधारणाय षष्ठ्याः साधुत्वात्।

सम्बन्धमात्रे षष्ठी, स च प्रमेयादावभेदेऽपि इति कश्चित्। ननु अभावा अपि निःश्रेयसोपयोगिनः किं नोद्दिष्टाः ? उद्दिष्टा एव। एषां कस्यचिदभावत्वादिति दिक्।

ननु संशयादीनां प्रमाणप्रमेययोर्यथायथमन्तर्भावात् पृथगुद्देशो व्यर्थः ? मैवं मननद्वारा हि आन्वीक्षिक्याः निःश्रेयसोपयोगः। स च न कथमेतदित्यश्रद्धामल-

---

१—शास्त्रवृत्तेः क ग। २—न नास्ति ग पुस्तके। ३—न तु ग।

क्षालनं बिना । तच्च न संशयाद्युपकरणं न्यायानुसन्धानं विनेति तेन तेन रूपेण संशयादिप्रतिपादनात् ।

ननु संशयः कथं न्यायाङ्गम् ? उच्यते संशयस्यानुमितिमात्राहेतुत्वेऽपि जिज्ञासितार्थानुमितौ जिज्ञासाद्वारा हेतुत्वम् । एकवक्तृकविचाराङ्गमित्यन्ये । सङ्कसूकता निवृत्तये न्यायोपासनाङ्गमित्येके ।

ननु करणव्युत्पत्त्या तत्त्वज्ञानपदेन शास्त्रं वदसि । किं तत् ? आकर्णय यदि शुश्रूषुरसि । सङ्केतवद्वर्ण[घटित]त्वं पदत्वम् । एकार्थावच्छिन्नपदसमूहो वाक्यम् । तदेवाल्पाक्षरादिविशेषितं सूत्रम् । यदाहुः—

अल्पाक्षरमसन्दिग्धं सारवद् विश्वतो मुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥

[विष्णुधर्मोत्तरपुराणम् ।३।५।१।]

अस्तोभमनधिकम् । एवमेकार्थावच्छिन्नसूत्रसमूहः प्रकरणम् । एवमेव प्रकरणसमूह आह्निकम् । तादृशस्तत्समूहोऽध्यायः । पञ्चाध्यायी शास्त्रमिति दिक् ।

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः । १।१।२।

तदेवं सूत्रकृताद्यसूत्रेण प्रयोजनाभिसंबन्धोद्देशप्रदर्शनेऽप्यनवधृततदाप्तभावानामविश्वासात् न लक्षणादिप्रवृत्तिरिति तत् परीहारार्थं द्वितीयं सूत्रम्—"दुःखजन्म··· दपवर्गः" इति ।

अत्र तत्त्वज्ञानं मोक्षो वा विषयः । तत्त्वज्ञानं मोक्षसाधनं न वा, मोक्षो वा तत्त्वज्ञानकार्यो न वा इति संशयः । प्रयोजनाभिधानस्य सम्यक्त्वासम्यक्त्वदर्शनात् तत्सहचरितत्वं संशायकं, प्रवृत्तिः फलम् । पूर्वपक्षस्तु न तत्त्वज्ञानसाध्योऽपवर्गः । स हि न साक्षात्, ज्ञानस्य चिरनष्टत्वात् । न परम्परया अपेक्षणीयैरेवान्यथासिद्धेः । किं च न मिथ्याज्ञाननिवृत्तिद्वारम् । निवृत्तेः प्रागभावस्यासाध्यत्वात् । ध्वंसस्य विरोधिगुणमात्रसाध्यत्वात् ।

सिद्धान्तस्तु अपवर्गो द्वेधा परापरभेदात् । तत्राद्यस्तत्त्वज्ञानेन साक्षात् । परम्परया शास्त्रस्य तत्रोपयोगः । चतस्रो हि प्रतिपत्तय आत्मादौ मोक्षफलाः । तत्र प्रथमा वेदवाक्येभ्यस्तदर्थावगमलक्षणा । द्वितीया न्यायैः श्रुत्यर्थावधारणफला सैवोच्यते मननमिति । आन्वीक्षिकी च साक्षात् तद्धेतुः । न चैतदुभयवतोऽपि संसारकन्दसाक्षात्कारिमिथ्याज्ञाननिवृत्तिः दिङ्मोहवतः किन्तु दीर्घकालाद[र ?]नैरन्तर्यसेवितयमनियमाद्यङ्गकनिदिध्यासनात्मकतृतीयप्रतिपत्तिसाध्याः साक्षात्काराः । चतुर्थप्रतिपत्तेः सवासनमिथ्याज्ञाननिवृत्तिः । मिथ्याज्ञानप्रागभावासहवृत्तितद्ध्वंसस्य तदेकसाध्यत्वात् । ततश्च हीनक्लेशो जीवन्नेव मुक्त इत्युच्यते ।

एवं च बीजक्लेशा [क्लेशबीजा] भावेऽप्यनागतधर्माधर्मयोरनुत्पत्ती व्युत्पन्नयोश्च तयोर्भोगात् प्रक्षयादात्यन्तिकोपरमः परमोऽपवर्गः ।

एवमात्मनि मिथ्याज्ञानं नास्त्यात्मेति । अनात्मनि शरीरादावहमिति मिथ्याधीः, सा च तत्त्वज्ञानेन विरोधिना निवर्त्यते । ततो मिथ्याज्ञानमूलकदोषनाशः, ततस्तन्मूलकप्रवृत्तिनाशः, ततस्तन्मूलकजन्मनाशः ततस्तन्मूलकदुःखोच्छेदः । कारणाभावे कार्याभावस्य न्यायप्राप्तत्वादित्यन्यत्र विस्तरः ।१।१।२।

[प्रमाणप्रकरणम् ५।२]

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ।१।१।३।

एवं प्रयोजनाभिधेयसंबन्धेऽवधृतेऽपि न तावन्मात्रादुद्देश्यप्रमाणादितत्त्वज्ञानमपि तु उद्देश्यलक्षणपरीक्षात्मकशास्त्रप्रवृत्तेरिति प्रमाणप्रकरणम् । तथा हि परीक्षासाध्यं[1] तत्त्वज्ञानं सा लक्षणाधीना तच्चोद्देशसाध्यम् । तत्र लक्षणद्वारिविषयकलक्षणाभिधानानुकूलजिज्ञासाजनकपदार्थाभिधानमुद्देशः । सजातीयविजातीयव्यावृत्तो धर्मः लक्षणम् । तदनुपपत्तिनिराकरणं परीक्षा ।

तत्राद्यसूत्रेणार्थादुद्दिष्टप्रमाणस्य कानि कियन्ति वेति जिज्ञासायां क्रमसङ्गत्या वक्तव्यविशेषलक्षणानुकूलजिज्ञासाप्रयोजकधर्म्युपस्थितिजनकं विभागोद्देशसूत्रम्— "प्रत्यक्षा···प्रमाणानि" इति ।

अत्रार्थात्सामान्यलक्षणलाभः, तद्विना विभागजनकजिज्ञासानुदयात् । तच्च प्रमितिकरणं प्रमाणम् । तद्वति तत्प्रकारकं ज्ञानं प्रमितिः । करणत्वं च चरमव्यापारशालित्वम् । तच्च व्यापाराजनकव्यापारशालित्वम्, अनन्तरफलत्वं वा । सव्यापारं कारणं करणमित्यपरे । एतानि चत्वारि प्रमाणानि समनन्तरमेव लक्षणीयानि परीक्षणीयानि चेति । यथा चेतत् सर्वमुपपद्यते तथा तत्र तत्र वक्ष्याम इति दिक् ।१।१।३।

[प्रत्यक्षप्रमाणलक्षणम्]

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ।१।१।४।

प्रमाणसामान्यनिरूप्यत्वात् तद्विशेषस्य, ज्ञातसामान्यस्य तद्विशेषे जिज्ञासोदयाच्चाक्षिप्तसामान्यलक्षणानन्तरमनुयोग्यवृत्तिधर्मेण भेद[2]प्रतियोग्युपस्थितावेव विशेषलक्षणजन्यभेदप्रतीतेः । तदुपस्थापकविभागानन्तरं विशेषलक्षणात् ।

तत्रापि प्राधान्यादादौ प्रत्यक्षलक्षणाय सूत्रम्—"इन्द्रियार्थ···प्रत्यक्षम्" ।

अत्र इन्द्रियार्थसन्निकर्षोत्पन्नज्ञानत्वेनैकार्थवृत्तित्वसंबन्धात् साक्षात्कारित्वं जातिरुपलक्ष्यते । चाक्षुषादिबुद्धौ साक्षात् करोमीति अनुगतानुव्यवसायात् । न च व्यञ्जकाभावः, चक्षुर्जन्यत्वादेरेव तत्त्वात् । एतेन यथाश्रुतलक्षणे करणविशेषप्रत्यक्ष-

---

१—साध्यं साक्षात् तत्त्वज्ञानं घ । २—भेद इति० प्रति० ग ।

सामानाधिकरण्यानुपपत्त्या यत इत्याध्याहारात् करणस्यैव लक्षणादीश्वरप्रत्यक्षाव्याप्तिपरीहारेऽपि ज्ञानमात्रकरणेऽतिव्याप्तिः । मनस[1] इन्द्रियत्वादात्मनोऽर्थत्वात् ।

तत्रात्मनोऽनर्थ्यमाणतया अर्थत्वाभावेऽपि आत्मस्मृत्यनुमितिकरणयोरतिव्याप्तिः । अन्यतरवैयर्थ्यान्योन्याश्रयसन्निकर्षदुर्वचत्वादीनि दूषणानि अलग्नकानि भवन्ति । यद्वा योगजाद्यजन्यजन्यप्रत्यक्षस्य फलस्यार्थजन्यत्वम् जन्यप्रत्यक्षस्य चेन्द्रियजन्यज्ञानत्वं लक्षणम् । तदपीन्द्रियत्वेन विशेषणीयमतो नातिप्रसङ्गः । इन्द्रियत्वं च स्मृत्यजनकज्ञानकारणमनःसंयोगाश्रयत्वमिति नान्योन्याश्रयः ।

इह प्रत्यक्षलक्षणे निर्विकल्पकसविकल्पकविशेषद्वयसंग्रहेऽपि पदाभ्यां तदुभयोपादानं विप्रतिपत्तिनिरासाय तदुभयलक्षणकरणाय च । तत्र निर्विकल्पकस्य लक्षणमव्यपदेश्यमिति । व्यपदिश्यते व्यवच्छिद्यत अनेनेति व्यापदेशो विशेषणमुपलक्षणं च । तत्कर्म व्यपदेश्यं विशेष्यम्, तच्छून्यमव्यपदेश्यम् । तेन जात्यादिस्वरूपावगाहि न तु[2] वैशिष्ट्यावगाहीति । सविकल्पकस्य लक्षणं व्यवसायात्मकमिति । विशिष्टोऽवसायो ज्ञानं[3] सत् आत्मा[4] स्वरूपं यस्य तत् सविकल्पकम्, विशिष्टविषयकमित्यर्थः । अव्यभिचारिपदेन विपर्ययादयो वार्यन्ते । प्रमाया एवात्र लक्ष्यत्वात् ।

यद्यपि सामान्यलक्षणादेव प्रमात्वलाभस्तथापि प्रत्यक्षफलाव्यभिचारेणैव अव्यभिचारज्ञानं, मानान्तरे तु आप्तज्ञानं सत्परामर्शत्वदिनापि प्रागपि तथात्वग्रहे तदुपादानम् ।

यद्वा मूलप्रत्यक्षाव्यभिचारेऽनुमानादीनामपि तथात्वमिति विभावयितुमिदमिति ।१।१।४।

[अनुमानलक्षणम्]

अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टं च ।१।१।५।

अथोद्देशक्रमानुसारादनुमानलक्षणाय सूत्रम्—"अथ तत्पूर्वकं त्रिविधम्··· दृष्टं च" । अथेति हेतुहेतुमद्भावप्रतिपादनार्थम् । नन्वथेति सूत्रबहिर्भूतम् ? भाष्यवार्तिकटीकाविरोधात् । अनुमानमिति लक्ष्यनिर्देशः । तत्पूर्वकमिति लक्षणम्[5] । त्रिविधमिति विभागः, शेषं विशेषलक्षणम् । तत्र योग्यतया तत्तल्लक्ष्योपस्थितिः, नत्वावृत्त्या । योग्यत्वस्य अवश्यापेक्षणीयतया तत एव तदुपस्थितेः । अत्र तच्छब्देन प्रत्यक्षपरामर्शे यद्यपि स्मृतिशाब्दादावतिव्याप्तिः, अनुमानादिपूर्वकानुमाने चाव्याप्तिः ।

१—मनस इन्द्रियत्वात् ग पुस्तके नास्ति । २—तद्वैशिष्टया० ग । ३—निश्चयः ग । ४—स एव स्वरूपं यस्य ग । ५—सामान्यलक्षणम् ग ।

तथापि तानि ते तदिति विग्रहत्रयं कृत्वैकशेषः। तत्र प्रथमे विग्रहे विभागसूत्रं[1] तु प्रत्यक्षादीनां योग्यत्वात्, परामर्शो नाव्याप्तिः। ते इति विग्रहेऽनन्तरसूत्रं[2] तु प्रत्यक्षमात्रपरामर्शेऽपि योग्यतया लिङ्गलिङ्गिनोः व्याप्तिग्रहरूपम् आद्यं प्रत्यक्षम्, पक्षवृत्तिलिङ्गदर्शनं च द्वितीयमिह संबध्यते अतो नातिव्याप्ति। तेन लिङ्गदर्शनपूर्वकः व्याप्तिविशिष्टपक्षधर्मताविषयकः तृतीयो लिङ्गपरामर्शोऽनुमानम्। क्रियायोगव्यवच्छिन्नस्य करणत्वात् वस्तुतो व्याप्तिस्मृतिः करणं, तृतीयलिङ्गपरामर्शो व्यापारः, अनुमितिः फलम्।

यद्वा योग्योपस्थितमनुमितिकरणमनुमानम्। अनुमितित्वं च जातिः प्रत्यक्षसाक्षिणी[3]। त्रिविधमिति केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकि चेत्यर्थः। तत्पूर्वकमिति अनुमानं लक्षयित्वा त्रिविधमित्यन्वय्यादिना विभागं च दर्शयित्वा लिङ्गस्य गमकतौपयिकरूप[4] संपत्तिमाह—पूर्ववदित्यादि। कथासु साध्यस्य सिषाधयिषितधर्मविशिष्टस्य पूर्वमुपादानात् पूर्वं साध्यं तद् यस्यास्त्यधिकरणतया तत्पूर्ववत्, अतिशायने मतुप्, अतिशयश्च पक्षव्यापकत्वं, तेन भागासिद्धिनिरासः। साध्यस्योपयुक्तत्वात्। तदपेक्षया सपक्षः शेषः तद्वत्। तद्वृत्तिपक्षधर्मसपक्षधर्मराहित्येन पक्षसपक्षयोः सामान्यः साधारणो विपक्षः। तत्रादृष्टमसत् सप्तम्यास्तसिः[5] विपक्षाव्यावृत्तमित्यर्थः। एवं पक्षव्यापकं सपक्षसदिति केवलान्वयिनः, पक्षव्यापकं विपक्षासदिति केवलव्यतिरेकिणः, त्रितयवदित्यन्वयव्यतिरेकिणः लक्षणमुक्तं भवति। सौत्रचकारादबाधितासत्प्रतिपक्षितत्वे इति पञ्चरूपसंपत्तिश्चतूरूपसंपत्तिश्चोक्त्वा [क्ता]

अथवा त्रैविध्यमेव प्रदर्शयति[6]—कार्येति। पूर्वं कारणं तद् यस्य परामर्शविषयतयास्ति तत्पूर्ववदिति करणेन [कारणेन] कार्यानुमानम्। यथाऽन्त्यतन्तुसंयोगेन पटोत्पत्त्यनुमानम्। शेषं कार्यं तद्वत् कार्येण कारणानुमानम्। यथा नदीपूरविशेषेण[7] वृष्ट्यनुमानम्। स्वेनैव धृतं च सामान्यतो दृष्टम्, अविनाभावः सामान्यं तेन दृष्टं यथा रसेन रूपानुमानमिति।

अथवा पूर्ववदित्यत्र वतिः व्याप्तिज्ञानानुमितिक्रिययोस्तुल्यत्वात्। तथा च स्वातन्त्र्येण व्याप्तिग्राहकप्रमाणविषयत्वयोग्यस्यार्थस्य वह्न्यादेः धूमादिनानुमानं पूर्ववत्। परिशेषः शेषवत्। अन्यत् सामान्यतो दृष्टम्। तच्चानुमानं बहुप्रकारकमित्यन्यत्र विस्तरः ।१।१।५।

[उपमानलक्षणम्]

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ।१।१।६।

अथोद्देशक्रमानुरोधादुपमानलक्षणाय सूत्रम्—"प्रसिद्ध…मुपमानम्" इति। प्रसिद्धं साधर्म्यं यस्मादतिदेशवाक्यादेः गवा सह यस्य, प्रसिद्धेन वा गवा साधर्म्यं यस्य

१—विभागसूत्रस्थप्रत्यक्षादीनां ग०घ०। २—सूत्रस्थ ग०घ०। ३—प्रत्यक्षसामग्री ग। ४—कं रूपमाह ग। ५—सप्तम्यन्तात्तसिः ग। ६—प्रदर्शयते कार्यात् ग। ७—०णाति वृष्ट्यनुमानम् ग।

गवयस्य। तस्मात् साध्यस्य संज्ञासंज्ञिसम्बन्धस्य साधनं सिद्धिर्यत इत्यध्याहारादन्वयः। साधर्म्यप्रसिद्धिर्यथा गौस्तथा गवय इति अस्मादाप्तवाक्यादारभ्य प्रत्यक्षपर्यन्तेन। यद्वा साध्यतेऽनेनेति साधनमुपमितिकरणम्, प्रसिद्धसाधर्म्यादिति च सविशेषणे हीति न्यायात् साधर्म्यसिद्धिपर्यवसितम्। तेन साधर्म्यप्रसिद्ध्या व्यापारभूतया साध्यमुपमितिरूतं साध्यते येन तत्प्रतियोगिज्ञानादिकमुपमानम्। तथा च सादृश्यसम्बन्धिज्ञानं कारणं। सादृश्यज्ञानं तद्व्यापारः। अथवा सादृश्यानुभवः करणं तत्स्मृतिर्व्यापारः। उपमितिः फलम्।

यद्यप्येवं प्रसिद्धसाधर्म्यमुपमानमित्येव लघुलक्षणं तथापि मानप्राकरणिकत्वादुपमानाभासनिराकरणाय साध्यसाधनपदोपादानम्।

अपरे तु साध्यस्य संज्ञासंज्ञिसम्बन्धपरिच्छेदस्य साधनं करणमुपमानम्। तदसाधारण्यमाह प्रसिद्धसाधर्म्यादिति। प्रसिद्धं साधर्म्यं यस्माद् वाक्यादेस्ततस्तेन साधर्म्यज्ञानं तथायमिति पिण्डप्रत्यभिज्ञानव्यापारमुपमानमित्याहुः।

यद्वा उपमितिकरणमुपमानम्, उपमितित्वं च जातिविशेषः। न च तदसिद्धिः, सामग्रीविशेषात् कार्यवैजात्यमावश्यकमिति कारणविशेषव्यङ्ग्यत्वात् गवयत्वं पुरस्कृत्य गवयपदमत्र प्रवर्तते इति धीरुपमितिः। वैधर्म्योपमितावप्येवमिति संक्षेपः। १।१।६।

[शब्दलक्षणम्]

आप्तोपदेशः शब्दः ।२।१।७।

उद्देशक्रमानुसाराच्छब्दलक्षणाय सूत्रम्—"आप्तोपदेशः शब्दः" इति। अत्र शब्द इति लक्ष्यनिर्देशः, शेषं लक्षणम्। आप्तो यथार्थज्ञानवान् अविप्रलिप्सुः यथादृष्टार्थचिख्यापयिषुः स्थानकरणपाटववांश्च तस्योपदेशः। उपदिश्यते अनेनेत्युपदेशः शब्दप्रयोगः। तेन शब्दप्रयोगहेतुवाक्यार्थतत्त्वज्ञानजन्यः, आकाङ्क्षायोग्यतासत्तिमान् वा शब्दः प्रमाणम्। न च वेद ईश्वरस्य शरीरं विना स्थानकरणासंभवः, शरीरजन्यकार्यजननाय तस्य शरीरोपगमात्। यद्यपि न तत्र शरीरलक्षणं तदवच्छेदेन प्रयत्नानुत्पत्त्या चेष्टाश्रयत्वाभावात्। ईश्वरस्य अदृष्टाभावेन भोगानाश्रयत्वात्। कार्यज्ञानाभावेनानिन्द्रियाश्रयत्वात्। तथापि भूतावेशन्यायेन अन्यदीयं शरीरमधिष्ठाय शरीरजन्यं कार्यमीश्वरः करोतीत्युपगमात्।

इह केचित् समयबलेन सम्यक्परोक्षानुभवसाधनं शब्दः, तत्राद्येन पदेनानुमानम्, द्वितीयेन शब्दाभासः, तृतीयेन नामविशिष्टनामिप्रत्यक्षम्,[1] चतुर्थेन पदार्थ-[पदानुस्म] स्मरणम्, पञ्चमेन कर्त्रादि निरस्यत इत्याहुः।

स चायं द्विविधः दृष्टादृष्टार्थभेदात्। अस्मदादिप्रत्यक्षतदन्यार्थप्रतिपादकत्वात्। वेदतदन्यत्वाद्वेति प्रपञ्चितं मयैव निर्वाणमहार्णवे[2] ।१।१।७।

१—नात्मविशिष्टप्रत्यक्षं ग। २—तर्कताण्डवे ग।

[प्रमेयलक्षणप्रकरणम् १४।३]

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ।१।१।८।

सर्वेषां प्रमाणाधीनप्रवृत्तिकत्वात् आत्मादिलक्षणे अहमित्यादिप्रत्यक्षादीनां लक्ष्योपस्थापकत्वात् अहमित्यादिप्रत्यक्षविषयत्वेन क्वचित् आत्मादिलक्षणावच्छेदकत्वेन प्रत्यक्षादीनामुपयोगाच्च प्रमाणप्रकरणानन्तरं प्रमेयलक्षणप्रकरणम् ।

तत्राक्षिप्तसामान्यलक्षणविशेषलक्षणानां लक्ष्योपस्थितिं विनाऽनवतारात् इयत्तानवधारणेऽनध्यवसायात् तत्राप्रवृत्तेः । प्रतियोग्यवृत्तिधर्मेण अनुयोग्युपस्थितिं विना विशेषलक्षणाधीनभेदप्रतीत्यभावाच्च, तदुपस्थापकं विभागोद्देशसूत्रम्— "आत्म···प्रमेयम्" इति । अत्र सर्वपदार्थप्रधानो द्वन्द्वः । आत्मादयस्तु सम्बन्धा[1] अपि प्रसिद्धा इति नोद्देशरूपासिद्धिः । तु शब्दोऽनभिमतव्यवच्छेदेन विभागद्योतनाय । प्रमेयमित्येकवचनं तु समुदिते प्रमेयत्वमन्यतमस्याप्यज्ञानेनानपवर्गादिति बोधयितुम् । प्रमेयसामान्यलक्षणं तु अपवर्गकारणतत्त्वज्ञानविषयतावच्छेदकरूपवत्त्वम् । इयद्भिरेव प्रकारैरात्मादितत्त्वज्ञानस्य मोक्षहेतुत्वादिति ।१।१।८।

[आत्मलक्षणम्]

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् ।१।१।९।

अपवर्गस्यात्मार्थतया प्रमेयेषु आत्मनः प्राधान्यादादौ तल्लक्षणाय सूत्रम्— "इच्छाद्वेष···लिङ्गम्" इति । लिङ्गमिह लक्षणम् । स चात्मा संसारी तदन्यश्चेत्यर्थो विभागः । तत्रात्ममात्रलक्षणमिच्छाज्ञानप्रयत्नाः । संसारिणां तु प्रत्येकं षडपि । लक्ष्योपस्थितिरहमित्याद्यध्यक्षादिच्छाद्याश्रयत्वाद्वा ।

यद्वा यद्यप्यहं जानामीति अनुभवसिद्ध एवात्मा । तथापि गौरोऽहमित्यादिप्रत्ययात् शरीरविषयक एवायं स्यादिति । तन्न तावन्न प्रमाणयितुं शक्यते यावन्न देहादिभिन्न आत्मा सिद्ध्यतीति । असिध्द्युद्धाराय लिङ्गमित्युक्तम् । परात्माभिप्रायेण चासामान्येन तस्यापि प्रक्रमात् । इच्छादयः क्वचिदाश्रिताः कार्यत्वाद् गुणत्वाद् वा रूपवदिति तेषां लिङ्गता । प्रपञ्चस्तु तृतीयेऽध्याये ।१।१।९।

[शरीरलक्षणम्]

चेष्टेन्द्रियार्थाश्रयः शरीरम् ।१।१।१०।

अपवर्गस्याभावरूपतया प्रतियोग्यधीननिरूपणत्वाद् दुःखादपकर्षे तस्यापि हेत्वधीनतया तद्धेत्विन्द्रियादितोऽपकर्षात् तेषामपि नियतशरीरावच्छेदेन दुःखहेतुत्वात्

१—संमुग्धा ग० घ० [संमुग्धानाम्] ।

तस्य भोगावच्छेदकत्वात् गौरोऽहमित्यादिसंसारनिदानमिथ्याज्ञानगोचरत्वाच्च शरीरस्य प्राधान्यात्। तल्लक्षणाय सूत्रम् —"चेष्टे ·· शरीरम्" इति।

अत्र द्वन्द्वसमासाच्चेष्टाश्रयत्वादि लक्षणत्रयम्, आश्रयपदावृत्तेः। चेष्टा चानित्यप्रयत्नसाक्षाज्जन्या क्रिया विलक्षणैव वा। एवं च चेष्टासमानाधिकरणान्त्यावयविमात्रवृत्तिजातिमत्त्वं शरीरलक्षणम्। तादृशी जातिर्मनुष्यत्वादिः प्रसिद्धा। अतो न दारुयन्त्रहस्तादावतिव्याप्तिः। उत्पन्नविनष्टनिष्क्रिये मृतशरीरे पाषाणभेकादौ च नाव्याप्तिः। इन्द्रियाश्रयत्वं च इन्द्रियपाटवापाटवप्रयोजकोपचयोपघातवत्त्वम्। यद्वा इन्द्रियपदेनाधिष्ठानलक्षणया इन्द्रियाधिष्ठानसमवेतावयवित्वम्। अर्थः प्रयोजनं सुखादि। शरीरावच्छेदेन खल्वात्मनि भोगो जायते। तथा च भोगाधारतासमानाधिकरणान्त्यावयविमात्रवृत्तिजातिमत्त्वं लक्षणमिति।१।१।१०।

[इन्द्रियलक्षणम्]

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः।१।१।११।

भूत···नकप्रत्यक्षात्मेन्द्रियविशेषगुणाय सूत्रम्—"घ्राण··भूतेभ्यः" इति। सामान्यलक्षणं विना ··· लक्षणानवतारात् आक्षिप्तं सामान्यलक्षणम्। तच्च स्मृत्यजनकज्ञानकारणमनः··· ··श्रयत्वम्। बाह्यमाभ्यन्तरं चेति विभागोऽप्यार्थः। तत्राद्यस्य विशेषलक्षणानुकूलविभागोद्देशाय साक्षात्सूत्रमिदम्। तत्र घ्राणादिपदात् घ्राणत्वादिधर्मविशिष्टरूढात् तत्तल्लक्ष्योपस्थितौ जिघ्रत्यनेन इत्यादियोगात् तत्तत्स्वरूपोपस्थापकादेव वा त्वक्साधारणादुपस्थितानि गन्धोपलब्धिसाधनत्वादीनि विशेषलक्षणान्यार्थानि। इन्द्रियाणां प्रकृतिमाह—भूतेभ्य इति। यथाक्रमं पृथिव्यादिभ्यः। भूतप्रकृतित्वं च भूतस्वभावत्वं श्रोत्रसाधारणम्।१।१।११।

[भूतलक्षणम्]

पृथिव्यप्तेजोवायुराकाशमिति भूतानि।१।१।१२।

प्रसङ्गात् भूतलक्षणमाह—"पृथिव्यप्तेजो···भूतानि" इति। असमासेन स्वव्यवहारे मि··ोऽनपेक्षत्वम्। इति शब्देन चाधिक्यशङ्कानिराकरणं सूचितम्। पृथिवीत्वादिचतुष्कं शब्दसमवायित्वं च लक्षणानि। बहुवचनं तु सामान्यलक्षणसूचनाय। तच्च ज्ञानानाधारत्वे सति विशेषगुणवत्त्वमिति। यद्वा भूतान्याहेत्यवतारे सूत्रम्।१।१।१२।

[अर्थलक्षणम्]

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः।१।१।१३।

अर्थानामिन्द्रियनिरूप्यत्वात् बुद्धिनिरूपकत्वाच्च अनन्तरं तल्लक्षणाय सूत्रम्—"गन्ध···तदर्थाः" इति।

अत्रोद्देशक्रमस्मारिता अर्थाः लक्ष्याः । उद्देशैकवाक्यत्वस्य आवश्यकत्वात् । तदर्था इति लक्षणम् । तेषामिन्द्रियाणामर्थाः । तथा चेन्द्रियैरर्य्यमाणत्वं लक्षणमर्थानाम् । लौकिकप्रत्यक्षविषयत्वमिति यावत् । शेषं विभागाय । पृथिव्यादीति योग्यद्रव्यपरम् । गुणा इति योग्यधर्मपरम् । तेन संख्यादिगुणकर्मसामान्यसमवायानां संग्रहः । द्वन्द्वः समासः । गुणशब्दाद् गन्धादिलाभेऽपि गोबलीवर्दन्यायः ।

केचित्तु गन्धादयः पृथिव्यादिगुणा इति लक्ष्यनिर्देशः । तदर्था इति लक्षणमित्याहुः ।

अन्ये तु शब्दा इत्यन्तेन लक्ष्यनिर्देशः । तदर्था इति लक्षणम् । असाधारणेन्द्रियविषया इत्यर्थः । पृथिव्यादिगुणा इति विशेषलक्षणानीत्याहुः ।१।१।१३।

[बुद्धिलक्षणम्]

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ।१।१।१४।

आत्मादीनां बुद्धिहेतुत्वात् अर्थनिरूप्यत्वाच्च बुद्धेः, मनसश्च [illegible]दिहेतुत्वेऽपि बुद्धिक्रमोन्नेयत्वात् अनन्तरं बुद्धिलक्षणाय सूत्रम्—"बुद्धि···[illegible]" [illegible]दकरूपवत् ।।८।

एतैः पर्यायशब्दैरभिधेया बुद्धिरित्यसाधारणतया [illegible] पर्यायाभिधानमपि लक्षणम् । भावव्युत्पत्तिमाश्रित्यैश्वरः सङ्केतो द्रष्टव्यः । यद्वा पर्यायशब्दाभिधानेन प्रवृत्तिनिमित्तं बुद्धित्वमिह लक्षणमभिमतम् । लक्ष्योपस्थितिस्तु उद्देशमात्रादेव ।

केचित्तु बुद्धिरिति लक्ष्यनिर्देशः । उपलब्धिर्ज्ञानमित्यनर्थान्तरं पर्यायो यस्य पदार्थस्य सा बुद्धिरिति लक्षणमित्याहुः ।१।१।१४।

[मनोलक्षणम्]

युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ।१।१।१५।

बुद्धिक्रमोन्नेयत्वात् प्रवृत्तिहेतुत्वात् मनोलक्षणपरं तत्स्वरूपबाधन [बोधन] द्वारा सूत्रम्—'युगपज्···लिङ्गम्" इति । चाक्षुषज्ञानवतो व्यासङ्गदशायां स्वस्वविषयसंबन्धेषु अन्येन्द्रियेषु यस्येन्द्रियासंयोगात् युगपज्ज्ञानानुत्पत्तिस्तदिन्द्रियसहकारिक्रमेण तदधिष्ठायकम् । यदिन्द्रियसंयोगासंयोगाभ्यां ज्ञानस्योत्पत्त्यनुत्पत्ती भवतस्तन्मनोऽभ्युपेयम् । अन्यथा व्यासङ्गानुपपत्तिरित्यर्थः । एतदेव च लक्षणं मनस्त्वं वा जातिविशेष इति ।१।१।१५।

[प्रवृत्तिलक्षणम्]

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः ।१।१।१६।

मनोजन्यत्वात् तदनन्तरं दोषनिरूपकत्वात्, ततः प्राक् प्रवृत्तिलक्षणाय सूत्रम्—"प्रवृत्ति···रारम्भः" इति । आरम्भः प्रयत्नः । तथा चादृष्टजनकानित्यप्रयत्नः

प्रवृत्तिरिति सामान्यलक्षणम्। वचनोत्पादद्वारेणादृष्टजनकः प्रयत्नो वागारम्भः। आत्मधर्मोत्पादनद्वारा तादृशः प्रयत्नो बुद्ध्यारम्भः। तेनेच्छाद्वेषदयानामपि संग्रहः। बुद्ध्यतेऽनेनेति व्युत्पत्त्या बुद्धिपदं मनःपरम्। भोगावच्छेदकक्रियाजननद्वारा तादृशः प्रयत्नः शरीरारम्भः। तेन हस्तादिक्रियापि लक्ष्यते। अदृष्टत्वं तु प्रत्यक्षवृत्तिगुणत्व-साक्षाद्व्याप्यजात्यनाश्रयविशेषगुणत्वम्। एवं पुण्या दशविधा प्रवृत्तिः। कायेन परित्राणं दानं परिचरणम्, वाचा सत्यं हितं प्रियं स्वाध्यायश्च, मनसा अस्पृहा श्रद्धा दया। पापा अप्येतद्विपर्ययेण दशविधा ।१।१।१६।

[दोषलक्षणम्]

प्रवर्तनालक्षणा दोषाः ।१।१।१७।

प्रवृत्तिनिरूप्यत्वादनन्तरं प्रेत्यभावस्य शरीरादिदोषपर्यन्तत्यागपूर्वकतत्प्राप्ति-रूपतया दोषनिरूप्यत्वाद् ततः प्राक् दोषलक्षणाय सूत्रम्—"प्रवर्तना…दोषाः" इति। **प्रवर्तना** प्रवृत्त्यनुकूलो व्यापारः। तत्स्वरूपाः रागद्वेषमोहाः। दोषा इति बहुवचनेन विभागः सूचितः। [उक्तं चैतत्] कण्ठतश्चतुर्थे, विशेषलक्षणमपि तत्रैव। अदृष्टहेतुप्रयत्न-जनकप्रत्यक्षात्मविशेषगुणत्वं सामान्यलक्षणम् ।१।१।१७।

[प्रेत्यभावलक्षणम्]

पुनरुत्पत्तिः प्रेत्यभावः ।१।१।१८।

आत्मादिदोषान्तनिरूप्यत्वाद् तल्लक्षणानन्तरं प्रेत्यभावलक्षणाय सूत्रम्—"पुन…भावः" इति।

अत्र **पुनः** शब्दोऽभ्यासार्थः, उत्पत्तिः निरुक्तरूपा। उत्पत्तेरभ्यासात् तत्रान्तरीयकतया पूर्वशरीरादित्यागलाभः। उत्पत्तिमात्रेऽभ्यासान्वयात् संसारानादित्वमपि सूचितम्। प्रेत्यभावस्यैव संसारत्वात्। तेन तदीयभोगजनकशरीरादिविश्लेषपूर्वकं तदीयभोगजनकशरीरादिप्राप्तिरूपा पुनरुत्पत्तिः प्रेत्यभाव इत्यर्थः। प्राप्तिश्च संयोगः पूर्वोत्तरशरीरं चैत्रत्वावच्छिन्नं द्रष्टव्यमतो न बाल्ययौवनादिभिन्नेऽतिव्याप्तिः ।१।१।१८।

[फललक्षणम्]

प्रवृत्तिदोषजनितोऽर्थः फलम् ।१।१।१९।

शरीरादिप्रेत्यभावान्तानां शरीरत्वादिना उपस्थितानामेव फलत्वबोधनात् तेनापि रूपेण ज्ञातानां निर्वेदोपयोगित्वप्रदर्शनाय, फलस्यापि दुःखताख्यापनाय च मध्ये फललक्षणसूत्रम्—"प्रवृत्ति…फलम्" इति।

अत्र **जनित** इत्येव लक्षणं फलस्य, फल निष्पत्ताविति धात्वनुसारात्। प्रवृत्ति-दोषजनितत्वकीर्तनं त्वनेनापि रूपेण ज्ञातस्य निर्वेदोपयोगित्वख्यापनाय। अर्थग्रहणं शरीरादिसर्वलाभाय। फलशब्दः सुखदुःखोपभोगे मुख्यः शरीरादौ गौण इति **वार्तिकम्**। दोषग्रहणं तु प्रवृत्ताविव तत्कार्यसुखदुःखयोरपि, तेषां हेतुत्वख्यापनाय।

यद्वा प्रवृत्तिजनितत्वमिह लक्षणम्। तत्तु धर्माधर्मयोः साक्षात्, अन्यत्र तद्-द्वारा। एवं दोषजन्यत्वमपीति ।१।१।१९।

[दुःखलक्षणम्]

बाधनालक्षणं दुःखम् ।१।१।२०।

मुख्यदुःखे शरीरादिहेतुकत्वात्, गौणे तु तेषां दुःखानुषङ्गात् दुःखत्वज्ञापनस्य तज्ज्ञानाधीनज्ञानत्वात्, अनन्तरं दुःखलक्षणसूत्रम्—"बाधना···दुःखम्" इति।

अत्र **दुःख**पदेन लक्ष्यनिर्देशः हेयत्वप्रतिपादनार्थः। गौणमुख्यसाधारणं दुःख-लक्षणम् आत्मापवर्गान्यत्वे सति यथोक्तप्रमेयेतराविषयदुःखबुद्धिविषयत्वम्। दुःखसंबन्ध-निरूपकत्वं वा। तच्च शरीरस्यावच्छेदकतया, इन्द्रियादीनां साधनतया, सुखस्याविना-भावितया, मुख्यदुःखस्य स्वरूपेणैव। सुखदुःखे लोकसिद्धे। तत्र संबन्धग्रहाविरोधात् नान्योन्याश्रयः। दुःखत्वेनैतच्छास्त्रकीर्तितत्वं तदिति वृद्धाः ।१।१।२०।

[अपवर्गलक्षणम्]

तदत्यन्तविमोक्षोऽपवर्गः ।१।१।२१।

उक्तरूपाशेषदुःखनिवृत्तिरूपत्वात् अपवर्गस्य, तदनन्तरं तल्लक्षणाय सूत्रम्—"तद···ऽपवर्गः" इति।

तदिति दुःखपरामर्शः, **विमोक्षो** ध्वंसः आत्यन्तिकत्वं च [तत्] समानाधिकरण-दुःखप्रागभावसमानकालत्वम्। तथा च तादृशदुःखध्वंसो मोक्ष इत्यर्थः ।१।१।२१।

[न्यायपूर्वाङ्गप्रकरणम् ।३।४।]

[संशयलक्षणम्]

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषा-पेक्षो विमर्शः संशयः ।१।१।२२।

एवं प्रमेयप्रकरणपर्याप्ताविदानीं न्यायपूर्वाङ्गप्रकरणम्। पूर्वाङ्गता च न्याय-निष्पादकप्रथमज्ञानगोचरता। तत्राप्युद्देशक्रमात् संशयलक्षणाय सूत्रम्—"समान······संशयः" इति। **विमर्शः** संशय इति सामान्यलक्षणम्। स चैकस्मिन् धर्मिणि विरुद्ध-नानाप्रकारकं ज्ञानम्। सामान्यलक्षणानुवर्तनेन त्रीणि विशेषलक्षणानि। प्रत्येकमेव शेषैः पदैरुपेतानि। समानधर्मस्योच्चत्वादेरुपपत्तेः ज्ञानात्। अनेकस्मात् व्यावृत्तो धर्मो असाधारण इति यावत्, तज्ज्ञानात्। विप्रतिपत्तेः शब्दो नित्योऽनित्यो वेतिशब्दात्। यद्वा कारणत्रयव्यक्त्या संशयावान्तरजातिरेव लक्षणं त्रयाणाम्। **उपलब्ध्यनुपलब्ध्य-व्यवस्थात** इत्यनेन साधकबाधकप्रमाणाभावो दर्शितः। तथा हि पाण्यादेरुपलब्धिः कोटरादेरनुपलब्धिः पुरुषस्य साधकं प्रमाणम्। तद्विरुद्धस्य कोटरादेरुपलब्धिः पाण्यादे-रनुपलब्धिः पुरुषस्य बाधकम् [प्रमाणम्]। तदभावोऽव्यवस्था। चकारेणाप्युक्तलक्षणत्रयेऽ-

स्यान्वयः समुच्चीयते। विशेषापेक्ष इति विशेषसाकाङ्क्षः। तच्च सामान्यतो ज्ञानं विना नेति धर्मिज्ञाने सतीति लभ्यते। विशेषादर्शनदशायामिति च विशेषपदेन कोटिज्ञानमेव वा विवक्षितमिति संक्षेपः। विस्तरस्तु द्वितीये। विपर्ययस्त्वत्र विचारानङ्गत्वान्नोक्तः।१।१।२२।

[प्रयोजनलक्षणम्]

यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम् ।१।१।२३।

न्यायपूर्वाङ्गत्वाविशेषेऽपि उद्देशसङ्गत्या प्रयोजनलक्षणाय सूत्रम्—"यमर्थ… प्रयोजनम्" इति। अधिकृत्य उद्दिश्य अर्थशब्दो मुख्यसुखदुःखाभावगौणतत्साधनप्रयोजनयोरर्थ्यमाणतया संग्रहार्थः। तेन प्रवृत्तिहेतुभूतेच्छाविषयत्वं लक्षणम्। यद्विषयतया इच्छायाः प्रवृत्तिहेतुत्वमिति यावत्। प्रयोजनानुसन्धानं विना न्यायाप्रवृत्तेर्न्यायाङ्गता।१।१।२३।

[दृष्टान्तलक्षणम्]

लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ।१।१।२४।

प्रयोजने ज्ञाते, न्याये दृष्टान्तानुसरणमिति। तस्मादस्यानन्तर्यमभ्युपगमप्रयोजकतया सिद्धान्तादभ्युपगमादुत्कर्ष इति सङ्गत्या दृष्टान्तलक्षणाय सूत्रम्—"लौकिक…दृष्टान्तः" इति।

शास्त्रजतादृशज्ञानशून्यो **लौकिकः** प्रतिपाद्यः। विचारणक्षमः **परीक्षकः** प्रतिपादकः। तयो**र्यस्मिन्नर्थे बुद्धिसाम्यं** व्याप्यव्यापकवत्तया संप्रतिपत्तिः स दृष्टान्तः। साध्यसाधनार्थाभिमताऽविनाभावज्ञानकारणैतदुभयनिरूपितसामानाधिकरण्यावच्छेदकाधिकरणत्वं सामान्यलक्षणम्। साध्यसाधनाभिमतव्याप्तिधीकारणैतदुभयसामानाधिकरण्यावच्छेदकधर्मवत्त्वमन्वयदृष्टान्तत्वम्। उक्तधीकारणैतदुभयव्यतिरेकसामानाधिकरण्यावच्छेदकधर्मवत्त्वं व्यतिरेकदृष्टान्तलक्षणम्। विशेषानुपस्थितौ सामान्यापर्यवसानान्नोदाहरणेन गतार्थता।१।१।२४।

[न्यायाश्रयप्रकरणम् ।६।५।]

[सिद्धान्तलक्षणम्]

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ।१।१।२५।

दृष्टान्तोपजीवकत्वात् अभ्युपगमस्य, तदनन्तरं न्यायस्याश्रयनिरूप्यत्वात् ततः प्राक् न्यायाश्रयसिद्धान्तप्रकरणम्। तत्र तत्सामान्यलक्षणसूत्रम्—"तन्त्रा…सिद्धान्तः" इति। **तन्त्रं** प्रमाणम्, **तदधिकरणमा**श्रयो ज्ञापकतया येषां ते तथोक्ताः। तेषा**मभ्युपगमो** ज्ञानविशेषस्तस्य **संस्थिति**रित्थंभावव्यवस्था असन्देहरूपतेति यावत्। तेन प्रामाणिकत्वेनार्थनिश्चयः सिद्धान्तः। अर्थे तु सिद्धान्तपदप्रयोगो भाक्तः। वस्तुतस्तु समयबन्धविषयीभूतवचनविशेष एव सिद्धान्तः। तद्विरोधादेव चापसिद्धान्तः। अतो न प्रौढिवादादावतिव्याप्तिप्रसङ्गः।

यद्वा प्रतीतिसाक्षिको ज्ञानजातिविशेष एवाभ्युपगमत्वं तल्लक्षणम् ।१।१।२५।

[सिद्धान्तप्रकराभिधानम्]

सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ।१।१।२६।

तद्विभागाय सूत्रम्—"सर्व···भावात्" इति । स चतुर्द्धेति शेषः । सूत्रान्तर्गत-मेतदपीति कश्चित् ।१।१।२६।

[सर्वतन्त्रसिद्धान्तलक्षणम्]

सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः ।१।१।२७।

सर्वतन्त्रसिद्धान्तस्य इतरोपजीव्यत्वात् प्रथमं तल्लक्षणसूत्रम्—'सर्व··· सिद्धान्तः" इति ।

सर्वत्र **तन्त्रे** शास्त्रेऽ**विरुद्धो** वादिभ्यामनिषिद्धः, **तन्त्रे** विचारे **अधिकृतः** उपयोगी **अर्थो**ऽर्य्यमाणः सर्वतन्त्रसिद्धान्त इत्यर्थः । यथा प्रमाणाधीनं प्रमेयज्ञानं घ्राणादीनि इन्द्रियाणि । दृष्टान्तस्तु वादिप्रतिवादिभ्यामेवाभ्युपगतो य[न]त्वन्यैरपीति ततो भेदः ।१।१।२७।

[प्रतितन्त्रसिद्धान्तलक्षणम्]

समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः ।१।१।२८।

प्रतितन्त्रसिद्धान्तलक्षणसूत्रम्—'समान···सिद्धान्तः" इति । **समाने** एकस्मिन् **तन्त्रे सिद्धः, परतन्त्रे**ऽ**सिद्धः** । तथा च वादिप्रतिवाद्यन्यतरानभ्युपगतविषयकः शास्त्र-निबद्धार्थाभ्युपगमः प्रतितन्त्रसिद्धान्तः । यथा भौतिकानीन्द्रियाणि इति नैयायिका-नाम्, आहङ्कारिकाणि इति सांख्यानाम् ।१।१।२८।

[अधिकरणसिद्धान्तलक्षणम्]

यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ।१।१।२९।

अधिकरणसिद्धान्तलक्षणाय सूत्रम्-"यत्सिद्धौ · सिद्धान्तः" । यस्य साध्यत्वेन निर्दिष्टस्य सकर्तृत्वादेः सिद्धौ अन्यस्यानिर्दिष्टस्य प्रक्रियमाणस्य ज्ञाननित्यत्वस्य सिद्धिः सोऽधिकरणसिद्धान्तः । यथा क्षित्यादि सकर्तृकमित्यत्र कर्तुः सार्वज्ञाभ्युपगमः । तथा च पक्षधर्मतावललभ्यार्थाभ्युपगमोऽधिकरणसिद्धान्त इति लक्षणम् ।१।१।२९।

[अभ्युपगमसिद्धान्तलक्षणम्]

अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ।१।१।३०।

अभ्युपगमसिद्धान्तलक्षणसूत्रम्—"अपरीक्षिता · मभ्युपगमसिद्धान्तः" । अपरी-क्षितस्य साक्षात् सूत्रानुक्तस्य अभ्युपगमाद्धेतोर्यतस्तद्विशेषपरीक्षणं भवति । अन्यथा

तस्य आश्रयासिद्धेः । तस्माद् विशेषपरीक्षणादवगम्यते असूत्रितमभ्युपगतं सूत्रकारेणेति । सोऽयमभ्युपगमोऽभ्युपगमसिद्धान्तः । यथा मनस इन्द्रियत्वेन असूत्रितस्यापि इन्द्रियत्वं परीक्षितं सूत्रकृता । तथा च साक्षादसूत्रितस्य समानतन्त्रोक्तस्याभ्युपगमोऽभ्युपगमसिद्धान्त इति लक्षणम् ।१।१।३०।

[न्यायस्वरूपप्रकरणम् ८।६।]

[अवयवलक्षणम्]

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ।१।१।३१

सिद्धान्तस्य न्यायोपजीवकत्वादनन्तरं न्यायप्रकरणम् । अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं न्याय इत्याक्षिप्तन्यायलक्षणे सति तदवयवविभागोद्देशसूत्रम्—"प्रतिज्ञा ···न्यवयवाः" इति । अवयवसामान्यलक्षणमनुमितिचरमकारणलिङ्गपरामर्शजनकशाब्दज्ञानजनकवाक्यत्वमिति ।१।१।३१।

[प्रतिज्ञालक्षणम्]

साध्यनिर्देशः प्रतिज्ञा १।१।३२।

अवयवेषु प्रतिज्ञायाः प्राथम्यात् तल्लक्षणाय सूत्रम्—"साध्यनिर्देशः प्रतिज्ञे"ति । साध्यतया स्वीक्रियमाणस्य वचनं प्रतिज्ञेत्यर्थः । यथा शब्दोऽनित्य इति ।१।१।३२।

[हेतुलक्षणम्]

उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः ।१।१।३३।

साध्यनिर्देशानन्तरं कुत इत्याकांक्षायां हेतुवचनमिति हेतुलक्षणाय सूत्रम्—"उदाहरण···हेतुः" । हेतुरिति लक्ष्यनिर्देशः । साध्यसाधनहेतुत्वप्रतिपादकविभक्तिमदन्त्यावयवत्वमिति सामान्यलक्षणम् । अन्वयिलक्षणमाह—**उदाहरणसाधर्म्यादिति** । उदाहरणं दृष्टान्तस्तेन साधर्म्यं व्याप्यव्यापकवत्त्वं पुरस्कृत्य ल्यब्लोपे पञ्चमी । अन्वयव्याप्तिमादृत्येत्यर्थः । सामान्यलक्षणसहितमिदम् ।१।१।३३।

तथा वैधर्म्यात् ।१।१।३४।

व्यतिरेकिणोऽन्वयसापेक्षत्वात् इदानीं वैधर्म्यहेतुलक्षणाय सूत्रम्—"तथा वैधर्म्यात्" । साध्यसाधनं हेतुरित्यनुषज्यते । हेतुरिति लक्ष्यनिर्देशः । शेषं लक्षणपरम् । तथा च विपक्षोदाहरणेन वैधर्म्यात् साध्यसाधनं वैधर्म्यहेतुरित्यर्थः ।

यद्वा **तथेति**गमकतौपयिकरूपपरामर्शेण साध्याभावव्यापकाभावप्रतियोगित्वं लक्षणं लभ्यते । वस्तुतस्तु अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोजकजिज्ञासाजनकावयवत्वमन्वयिहेतुत्वम् । एतदेव व्यतिरेकपदप्रक्षेपाद् व्यतिरेकिहेतुत्वमिति दिक् ।१।१।३४।

[उदाहरणलक्षणम्]

साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम् ।१।१।३५।

हेतावुक्ते तस्य गमकतापेक्षायां व्याप्तस्य पक्ष उपसंहारस्योपनयत्वात् ततः प्राक् व्याप्तिप्रदर्शकोदाहरणलक्षणसूत्रम्—"साध्य···उदाहरणम्" । **उदाहरणमिति** लक्ष्यनिर्देशः । साधर्म्यपदादन्वयोदाहरणपरता लभ्यते । आर्थस्तु प्राधान्येन व्याप्ति-प्रदर्शकावयवत्वं सामान्यलक्षणम् । विभागोऽप्यार्थः । अन्वयोदाहरणं व्यतिरेकोदाहरणं चेत्युदाहरणं द्वेधा । सूत्रार्थस्तु **साध्यः** सिषाधयिषितधर्मवान् धर्मी, तेन **साधर्म्यात्** समानात् साधनरूपाद्धर्मात् । पञ्चम्या साध्यव्याप्यत्वरूपं प्रयोजकत्वमुक्तम् । तस्मात् प्रयोजकात्**तद्धर्मभावी** येन धर्मेण विशिष्टः पक्षः सिषाधयिषितः स तद्धर्मः स एव भावस्तद्वान् । दृष्टान्तः साधनधर्मप्रयुक्तसाध्यधर्मवान् तद्वचनमन्वयोदाहरणमित्यर्थः । १।१।३५।

तद्विपर्ययाद्वा विपरीतम् ।१।१।३६।

वैधर्म्योदाहरणप्रदर्शनार्थं सूत्रम् - "तद् विपरीतम् । **तस्य** साध्यस्य **विपर्ययो** वैधर्म्यम् । तस्माद् **विपरीत**मतद्धर्मभाविता साधनराहित्यम्वा । कारणे समुच्चयार्थेन दृष्टान्त उदाहरणमित्यस्य समुच्चयः । तेन साध्यधर्माभावप्रयुक्तसाधनाभावदृष्टान्त-वचनं वैधर्म्योदाहरणमित्यर्थः ।

यद्यपि तद्विपर्ययात् साध्याभावरूपाद्धर्मात् तद् विपर्ययः । साधनविपर्ययः तद-भावरूप इत्यर्थो युक्तः । व्यतिरेकव्याप्तौ साध्याभावस्य व्याप्यत्वात् । साधनाभावस्य व्यापकत्वात् । तथापि न कश्चित् फलतो विशेष इति पाठक्रमानुरोधेनैव व्याख्यातम् । १।१।३६।

[उपनयलक्षणम्]

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः १।१।३७।

व्याप्तिपक्षधर्मतोपदर्शकोपनयस्य व्याप्तिज्ञानापेक्षत्वात् तदुपदर्शकोदाहरणा-नन्तरलक्षणसूत्रम्—"उदाहरणा···स्योपनयः" । अत्र वाकारो मिथः समुच्चये । **साध्यस्य** पक्षस्य **तथेति** व्याप्तवत्त्वेन **न तथेति** साध्याभावव्यापकाभावप्रतियोगिमत्त्वेन वोप-संहारः सम्बन्धप्रतिपादकं वचनम् । **उदाहरणापेक्षः** तदुपदर्शनीयव्याप्तिज्ञानापेक्षः । व्याप्तस्य पक्षधर्मताप्रदर्शकं वचनमुपनय इत्यर्थः । तत्रोदाहरणापेक्ष उपसंहार इति सामान्यलक्षणमार्थो विभागः । सामान्यलक्षणापेक्षे तथेति न तथेति विशेषलक्षणे सौत्रे एव ।१।१।३७।

[निगमनलक्षणम्]

हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् ।१।१।३८।

व्याप्तिपक्षधर्मतोपजीवकत्वात् निगमनस्य तदुपदर्शकोपनयानन्तरं लक्षण-सूत्रम्—"हेत्वपदेशात्······निगमनम्" । **हेत्वपदेशात्** हेतोस्तस्मादिति वचनात्

प्रतिज्ञायाः प्रतिज्ञार्थस्य पुनर्वचनं सिद्धाभिधानमिति लक्षणम् । पुनः शब्दस्य सिद्धत्वे पर्यवसानात् । अवाधितत्वासत्प्रतिपक्षितत्त्वबोधनाय चेदम् । निगमनमिति लक्ष्य-निर्देशः ।१।१।३८।

[न्यायोत्तराङ्गप्रकरणम् २।७।]

[तर्कलक्षणम्]

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ।१।१।३९।

एवं न्यायस्वरूपप्रकरणानन्तरं तन्निरूप्यत्वान्न्यायोत्तराङ्गप्रकरणम् । यद्यपि विषयपरिशोधकत्वात् तत् [?] तर्को न न्यायाङ्गम् निर्णयस्त्वङ्गमेव न, स्वस्य स्वानङ्ग-त्वात् । तथापि न्यायस्य निर्णये साध्ये विशिष्टलिङ्गोपस्थितिर्द्वारम् । सा च तावन्न भवति यावत् व्यभिचारशङ्का तर्केण नापनीयते । निर्णयस्य फलत्वमेवाङ्गत्वम् । यद्वा परामर्शस्य तर्को व्यापार इति मतेनेदम् । तत्रापि निर्णयकारणत्वात् ।

प्रथमं तर्कलक्षणार्थं सूत्रम्—"अविज्ञात…तर्कः" । अविज्ञाततत्त्वोऽर्थोऽस्य विषयः । कारणमाहार्य्यारोपः, स्वरूपमनिष्टप्रसञ्जनं, फलं तत्त्वज्ञानम् । तथाहि यस्मिन् विषये प्रमाणं प्रवर्तितुमुद्यतं तद्विपर्ययशङ्कायां न प्रवर्तते ।

तत्र चानिष्टप्रसञ्जनेन शङ्कापगमे तत्त्वनिर्णयो भवति नान्यथा । सूत्रार्थस्तु अविज्ञातं विशेषतोऽज्ञातं तत्त्वं वास्तवं रूपं यस्यार्थस्येति विशेषज्ञाननिषेधात् सामान्य-ज्ञानलाभेन धर्मिज्ञानं संशायकं लभ्यते । कारणं व्याप्यं तदुपपत्तिराहार्यारोपरूपा ततस्तत्त्वज्ञानार्थं निर्णयार्थं य ऊहः विपर्ययकोटावनिष्टप्रसञ्जनरूपः स तर्क इति व्याप्यारोपाद् व्यापकप्रसञ्जनं तर्क इति लक्षणम् । मानसत्वव्याप्यजातिविशेष एव तर्कत्वमित्येके ।१।१।३९।

[निर्णयलक्षणम्]

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ।१।१।४०।

तर्कस्य प्रमाणफलत्वात् तर्कानन्तरं निर्णयस्य लक्षणाय सूत्रम्—"विमृश्य… निर्णयः" । **विमृश्य** संशयं कृत्वा **पक्षप्रतिपक्षाभ्यां** [स्थापनात्मकसाधनतद्] दूषणा-त्मकप्रतिषेधाभ्या**मर्थस्यावधारण**मिदमित्थंभूतमेवेति ज्ञानं निर्णय इत्यर्थः । संशयस्य पक्षप्रतिपक्षोत्थापकतया चोपयोगः । इहावधारणमात्रं न लभ्यम् [लक्ष्यम् ?] । प्रत्यक्षादिसाधारणगता [साधारण्यात्] परीक्षासाध्यत्वाभावात् । किन्तु विषय-संशयप्रयोजनपूर्वपक्षसिद्धान्तोपन्यासात्मकविचारसाध्यो निर्णयोऽत्र लक्ष्य इति स्मर्त-व्यम् । अर्थग्रहणं तु काल्पनिकत्वनिषेधप्रदर्शनाय । तदत्रावधारणं निर्णय इति सामान्यलक्षणम् । स द्विविधः संशयपूर्वकासंशयपूर्वकत्वभेदात् । तत्राद्यः प्रकृतः तल्लक्षणं तु सतर्कप्रमाणजन्यज्ञानत्वमिति दिक् ।१।१।४०।

उमापतिसगर्भेण श्रीविश्वधरसूनुना ।
श्रीकेशवेन व्याख्यातं प्रथमे प्रथमाह्निकम् ॥

इति श्रीकेशवमिश्रकृते गौतमीयसूत्रप्रकाशे प्रथमाध्यायस्याद्यमाह्निकम् ॥

———

द्वितीयमाह्निकम् ।

[कथाप्रकरणम् ।३।१।]

[वादलक्षणम्]

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ।१।२।१।

एवं प्रथमाह्निके, पञ्चावयवात्मके साङ्गोपाङ्गे न्याये लक्षिते, सम्प्रति न्यायतदाभासविवेकहेतुभूतोपालम्भपराणां कथाहेत्वाभासच्छलकथकाशक्तिलिङ्गानां लक्षणमित्याह्निकयोर्हेतुहेतुमद्भावरूपा सङ्गतिः ।

तत्रादौ कथाप्रकरणम् प्राधान्यात् । हेत्वाभासादीनां साधनदूषणवचनसन्दर्भात्मककथैकदेशत्वात् । तत्राप्येतच्छास्त्रोद्देश्यतत्त्वज्ञानसाक्षादुपायत्वात् वादस्य प्राधान्यात् आदौ तल्लक्षणाय सूत्रम्—"प्रमाण······वादः" ।

सूत्राक्षिप्तं कथासामान्यलक्षणं विभागश्च । तच्च पक्षप्रतिपक्षपरिग्रह इति सूत्रैकदेशेन कृतमिति **कश्चित्** । कथकाशक्तिलिङ्गवद्वाक्यत्वमित्यन्ये । जातिविशेष एवेत्यपरे । सामान्यलक्षणं च प्रकरणऐक्याय निर्वाच्यमेवेति दिक् । विभागश्च सा त्रेधा वादो जल्पो वितण्डा चेति ।

सूत्रार्थस्तु **वाद** इति लक्ष्यनिर्देशः । शेषं लक्षणाय परिकरशोधनाय च । **पक्षः** सिषाधयिषितोऽर्थः **प्रतिपक्षस्त**द्विरोधी सिषाधयिषित एव । तयोः **परिग्रहो**ऽङ्गीकारो यत्रेति कथाप्रयोजको विरुद्धार्थाङ्गीकार उक्तः । एतावन्मात्रं कथान्तरसाधारणं वितण्डायामपि । साधनीयं मया, दूषणीयं त्वयेति पक्षप्रतिपक्षपरिग्रहादित्यत उक्तम्—**प्रमाणतर्कसाधनोपालम्भ** इति । प्रमाणेन तर्केण च साधनं स्थापनमुपालम्भः परपक्षप्रतिषेधश्च यस्मिन् स तथा । यद्वा प्रमाणतर्केति साधनोपालम्भाभ्यामन्वीयते । वादे प्रमाणतर्काभ्यामेव साधनोपालम्भः वीतरागत्वाद्वादिनोः । जल्पादौ छलादिसाधनोपालम्भता विजिगीषुकथात्वात् । **सिद्धान्ताविरुद्ध** इत्यनेनापसिद्धान्तोपग्रहः । सर्वहेत्वाभासानां च तेषां सिद्धान्ते निषेधेन तद्विरोधात् । अवयवोपपत्त्या वा तेषामुपग्रहः पञ्च[क्ष]ग्रहणात् । न्यूनाधिकयोरित्यष्टनिग्रहाधिकरणो वादः । तत्त्वनिर्णीषुकथा वाद इति लक्षणाकर्षः ।१।२।१।

[जल्पलक्षणम्]

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ।१।२।२।

वादलक्षणानन्तरमुभयस्थापनावत्तया तत्साम्याज्जल्पलक्षणाय सूत्रम्—"यथोक्तो······जल्पः" । यथोक्तेन प्रमाणेन तर्कसाधनोपालम्भ इति मात्रेणोपपन्नः

उपालम्भपदादेवाशेषनिग्रहस्थानप्राप्तेः पक्षप्रतिपक्षपरिग्रहस्यापि छलादिभिरुपालम्भो यत्रेत्यन्यपदार्थतया लाभात्। अत्र छलादीनामपि प्रयोगः, कथकयोः विजिगीषुत्वात् न तु वादे। चपेटादीनामवचनत्वादेव न प्रसङ्गः। लक्षणं तूभयपक्षस्थापनावती विजिगीषुकथा जल्पः। ननु वितण्डयैवार्थसिद्धेः किं तदधिकेतिकर्तव्यताकयानया कथयेति चेत् न, यत्रैकस्य साधनमात्रे अपरस्य दूषणमात्रे सामर्थ्यनिरूपणं तत्र वितण्डा। यत्र तु द्वयस्याप्युभयत्र सामर्थ्यनिरूपणं तत्र द्वाभ्यां साधनदूषणप्रयोगे जल्पः।१।२।२।

[वितण्डालक्षणम्]

स प्रतिपक्षस्थापनाहीनो वितण्डा ।१।२।३।

जल्पोपजीवकत्वात्तदनन्तरं वितण्डालक्षणाय सूत्रम्—"स……वितण्डा"। स जल्पः पूर्ववादिपक्षापेक्षया प्रतिवादिन आत्मीय एव पक्षः प्रतिपक्षस्तस्य स्थापना। तत्सिद्धौ प्रमाणवचनम् तया हीनो वितण्डेति जल्पाद् भेदो दर्शितः। ननु जल्पो वितण्डेति व्याहतमिति चेन्न स इति शब्देन पक्षस्थापनावत उपस्थापनात्। स कथारूप वचनसन्दर्भ इत्यन्ये। तथा चान्यतरस्थापनाहीना विजिगीषुकथा वितण्डेति लक्षणम्।

नन्विदं लक्षणमसंभवि दूषणमप्यसाधकतानुमानमिति तत्रापि स्थापनास्त्येवेति चेन्न कथाहेतुविप्रतिपत्तिविषयकोटिसाधकप्रयोगस्य स्थापनात्वात्। सत्प्रतिपक्षेऽपि दोषोऽस्तीति चेत् दोषत्वेन, न स्थाप्यत्वेनेति दिक्।१।२।३।

[हेत्वाभासप्रकरणम् ।१।२।]

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकालाः हेत्वाभासाः ।१।२।४।

कथाप्रकरणानन्तरं तद्विषयेषु लक्षणीयेषु हेत्वाभासानां सदुत्तरत्वादसदुत्तरत्वाच्च छलादेरुत्कर्षात् तेषां लक्षणाय प्रकरणम्। तत्राक्षिप्तसामान्यलक्षणं विभागोद्देशसूत्रम्—"सव्यभिचार……हेत्वाभासाः"। अत्र हेत्वाभासा इति लोकप्रसिद्धलक्ष्यानुवादेन अहेतवो अन्यतमहेतुधर्मानुविधानेन हेतुवदाभासमाना इति योगतः सामान्यलक्षणे तात्पर्यम्। तच्चानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्।१।२।४।

[सव्यभिचारलक्षणम्]

अनैकान्तिकः सव्यभिचारः ।१।२।५।

तत्र परस्परासङ्कीर्णाः कत्युपाधयो दूषकताप्रयोजका इत्यपेक्षायां न्यूनाधिकसंख्याव्यवच्छेदको विभागोद्देश इत्युद्देशक्रमानुरोधात् सव्यभिचारलक्षणाय सूत्रम्—"अनैका…सव्यभिचारः"। सव्यभिचार इति लक्ष्यनिर्देशः, शेषं लक्षणम्। अनवधारितानैकान्तिकपदार्थस्य सव्यभिचारित्वमपि लोकप्रसिद्धं कदाचिल्लक्षणमिति

पर्यायद्वयनिर्देशेन दर्शितम् । एकस्मिन्नन्ते साध्यवति तदभाववति नियत ऐकान्तिकः, अतथाभूतोऽन्वयाद् व्यतिरेकाद्वाऽनैकान्तिकः । उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं सव्यभिचारत्वमिति पर्यवसितार्थः । स चायं त्रिविधः, साधारणासाधारणानुपसंहार्य [रि] भेदात् । तत्र विपक्षगामित्वं साधारणत्वम् । शब्दोऽनित्यो निःस्पर्शत्वादित्यादौ । सपक्षव्यावृत्तो असाधारणः । यथा भूर्नित्या गन्धवत्त्वादित्यादौ । केवलान्वयिधर्मावच्छिन्नपक्षकत्वमनुपसंहार्य [रि] त्वम् । यथा सर्वमनित्यं प्रमेयत्वादित्यादौ । १।२।५।

[विरुद्धलक्षणम्]

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ।१।२।६।

उद्देशक्रमानुरोधाद् विरुद्धलक्षणाय सूत्रम्—"सिद्धान्त······विरुद्धः" । **विरुद्ध** इति लक्ष्यनिर्देशः । **तद्विरोधीति** लक्षणम् । तदिति साध्यम् तेन साध्यविरोधवान् साध्यासहचार[1] इति यावत् । तावन्मात्रमन्ये साध्यासहचरितेऽतिव्याप्तमित्यत उक्तम्—**सिद्धान्तमभ्युपेत्येति** । **सिद्धान्तः** पक्षः सर्वतन्त्रसिद्धत्वात् **तमभ्युपेत्य** प्रतिज्ञाय प्रयुज्यते इति यावत् । तेन स्वसाध्याभावव्याप्तो विरुद्ध इत्यर्थः । उदाहरणं घटो नित्यः कार्यत्वात् । साध्यव्यापकाभावप्रतियोगित्वं विरुद्धत्वमिति दिक् ।१।२।६।

[प्रकरणसमलक्षणम्]

यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः ।१।२।७।

उद्देशक्रमानुरोधात् प्रकरणसमलक्षणाय सूत्रम्—"यस्मात्······प्रकरणसमः" । प्रक्रियते साध्यत्वेन निर्दिश्यते वादिभ्यामिति **प्रकरणं** पक्षप्रतिपक्षौ तस्य **चिन्ता** जिज्ञासा । सा हि तत्त्वानुपलब्धेर्भवति । सैव चेदनुपलब्धिरुभयपक्षसमा निर्णयाय अपदिश्यते । यथा शब्दोऽनित्यः नित्यधर्मानुपलब्धेः । अत्रानित्यधर्मानुपलब्धिरपि यदा तदा समानबलत्वज्ञानदशायां विशेषानुपलब्धेः भवति जिज्ञासामात्रमिति फलद्वारकं लक्षणम् । तथा च प्रकृतसाध्यहेत्वोः किं तत्त्वमिति जिज्ञासाजनिका व्याप्तिपक्षधर्मतोपस्थितिः प्रकरणसम इति सिद्धम् ।१।२।७।

[साध्यसमलक्षणम्]

साध्याविशिष्टः साध्यत्वात् साध्यसमः ।१।२।८।

उद्देशक्रमानुरोधात् साध्यसमलक्षणाय सूत्रम्—"साध्या···साध्यसमः" । अत्रासिद्ध इति यदि लक्षणमुच्येत तदा असिद्धिमात्रनिषेधे अत्यन्तासिद्ध एव लभ्येत । न त्वन्यतरासिद्ध इत्यत उक्तम्—**साध्याविशिष्ट** इति । यथासाध्यमन्यतरासिद्धं तथायमित्यर्थः । तथाप्यन्यतरासिद्ध एव व्याप्येत । साध्यस्य तथात्वादित्यत उक्तम्

१—साध्यासहचरित ग । २—प्रयुज्येति यावत् ग ।

साध्यत्वादिति । तेनासिद्धिमात्रं विवक्षितम् । व्याप्तिः पक्षधर्मता च सिद्धिस्ताभ्यामप्रमितोऽसिद्ध इति लक्षणम् । सा च त्रिधा आश्रयासिद्धिः, स्वरूपासिद्धिः व्याप्यत्वासिद्धिः पक्षानिश्चयात् तत्र लिङ्गानिश्चयात् व्याप्तेरनिश्चयात् क्रमेण ।१।२।८।

[कालातीतलक्षणम्]

कालात्ययापदिष्टः कालातीतः ।१।२।९।

उद्देशक्रमसङ्गत्या सूत्रम्—"काला···तीतः" । अतीतकालत्वेनोद्देशेऽपि पर्यायान्तरेण **कालातीत** इति लक्ष्यनिर्देशः । **कालात्ययापदिष्ट** इति लक्षणम् । हेत्वपदेशस्य हि साध्यसन्देहविशिष्टः कालः । यदाहुः [भाष्यकाराः] नानुपलब्धे न निर्णीते न्यायः प्रवर्तत इति । तस्यात्यये सति **अपदिष्टो** निर्दिष्टः स हि प्रमाणतो[1] विपरीतनिर्णयेन[2] साध्यसन्देहविशिष्टं कालमतिपततीति भवति कालात्ययापदिष्ट इति सूत्रार्थः । न चैवं सिद्धसाधनेनातिव्याप्तिः, विरोधोद्देशेन[3] दूपकत्वस्य विवक्षितत्वात् । लक्षणं तु बलवत्प्रमाणप्रमापितसाध्याभाववद्धर्मिकत्वम् । स चायं संक्षेपाद्दशविध इति संक्षेपः । १।२।९।

[छलप्रकरणम् ८।३।]

[छललक्षणम्]

वचनविघातोऽर्थविकल्पोपपत्त्या छलम् ।१।२।१०।

एवं परवाक्योद्भावनीयस्ववाक्यपरिहरणीयहेत्वाभासप्रकरणानन्तरं जिगीषुणा सदुत्तरसमाधानापरिस्फूर्तौ तदाभासव्युत्पादनमवसरप्राप्तम् । तत्रापि जातेः स्वव्याघातकत्वेन जघन्यत्वाच्छलस्य तु तात्पर्यतो दुष्टत्वेऽपि क्वचिदभिधेये अदुष्टत्वेन किञ्चिदभ्यर्हितत्वात् अस्फूर्तावपि तदेव प्रयोक्तव्यमिति छलप्रकरणम् । तत्सामान्यलक्षणाय सूत्रम्—'वचन···छलम्" । छलादिषु फलसाधनत्वमेकैकस्यैवेत्येकवचनमिति **भास्करः** । **वचनस्य** परोक्तस्य **विघातो** दूपण**मर्थस्य** पराभिप्रेतभिन्नस्य **विकल्पो** वैचित्र्यं तदुपपत्तिस्तत्सम्भवत [स्त] या इत्यर्थः । अर्थग्रहणेन यत्रार्थान्तरकल्पना तत्र च्छलम् । तेन परा [भिमत] तात्पर्यविषये शब्दतात्पर्यसञ्चारेण दूपणवचनं छललक्षणम्[4] । जात्यर्थकल्पितदूष्यदूषणं वा ।१।२।१०।

[छलप्रकाराभिधानम्]

तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं च ।१।२।११।

तद्विभागाय सूत्रम्—"तत् त्रिविधं···छलं च" इति ।१।२।११।

१—प्रमागतो क । २—निर्णये क । ३—० द्देश्येन ग । ४—छलप्रकरणम् क ।

[वाक्छललक्षणम्]

अविशेषाभिहितेऽर्थे वागभिप्रायादर्थान्तरकल्पना वाक्छलम् ।१।२।१२।

उक्तिपूर्वत्वात् तात्पर्यज्ञानस्य, तदुपपत्त्योपचारच्छलकल्पनेति वाक्च्छलस्यादावुद्देशः। तदनुरोधादादौ वाक्छललक्षणाय सूत्रम्—"अविशेषा···वाक्छलम्" । अविशेषेणाभिहितेऽनुपन्यस्तार्थान्तरव्यवच्छेदकेऽर्थे वक्तुरभिप्रायारोपादर्थान्तरकल्पना वाक्छलमित्यर्थः। तेन मुख्यार्थतात्पर्येण प्रयुक्ते मुख्यार्थान्तरसञ्चारेण दूषणं वाक्छलमिति लक्षणम्। यथा नव कम्बलवानयमित्यत्र नूतने प्रयुक्तस्य नव पदस्य संख्यायां तात्पर्यसञ्चारात् कुतोऽस्य नव कम्बला इति दूषणम्।

तच्च त्रिविधम्, धर्मिधर्मोभयपदसञ्चारात्। तदपि प्रतिज्ञाहेतुदृष्टान्तभेदान्नवविधम्। तत्र प्रतिज्ञायां त्रैविध्यम्, क्रमेण भूभृदयं वीर्यशाली, अयं न[1] नखप्रसूनाञ्चितकरः, अजा गर्भवतीत्यादौ पर्वतखपुष्पप्रकृत्यन्तःसञ्चारात्। हेत्वाश्रयत्रयं, यथा गजोऽयं विषाणित्वात्। आढ्योऽयं नवकम्बलत्वात्[2]। गजोऽयं गुरुद्विजत्वात् इत्यादौ दन्तसंख्यासमृद्धदन्तेषु प्रयुक्तस्य शृङ्गनूतनपाठयितृविप्रेषु सञ्चारात्। दृष्टान्ताश्रयत्रयम्, यथा सावयवत्वादम्बरवत् नवकम्बलवत् महाराजवदित्यादि नेयम्। स्वेच्छया कल्पितदूष्यदूषणत्वेन प्रक्रान्ता [न्त] दूषकत्वात् नास्य सदुत्तरत्वम्, शब्दशक्त्युपजीवनात्।१।२।१२।

[सामान्यच्छललक्षणम्]

सम्भवतोऽर्थस्यातिसामान्ययोगादसंभूतार्थकल्पना सामान्यच्छलम्।१।२।१३

अनन्तरं सामान्यच्छललक्षणाय सूत्रम्—'सम्भवतो···सामान्यच्छलम्"। **संभवतोऽर्थस्ये**ति तात्पर्यसञ्चारे**ऽतिसामान्ययोगा**दित्यारोपे बीजमात्रप्रदर्शनमसम्भूतत्वम्। तात्पर्यविषयतया तेन विवक्षितान्यवाक्यार्थे तात्पर्यसञ्चारा[3]द्दूषणवचनं **सामान्यच्छलमि**ति लक्षणम्। तच्च पदवाक्यतात्पर्यसञ्चाराद् द्वेधा। तदपि प्रत्येकं षड्विधम्, संभवनियमयोः विधेयत्वोद्देश्यत्वयोः विशेषणविशेष्यत्वयोः परस्परम्। यथा ब्राह्मणे विद्याब्राह्मणत्वम्, अनित्यं कार्यं, शब्दोऽनित्यः, द्विजशतं भोजितम्, शतं द्विजातयो भोजिता इत्यादौ।१।२।१३।

[उपचारच्छललक्षणम्]

धर्मविकल्पनिर्देशे अर्थसद्भावप्रतिषेध उपचारच्छलम् ।१।२।१४।

शक्तितात्पर्यनिरूप्यत्वादनन्तरमुपचारच्छललक्षणाय सूत्रम्—"धर्मविकल्प··· उपचारच्छलम्"। **धर्मः** शब्दस्य प्रयोगः, तस्य **विकल्पो** द्वैविध्यम् मुख्यत्वभाक्तत्वभेदात्। तेन **निर्देशे** वचने उभयथा प्रयोगसंभवे भक्त्या प्रयुक्ते **अर्थस्य** शक्यस्य **सद्भावप्रतिषेधः** सत्त्वनिषेधः। तेन भक्त्या प्रयुक्तस्य शब्दस्य मुख्ये सञ्चाराद्दूषणा-

१— न इति ग पुस्तके नास्ति। २—० कम्बलवत्वात् ग। ३—० राद्दूषण० क।

भिधानमुपचारच्छलमित्यर्थः। यथा मञ्चाः क्रोशन्तीति। अत्र कथमचेतने क्रोशनमिति दूषणं लोकसिद्धलक्षणाय प्रयोगेषु वक्तुर्दोषः। स्वकल्पितलक्षणायामेव तद्दोषत्वात् प्रतिज्ञाहेतूदाहरणा[1]द्याश्रयत्वादिदं बहुविधम्। अयं माणवकः सिंहः, अयं पुरुषशार्दूलो राजसिंहस्य, अयं देशो घोषवासयोग्यो गङ्गात्वात्। अयं ध्वनिहेतुः क्रोशकत्वात् मञ्चवदित्याद्यूह्यम्। भक्त्या प्रयुक्तस्य भक्त्यन्तरेऽपीदं द्रष्टव्यं, शक्त्या प्रयुक्तस्य भक्त्येव वाक्छले।१।२।१४।

[छलपरीक्षा]

वाक्छलमेवोपचारच्छलं तदविशेषात्।१।२।१५।

अत्र पूर्वपक्षसूत्रम्—"वाक्छल···विशेषात्"। तदविशेषात् तात्पर्यसञ्चाराविशेषादित्यर्थः। अत्र तदविशेषादिति सूत्रबहि[र्भूत]मिति जयन्तः। तन्न, सौत्रे साध्ये सौत्रस्यैव हेतोर्युक्तत्वात्। वार्तिककृता तु तच्छून्ये यदिति सूत्रमिति कृतम्। तदाद्यभागाभिप्रायेण। अत एव टीकायां तदन्तर्भावेन प्रत्याहारः।

न तदर्थान्तरभावात्।१।२।१६।

सिद्धान्तसूत्रम्—"न···भावात्"। तस्योपचारस्य वाक्छलभेदकरूपार्थान्तरसद्भावादित्यर्थः। शक्तिभक्तिभ्यां विशेषादिति।१।२।१६।

अविशेषे वा किञ्चित्साधर्म्यादेकच्छलत्वप्रसङ्गः।१।२।१७।

विपक्षे बाधकमाह—"अविशेषे···प्रसङ्गः"। एवमभ्युपगतं छलद्वित्वमपि निवर्तेत इत्यर्थः। ननूक्ते अनुक्तत्वस्यानुक्ते उक्तत्वस्यारोपेण दूषणं, तस्य छलत्वात् कान्तर्भावः? सामान्यच्छलएवेति प्रपञ्चितं मयैव तर्कताण्डवे।१।२।१७।

[पुरुषाशक्तिलिङ्गकप्रकरणम् ३।४।]

[जातिलक्षणम्]

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः।१।२।१८।

अथ पुरुषाशक्तिलिङ्गसामान्यप्रकरणम्। तत्रापि प्रतिज्ञाहान्याद्यपेक्षया अनुद्भटापराधतया परव्यामोहनहेतुत्वाज्जातेरपि निग्रहस्थानत्वस्य लक्षणीयत्वात्।

प्रथमं जातिलक्षणाय सूत्रम्—"साधर्म्य···जातिः"। **साधर्म्येण वैधर्म्येण च यत् प्रत्यवस्थानम्** प्रतीपमवस्थानं सा जातिरिति स्वरूपकथनेनोत्तररूपत्वं दर्शितम्। सामान्यलक्षणं च सूचितम्। तत्त्वस्य व्याघातकमुत्तरं जातिरिति। सर्वं चेदं पञ्चम उपपादयिष्यामि।१।२।१८।

१—इहैव ख. ग. मातृकयोः समाप्तिः।

[निग्रहस्थानलक्षणम्]

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ।१।२।१९।

निग्रहस्थानेनैव कथावसानादर्थतः पश्चात्तदभिधानमिति तल्लक्षणाय सूत्रम्—"विप्रतिपत्ति···निग्रहस्थानम्" । विप्रतिपत्तिः भ्रमः, अप्रतिपत्तिः प्रकृताज्ञानम्। तयोश्च परगतयोरयोग्ययोश्च स्वरूपेणोद्भावयितुमशक्यत [त्वात्] प्रतिज्ञाहान्यादिसामानाधिकरण्यानुपपत्तेश्च। तदुद्भावकोपाधिपरतया सूत्रं व्याख्येयमत एव **निग्रहस्य** तदुभयस्य **स्थानं** लिङ्गं प्रतिज्ञाहान्यादि निग्रहस्थानमित्युच्यते। परस्परनैरपेक्ष्यसूचनया [नाया] समास [करण] लक्षण [साधनस्य सामर्थ्यपरिज्ञा] नाभावलिङ्गत्वं निग्रहस्थानत्वमिति। तेनाप्रतिभादिसङ्ग्रहः ।१।२।१९।

तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ।१।२।२०।

इदानीं जातिनिग्रहस्थानविशेषलक्षणं सूचितमतस्तदप्रणयनसमर्थनाय सूत्रम्—"तद्विकल्पात्···वहुत्वम्"। तच्छब्देन जातिनिग्रहस्थानानुकर्षः। **विकल्पो** वैचित्र्यं नानात्वं तस्माद् बहुत्वमतस्तेषामिदानीं विशेषलक्षणप्रणयने अभ्यर्हितप्रमाणादिपरीक्षाविलम्बः स्यादिति शास्त्रतस्तदप्रणयणमित्यर्थः ।१।२।२०।

इति प्रथमोऽध्यायः ।

तीरभुक्तिमहीपालपरिषन्मुख्यसूरिणा ।
श्रीकेशवकवीन्द्रेण कृता सूत्रप्रकाशिका ॥[1]
अक्षि पञ्च ध्रुवश्चैव त्रि षडश्च [षट्वसु] युगन्धरः।
पश्चात् त्रिषट्वसुत्रीणि प्रथमाध्यायसूत्रकम् ॥
सम्बन्धमानमेयानि तत्पूर्वाङ्गं तदाश्रयः।
तत्स्वरूपं चोत्तराङ्गं प्रथमे चरमे पुनः॥
कथा च हेत्वाभासाश्च छलञ्चाशक्तिलिङ्गकम्।
सप्तश्रुती, ग्रहाम्भोधी, ग्रहाश्वौ, वासवर्तुकौ ॥
जीमूतवाहावाद्यन्ताह्निके प्रकरणं क्रमात्।

इति—प्रथमाध्याये सूत्रम् ६०।

———

१—इति महामहोपाध्यायवेदान्तव्यासश्रीकेशवमिश्रकृते गौतमीयसूत्रप्रकाशे प्रथमोऽध्यायः। ओं नमः कृष्णाय, ओं नमो भगवते वासुदेवाय। ल० सं० ४३४। इति क मातृकापुष्पिका।

द्वितीयोऽध्यायः

प्रथमाह्निकम्

[मङ्गलाचरणम्]

ओं नमो भगवते वासुदेवाय

राधापीनपयोधरभूधरधाराधरः कृष्णः ।
शेषफणावलिकोमलकमलवनीषट्पदः पायात् ॥

इह न्यायारण्ये प्रकृतिगहने तर्कसरणि—
प्रवीणा विद्वांसः कति कति न पूर्वं समभवन् ।
परं पञ्चाध्यायीपरिणतरहस्यप्रणयिणो
विरोधव्यासेधव्यसनपटवः केचन पुनः ॥

सुखेनाध्यापयन् काश्यां न्यायवेदान्तदर्शने ।
श्रीकेशवकविश्चक्रे न्यायसूत्रप्रकाशनम् ॥
परिचिक्षिषमाणेन पदार्थानपि षोडश ।
प्रमाणानि परीक्ष्यन्ते धर्मिधर्मविभागतः ॥

[अवतरणम्]

इह ष[ख]लु पूर्वाध्याये यावदुद्दिष्टलक्षणपर्याप्ताविदानीं शिष्यजिज्ञासापेक्षया परीक्षापर्व समारभ्यते । तत्र हेतुहेतुमद्भावलक्षणा सङ्गतिः । परीक्षाया लक्षणानुपपत्तिनिर्णेजनरूपतया तदपेक्षत्वात् । प्रसङ्गो वा जात्यादिसामान्यलक्षणानन्तरं तद्विशेषलक्षणप्रसक्तौ शिष्याणां परीक्षायाः जिज्ञासायामुपेक्षानर्हत्वात् । अवसर एव वा प्रमाणलक्षणानुपदमेव तद्धेतुकतत्परीक्षायां प्राप्तायां प्रमेयादिलक्षणजिज्ञासायाः प्रतिवन्धिकाया अपगमात् । अत्र प्रमाणपरीक्षा द्वितीयाध्यायार्थः । परीक्षापदेन चात्र करणव्युत्पत्त्या तद्धेतुर्युक्तिर्विवक्षिता । परीक्षाया निर्णयरूपतया एतदध्याया-[य]प्रतिपाद्यत्वात् । संशयादिपरीक्षायाः प्रसङ्गसङ्गतत्वेन एतदध्याय[या]प्रतिपाद्यत्वेऽपि मुख्यत्वाभावात् । मुख्यानेकार्थ एव वाक्यभेदात्, अन्यथातिप्रसङ्गात् । तत्राप्युद्दिष्टरूपवत्तया प्रमाणपरीक्षा प्रथमाह्निकार्थः । तेनैव रूपेण जिज्ञासोत्पत्तेः । तदनुरोधित्वाच्च परीक्षायाः । तदतिरिक्तरूपवत्तया प्रमाणपरीक्षा द्वितीयाह्निकार्थः ।

प्रत्यक्षादिधर्मिपरीक्षा प्रथमाह्निकार्थः । चतुष्ट्वादितद्धर्मपरीक्षा द्वितीयाह्निकार्थं इति वृद्धाः ।

तत्र प्रथमाह्निके नव प्रकरणानि । तानि च यथास्थानं वक्ष्ये । प्रथमं संशयपरीक्षाप्रकरणम् । उद्देशाद्यनुरोधात् प्रमाणपरीक्षाया मुख्यत्वेऽपि संशयस्य परीक्षाङ्गत्वात्, "विमृश्येति" सूत्रात् [१ १।२२।] । स च संशयो विचारफलत्वाभिमतनिर्णयसमानाधिकरणो विचारनिर्वर्तनीयाङ्गमिति संक्षेपः ।

[संशयपरीक्षाप्रकरणम् ७।१]

समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः ।२।१।१।

तत्र पूर्वपक्षसूत्रम्—"समाना·····संशय." । समानादनेकाच्च धर्मात् स्वरूपसतो न संशयः । किन्तु तदध्यवसायात् । वा शब्दः समुच्चये । इवार्थ इति **कश्चित्** । यद्वा अनेकस्य धर्मो अनेकधर्मोऽनेकस्माद् व्यावृत्तो धर्म इति वा । आद्ये अनेकधर्माध्यवसायात् अन्त्येऽन्यतरधर्माध्यवसायादिति । एतेनान्यतरधर्माध्यवसायादित्यभुक्तिवान्तिरिति निरस्तम् । यद्वा समानस्य धर्मस्य ज्ञानात् तद्भिन्ने धर्मिणि न संशयः, अतिप्रसङ्गात् । यद्वा न निश्चयात् संशयो वैरूप्यात् । समानादिधर्मादेरुभयतो व्यभिचारान्न हेतुत्वं किन्तु कोटिस्मृत्युपक्षीणत्वम् ।२।१।१

विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ।२।१।२।

पुनराक्षिपति—"विप्रति···सायाच्च" । नैताभ्यां संशयोऽपि तु तज्ज्ञानादिति सूत्रार्थः ।२।१।२।

विप्रतिपत्तौ च संप्रतिपत्तेः ।२।१।३।

अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः ।२।१।४।

स्वरूपविरोधाद् विप्रतिपत्त्यव्यवस्थे स्तः [ते द्वे] एव नेति सूत्राभ्यामाह—"विप्रतिपत्तौ च संप्रतिपत्तेः", 'अव्यवस्थात्मनि·····व्यवस्थायाः" । न संशय इत्यनुषज्यते ।२।१।३-४।

तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः ।१।२।५।

दोषान्तरमाह—'तथात्यन्त·····पत्तेः ।" तस्य संशयधर्मिणो ये धर्माः समानादयस्तेषां सातत्येनोपपत्तेः । [इति धर्म] सातत्यात् संशयेऽपि सातत्यं स्यादिति सूत्रार्थः । धर्ममात्रात् संशय इति भ्रमवतः शङ्केति [भावः] ।२।१।५।

यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा ।२।१।६।

अत्र सिद्धान्तसूत्रम्—"यथोक्ता·····संशयो वा" । **यथोक्तानां** समानादिधर्माणा**मध्यवसायात** ज्ञानात् संशयो न स्वरूपसद्भ्य एव तेभ्यः । येन पश्चाद् विशेषदर्शने सति अकारणात् पूर्वमपि तददर्शनेऽपि न कुर्यादित्यसंशयः । पूर्वं वा कारणात् पश्चादपि विशेषदर्श[ने]नोपकुर्यादित्यत्यन्तसंशयः स्यादित्यर्थः । ज्ञानलाभश्च संशयलक्षणसूत्र [१।१।२२।] स्थोपपत्तिपदादुपलब्धिवचनात् विषयेण विषयिणो वा लक्षणादित्यादि तत्रैवोक्तम् ।

ननूपपत्तिशब्दः सत्तावचनः । असत्यपि तस्मिन्नुपलब्धिमात्रेण संशयदर्शनात् । न च जन्यजनकज्ञानयोर्भिन्नविषयत्वं, बहुव्रीहेः समानधर्मवद्धर्मिज्ञानस्य हेतुतयैक-विषयत्वात् । सारूप्यन्तु कारणत्वेन तन्त्रम् । विसदृशयोरपि तथाभावात् । न च व्यभिचारः, विशेषादर्शनादेः सहकारित्वात् समानादिधर्मदर्शनाच्च । न स्मृतिमात्रो-पयोगः, पुरोवर्तिनिष्ठोर्ध्वत्वदर्शनोद्बोधितसंस्कारजस्मृत्या पुरोवर्तिन्येव संशयदर्शनात् । अन्यथा विषयानियमप्रसङ्गात् । असाधारणधर्मस्यापि हेतुत्वं तज्ज्ञानपर्यवसन्नम् । तथा च व्यावृत्तेरपि स्मारकत्वे व्यावर्तकतया तदुपयोगोऽस्त्येव । व्यावृत्तिमात्रेण कोटिस्मृतेरजननात् । अव्यवस्थादूषणस्त्वनुक्तोपालम्भः । न ह्यसौ संशयहेतुः, पूर्वपद-विशेषणत्वात् । विशेषापेक्ष इति [१।१।२२] लक्षणसूत्रे प्रोक्तमेवेति विषयापेक्षया विप्रतिपत्तिः, स्वरूपापेक्षया तु संप्रतिपत्तिः । एवमव्यवस्थायामपीति द्विसूत्र्यां समा-धानमिति दिक् ।२।१।६।

यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः ।२।१।७।

अथ संशयवत् प्रयोजनमपि परीक्षामूलं पूर्वानुसन्धेयं च । सन्दिग्धेऽपि निःप्रयोजने परीक्षानवतारात् । अतस्तदपि परीक्ष्यमिति शङ्कायामिमां परीक्षां प्रयोजनेऽप्यतिदिशति "यत्र···प्रसङ्गः" । यत्र क्वचित् संशयः स्यात् तत्रैवमुत्त-रोत्तरप्रसङ्गः कर्तव्य उत्तरोत्तरप्रयोजनादिपरीक्षाप्रसङ्गः ।

प्रयोजने संशय एव नास्तीति सूत्रार्थ इति कश्चित् ।

वृद्धास्तु जिज्ञासोर्विचारकत्वात्, सन्दिग्धस्य च जिज्ञासुत्वात्, संशयपूर्वकत्वात् सर्वपरीक्षाणां, परिचिक्षिष्यमाणेन संशयाक्षेपहेतुभिर्न संशयः प्रतिषेद्धव्यः । अपि तु परैरेवमाक्षिप्तः संशय उक्तेः [क्तैः) समाधानहेतुभिः शास्त्रे वादे च समाधेय इति सूत्रार्थ इत्याहुः ।२।१।७।

[प्रमाणसामान्यलक्षणपरीक्षाप्रकरणम् ।१३।२।]

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः ।२।१।८।

एवं संशयपरीक्षाप्रकरणपर्याप्ताववसरत आनन्तर्याद् वा प्रमाणपरीक्षा । प्रमेयोद्देशात् प्राक् प्रमाणस्यैवोद्देशात् । तत्रापि सामान्यलक्षणपूर्वकत्वात् विशेष-लक्षणानाम्, आदौ प्रमाणसामान्यलक्षणपरीक्षा । तत्र पूर्वपक्षसूत्रम्—"प्रत्यक्षा··· सिद्धेः" । प्रमेयापेक्षया प्रमाणानां पूर्वापरसहभावानुपपत्तेस्त्रिषु कालेष्वसाधकत्वादि-त्यर्थः ।२।१।८।

तत्र "त्रैकाल्यासिद्धे" [२।१।८] रिति हेतोरसिद्धिपरीहाराय त्रिसूत्री ।

पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षोत्पत्तिः ।२।१।९।

"पूर्वं···प्रत्यक्षोत्पत्तिः" । यदि प्रमेयादर्थात् पूर्वं प्रमाणमुत्पद्यते । ततश्च प्रमाणात् पूर्वं नासावर्थः । प्रमेयार्थस्य प्रमाघटितसूर्तेरभावादितीन्द्रियार्थसन्निकर्षेत्यादि-सूत्र [१।१।४] व्याघात इत्यर्थः ।२।१।९।

पश्चात् सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ।२।१।१०।

यदि प्रमेयात् पश्चात् प्रमाणानां सिद्धिस्तर्हि न प्रमाणेभ्यः प्रमेयसिद्धिः स्यात् । उत्तरवृत्ते रहेतुत्वात् । वस्तुस्वरूपस्य प्रमाणानधीनत्वेऽपि प्रमेयत्वं तस्यैतदधीनम् । प्रमाणात् पूर्वं तत्सत्त्वे च तदपि तदधीनं न स्यादित्यर्थः ।२।१।१०।

युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम् ।२।१।११।

प्रमाणस्य प्रमेयेन **युगपत्सिद्धौ** उत्पत्तौ गन्धादिषु इन्द्रियादिषु युगपदुत्पन्नेषु बुद्धयोऽपि प्रत्यर्थगनियतास्तथेति तासां क्रमवृत्तित्वं दृष्टं न स्यादिति तद्व्याघातः । युगपज्ज्ञानानुत्पत्तेरिति सूत्र [१।१।१५।) व्याघातश्चेति सूत्रार्थः ।२।१।११।

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ।२।१।१२।

सिद्धान्तसूत्रम्—"त्रैकाल्या···पत्तिः" । उक्तायास्त्रैकाल्यासिद्धेः प्रतिषेधेऽपि सम्भवात् स्वव्याघात इत्यर्थः ।२।१।१२।

सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः ।२।१।१३।

दोषान्तरमाह—"सर्व···पत्तिः" । यदि सर्वं प्रमाणं प्रतिषिध्यते तदा त्रैकाल्यासिद्धेरित्यस्यापि प्रत्यक्षादिप्रामाण्यनिषेधे प्रामाण्यं न स्यात् । तथा च सिद्धं प्रत्यक्षादीनां प्रामाण्यमित्यर्थः ।२।१।१३।

तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः ।२।१।१४।

तत्प्रामाण्ये प्रतिषेधलक्षणप्रयोगावयवाश्रितानां प्रत्यक्षादीनां प्रामाण्यम् । एतदुदाहरणाद्यवयवग्राहकप्रामाण्याप्रामाण्ययोर्व्याघात इति भावः ।२।१।१४।

[त्रैकाल्याप्रतिषेधश्च] शब्दादातोद्यसिद्धिवत् तत्सिद्धेः ।२।१।१५।

असिद्धतोद्भावनपरं सूत्रम्—"शब्दात् तत्सिद्धेः" । प्रमाणप्रमेययोः पूर्वापरसहभावे न नियमः । यथादर्शनं व्यवस्थानात् । यथा पश्चात् सिद्धाच्छब्दादातोद्यस्य वीणादेः पूर्ववर्तिनः सिद्धिः । पिपीलिकाण्डसञ्चरणेनोत्तरकालवर्षस्य च संयोगिना धूमेनाग्नेः प्रस्तुतस्य सिद्धिः । यत् पुनराक्षिप्यते यदनियतं तन्न परमार्थसत् । यथा रज्ज्वामारोपितं सर्पत्वम् । तामेव हि कश्चित् सर्प इति कल्पयति कश्चिद् वा [धारेति न तथा] प्रमेयव्यवहारः । तस्मान्न परमार्थसन्नि[न्ने]ति [भावः] २।१।१५।

प्रमेया च तुलाप्रामाण्यवत् ।२।१।१६।

तत्र समाधिसूत्रम्—"प्रमेया···प्रामाण्यवत्" । निमित्तासमावेशेन संज्ञासमावेशोपपत्तावप्रयोजकमिदम् । तत्रैतन्निदर्शनं **प्रमेया** चेत्यादि । यदि[दा]हि तुलान्तरेण तत्प्रामाण्यं निश्चीयते तदा प्रमेया । यदा तु सुवर्णादिगुरुत्वं प्रमापयति तदा प्रमाणम् ।

एवमन्यत्रापि निमित्तसमावेशात् । तत्तु व्यपदेशविषयत्वम् । यथा आत्मैव कर्म कर्ता करणं च ।२।१।१६।

प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः ।२।१।१७।

ननु प्रत्यक्षादीनामुपलब्धिः ससाधना निःसाधना वा ? आद्येऽपि प्रत्यक्षादिसाधना तदन्यसाधना वा ? आद्येऽपि तयैव व्यक्त्या तद्ग्रहणं व्यक्त्यन्तरेण वा ? तयैव चेत् आत्मनि क्रियाविरोधः । व्यक्त्यन्तरेण चेदनवस्था । अतस्तदन्यसाधनेति वक्तव्यम् । तत्र चायं दोष इत्याह—"प्रमाणतः···प्रसङ्गः" । न च प्रमाणान्तरमुपेयते ततो न प्रमाणाधीना [प्रमाण] सिद्धिरित्याशयः ।२।१।१७।

तद्विनिवृत्तेर्वा प्रमाणसिद्धिवत् तत्सिद्धिः ।२।१।१८।

निःसाधनेति पक्षे प्रमेयेऽपि तदापत्तिरित्याह—"तद्विनिवृत्तेः···तत्सिद्धिः" । २।१।१८।

न प्रदीपप्रकाशसिद्धिवत् तत्सिद्धेः ।२।१।१९।

अत्र सिद्धान्तसूत्रम्—"न प्रदीप···तत्सिद्धेः" । यथा प्रदीपप्रकाशः प्रत्यक्षाङ्गत्वात् पटादि प्रकाशयति तञ्च प्रत्यक्षा [न्तरा]दि । तथा प्रमाणान्यपि । चतुर्णामन्यतमेनैव चतुर्णामुपलम्भात् नानवस्था । तत एवोपलब्धिसम्भवे पञ्चमाद्यनङ्गीकारात् । किञ्चिद् विज्ञानमेव करणं, यथा धूमज्ञानादि । किञ्चिदज्ञानरूपं, यथा चक्षुरादि । तत्र पूर्वं स्वोत्पत्तौ चक्षुराद्यपेक्ष[क्ष्य]ते । द्वितीयेऽपि किञ्चिदनपेक्षमेव । यथा श्रोत्रसमसीमापेक्षमप्यज्ञानरूपत्वानुज्ञापकापेक्षं तदपि न सर्वथैवाज्ञेयं येन तल्लक्षणपरीक्षाव्याघातः स्यात् । किन्तु बुभुत्सया तदपि शक्यज्ञानं सा च कदाचिदेव क्वचिदिति नानवस्थेति ।२।१।१९।

क्वचिन्निवृत्तिदर्शनात् तदनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः ।२।१।२०।

केचित्तु यथा प्रदीपप्रकाशो न प्रकाशान्तरमपेक्षते तथा प्रमाणांन्यपि न प्रमाणान्तरापेक्षाणि किन्तु स्वत एव प्रकाशन्ते इति वदन्ति । तान् प्रत्याह—"क्वचित्···दनेकान्तः" । क्वचित् प्रकाशादौ प्रकाशान्तरनिवृत्तिः । क्वचिद् घटादौ तदनिवृत्तिरित्यनेकान्तदृष्टान्तमात्रान्न तन्निवृत्तिः । विपरीतदृष्टान्तस्यापि दर्शनात् । अथ हेतुरुपादीयते प्रमाणानि सजातीयानपेक्षानि[णि] प्रकाशत्वात् प्रदीपवदिति वदन्ति ।

अत्र साजात्यं किमात्यन्तिकं विवक्षितमथ यथा कथञ्चित् प्रकाशकत्वेन वा । नाद्यः, सिद्धसाधनात् । चक्षुरादेश्चक्षुराद्यन्तरानपेक्षत्वात् । नेतरः, दृष्टान्तस्य साध्यविकलत्वात् । प्रदीपादेरपि चक्षुराद्यधीनप्रकाशकत्वादिति भावः ।२.१।२०।

[प्रत्यक्षपरीक्षाप्रकरणम् ।६।३।]

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् ।२।१।२१।

एवं प्रमाणसामान्यं परीक्षितमिदानीमुद्देशक्रमानुरोधात् प्रत्यक्षपरीक्षाप्रकरणमारभ्यते । सामान्यविशेषपरीक्षयोर्हेतुहेतुमद्भावोऽवान्तरसङ्गतिरपि । अत्र च "इन्द्रियार्थसन्निकर्षोत्पन्नम्" [१।१।४] इत्यादौ प्रत्यक्षलक्षणे यथार्थत्वायथार्थत्वसंशयः वाक्यार्थत्वसमानधर्मदर्शनेन । प्रयोजनञ्चात्मादिप्रमेयत्वाधिगतिरेव । तत्परीक्षायाः प्रमाणपरीक्षासाध्यत्वात् । अत्रैवं पूर्वपक्षी मन्यते इन्द्रियार्थसन्निकर्षः सामग्रीत्वेन लक्षणमथ कारणत्वेन ? आद्ये सूत्रम्—"प्रत्यक्ष···वचनात्" । तावन्मात्रं न सामग्री, किन्तु आत्ममनोयोगादिरपि । स च नाभिहित इत्यर्थः । अन्त्ये ज्ञानमात्रेऽतिव्याप्तिरिति हृदयम् ।२।१।११।

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः ।२।१।२२।

नन्वात्ममनःसंयोगो न तत्कारणमित्यत्र सूत्रम्—"नात्म···क्षोत्पत्तिः" । अन्यथा युगपदुत्पद्येरन् बुद्धयः । तथा च युगपज्ज्ञानानुत्पत्तिरिति [१।१।१५।] सूत्रविरोधः ।२।१।२२।

दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः ।२।१।२३।

अथ सति भावमात्रमेव कारणताग्राहकं व्यतिरेकस्य दैवागतत्वेनावर्जनीयत्वात् आत्ममनःसंयोगादेः कारणत्वे तदपरिगणनादसमग्रतां मन्वानस्य निराकरणाय पूर्वपक्षिण एव सूत्रम्—"दिग्देशः······प्रसङ्ग" । तथा सत्येवमपि कारणत्वं स्यात् । न चैवं, तस्मादुक्तयुक्तेरेवात्ममनोयोगादेः कारणत्वादसमग्रतेत्यर्थः । यद्वा पृथगेवाक्षेपः । सति भावमात्रेण दिगादीनामपि कारणतयैवंप्रसङ्गः परिगणनप्रसङ्गः । पूर्वाक्षेपसाधारणतया च न पृथङ् निराकरणं तावन्मात्रस्य त्वस्याकारणत्वाच्चेति ।२।१।२३।

ज्ञानलिङ्गत्वादात्मनो नानवरोधः ।२।१।२४।

सिद्धान्तस्तु नेदं कारणत्वावधारणार्थं सूत्रम्, अपि तु लक्षणार्थम् । तच्चोपलक्ष्य साक्षात्कारिजातीयज्ञानकरणत्वम् । तत्र च नोक्तदोषः । यथाश्रुतेऽपि तदेव वाच्यम् । यल्लक्षणपर्यवसायि आत्ममनोयोगस्त्वतिव्यापक इन्द्रियमनोयोगोऽप्यव्यापकः । आत्मसुखादिसाक्षात्कारे तदभावादित्यादिप्रत्यक्षलक्षणसूत्रोक्त [भाष्य] मभ्युपेत्य समाधानान्तरप्रदर्शनाय सूत्रम्—"ज्ञानलिङ्ग · नानवरोधः" । नानवरोधः आत्ममनोयोगस्येति शेषः । ज्ञानसमवायिकारणत्वेनात्मनः सिद्धौ असमवायिकारणापेक्षायामात्ममनःसंयोगस्यैव सिद्धेरित्यर्थः २।१।२४।

तदयौगपद्यलिङ्गत्वाच्च न मनसः ।२।१।२५।

अनवबो [रो]ध इत्यनुपद्यते । ज्ञानायौगपद्य [लिङ्गत्वात्] सिद्धत्वात् इन्द्रियमनःसंयोगेऽपि ज्ञानकारणं सिद्धयति । क्रमिकाधिष्ठायकसंयोगं विना व्यासङ्गा-नुपपत्तेरित्यर्थः ।२।१।२५।

सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् ।२।१।२६।

[आत्ममनोयोगस्य सर्वत्र प्रमाणे समानत्वात् गुणत्वमिन्द्रियार्थयोगस्य च प्रत्यक्षमात्रप्रमाणसाधनत्वात् प्राधान्यमिति प्राधान्यरूपो] द्देशोपन्यासे [प्रयोजनमाह] —"सुप्त···निमित्तत्वात्" । ज्ञानोत्पत्तेरिति शेषः । कारणत्वाविशेषेऽपि इन्द्रिया-र्थसन्निकर्षस्य साध्यत्वे [प्राधान्ये]नाभिधानम् । प्राधान्ये च सौत्रो हेतुः । यतः सुप्तस्तीव्रेण शब्दादिना अर्थेन इन्द्रियसन्निकर्षाद् बुध्यते । व्यासक्तश्च तत एव विषयान्तरं जानीते । नहि तत्र पुरुषप्रणिधानाद्यस्ति । अतस्तस्य प्राधान्यं नत्वेव-मन्ययोरित्यर्थः ।२।१।२६।

तैश्चापदेशो ज्ञानविशेषाणाम् ।२।१।२७।

प्रयोजनान्तरप्रर्शनाय सूत्रम्—"तैश्चापदेशो··· विशेषाणाम्"। तैरिन्द्रियै-रर्थैश्च व्यपदेशः चक्षुर्ज्ञानम् रूपज्ञानमिति । तथा च तद्विशेषलक्षणलाभः प्रयोजन-मेतस्योपादाने नत्वेवमन्ययोरित्यर्थः ।२।१।२७।

व्याहतत्वादहेतुः ।२।१।२८।

सिद्धान्तिनैवमिन्द्रियसन्निकर्ष एव प्रत्यक्षकारणमित्युक्तमिति मन्वानस्या [न आ]क्षिपति—"व्याहतत्वादहेतुः" । नायं विशेषोपादाने हेतुः । आत्ममनःसंयोगा-दीनामकारणत्वे व्याघातादिति सूत्रार्थः ।२।१।२८।

नार्थविशेषप्राबल्यात् ।२।१।२९।

परीहारसूत्रम्—"नार्थ···प्राबल्यात्" । नास्ति व्याघातः । अनेन हीन्द्रियार्थ-सन्निकर्षस्य प्राधान्यमुच्यते । न त्वितराकारणत्वम् । तच्चार्थविशेषस्य शब्दादे-रिन्द्रियस्य च श्रोत्रादेः प्राधान्यात् । सुप्तव्यासक्तमनसां प्रबोधविषयमन्तरा [इन्द्रिया-र्थयोरेव पाटवलक्षणेन प्राधान्येन ज्ञानोत्पत्तेर्दर्शनात्] ।२।१।२९।

[प्रत्यक्षस्यानुमानत्वपरीक्षाप्रकरणम् ।७।४।]

प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः ।२।१।३०।

एवं साक्षाल्लक्षणाव्याप्त्यादिनिरासेन प्रत्यक्षलक्षणं परीक्षितमिदानी प्रसङ्गाद्-विषयतस्तदेव परीक्ष्यते । [न चैकदेशोपलब्धिरवयविसद्भावादि २।१।३२] मित्यादि-

सूत्रं पूर्वप्रकरणान्तर्भूतम्। अवयविप्रकरणं तु साध्यत्वादवयविनिसन्देह [२।१।३३।] इत्येतत्सूत्र[ादा]मारभ्यते। अत एव भाष्यवार्तिकादिमतकीर्तनम्। अवयविनश्चा-वस्थातत्प्रसङ्गौ सङ्गती इति प्राञ्चः।

विद्यासागरादयस्तु प्रत्यक्षविषयत्वेन प्रसङ्गागतावयव्यपह्नवे विषयापह्नवः। एवं प्रत्यक्षलक्षणप्रवृत्तिः [निराधारा। विषयाभावे] लक्ष्याभावादाश्रयासिद्धं विभागा-नुपपत्तिश्चेति परम्परया लक्षणानुकूलो विचार इतीत एवावयविपरीक्षैव प्रकरणार्थः। अत एव नहि अवयवी कश्चिद [र्थान्तरभूत] इत्यादि [परमतं निरसितुं] प्रथम-तोऽवयव्येवाक्षिप्त इत्याहुः।

तत्र पूर्वपक्षसूत्रम्—"प्रत्यक्ष···दुपलब्धे."। प्रत्यक्षत्वेनाभिमतं वृक्षादिज्ञानम् अनुमानमेकदेशग्रहणाद् वृक्षेऽपि [उप]लब्धेः। अयमर्वाग्भाग एतज्जातीयभागान्तर-संबद्धः [अवयवत्वात्] एतादृशम्लानपत्रादिभागवत्, तथाभूतार्थक्रियाकारित्वाद् वा दृश्यमानोभयभागवृक्षान्तरार्वाग्भागवदित्यनुमानम्। न चैतद्भागद्वयातिरिक्तः कश्चिद-वयवी वृक्षधीविषयः अवयविविषयत्वे बाधकादित्यभिमानेनाक्षेपः। न चैवमेकदेशो-पलब्धेरेव प्रत्यक्षत्वस्वीकारः। तस्या अनुमितत्वात्। परमाणूनामतीन्द्रियत्वात् अवयविनश्चाभावात्। न चानवस्था क्वचिच्छब्दात् तत्स्मृतेर्वा तदुपस्थितेः।२।१।३०।

न प्रत्यक्षेण यावत्तावदुपलम्भात् ।२।१।३१।

सिद्धान्तसूत्रम्—"न···लम्भात्"। इदं प्रत्यक्षमात्रस्यैवानुमानाद् भेदव्युत्पाद-नम् तद्विशेषस्य वा ? आद्ये सूत्रमिदम्। एकदेशावगमस्याप्यन्ततः प्रत्यक्षत्वेनेष्टत्वा-दित्यर्थः। न हि प्रत्यक्षाभावे प्रमाणान्तरस्यापि सम्भवः। सकलप्रमाणमूलत्वात्तस्य। न वा संस्कारः स्मृतिहेतुः, अननुभूते तदसंभवादित्येकदेशग्रहणं नानुमानमिति विरुद्धो हेतुः। लिङ्गग्राहकमानबाधतश्च ।२।१।३१।

न चैकदेशोपलब्धिरवयविसद्भावात् ।२।१।३२।

द्वितीय[कल्प]निराकरणसूत्रम्—"न चैक···सद्भावात्"। न चैकदेशमात्र-स्येन्द्रियेणोपलब्धिरवयविनः सत्त्वेन तस्यापीन्द्रियेण ग्रहणात्। एकदेशसन्निकर्षे तदा-श्रितस्यावयविनोऽपीन्द्रियसन्निकर्षादित्यर्थः ।२।१।३२।

साध्यत्वादवयविनि सन्देहः २।१।३३।

अवयविसद्भावादित्ययं [२।१।३२।] हेतुः परं प्रत्यसिद्धः। विप्रतिपत्तेरपि संशयमात्रं स्यात् न निर्णयः। तदधीनत्वं च हेतुविशेषणमित्याह—"साध्य··· सन्देहः"। अवयवादन्योऽवयव्यस्तीति न सिद्धमस्तीत्यर्थः ।२।१।३३।

सर्वाग्रहणमवयव्यसिद्धेः ।२।१।३४।

अवयविनि बाधकप्रमाणनिरासेन तत्र विरोधप्रदर्शनमुखेन प्रत्यक्षप्रमाण-प्रदर्शनपरं सूत्रम्—"सर्वा···सिद्धेः"। महतोऽवयविनोऽसिद्धौ सर्वेषां गुणादीनां ग्रहणं

न स्यात्। महाद्रव्यद्वारकप्रत्यासत्त्यैव तद्ग्रहणात्। मानान्तरस्यापि मूलप्रत्यक्षाभावेऽनुपपत्तेः। अत एकः स्थूलोऽयमिति प्रत्यक्षमेवावयविनि प्रमाणमित्यर्थः।२।१।३४।

धारणाकर्षणोपपत्तेश्च ।२।१।३५।

प्रत्यक्षापरितुष्टं वादिनं प्रत्यनुमानप्रदर्शकं सूत्रम्—"धार···पत्तेश्च"। धारणाकर्षणे खलु संयोगविशेषौ निरवयवेऽसम्भाविता[ते ऽ]वयविनं साधयत इत्यर्थः। एकः स्थूलोऽयमिति प्रतीतिविषयो गोघटादिः समानकालीनानेकद्रव्यसमवेतस्तथाप्रतीयमानत्वादिति व्यतिरेकी।२।१।३५।

सेनावनवद्ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम् ।२।१।३६।

ननु असमुदायिनां विभज्याग्रहणेऽपि समुदायस्य प्रत्यक्षत्वं दृष्टमित्याक्षेपं समुदायिप्रत्यक्षत्वे भवत्येवं नान्यथेति समाधानं चाह—"सेना··दणूनाम्"।

गजादीनां तमालादीनां च दूरात् पार्थक्येनाग्रहेऽपि समुदायस्य ग्रहणमेकं महदितिधीर्भवति। यथैकं महद्वनमेका सेनेति शङ्का। केनचिन्निमित्तेनाग्रहणेऽपि योग्यता प्रत्येकमेव। परमाणौ तु प्रकृते न तथेति समाधिः।

अत्र परीक्षितं प्रत्यक्षमिति [२।१।३८।अवतरण] भाष्यदर्शनादवयविप्रकरणमपि प्रत्यक्षपरीक्षापरमिति। तेनैवैकोपाधिना [?] प्रकरणाभ्यामेकमाह्निकं नाशङ्कनीयम्। अवयविप्रकरणस्य प्रसङ्गागतत्वात् साक्षात्सङ्गतैकार्थकानेकप्रकरणस्यैवाह्निकत्वात्। २।१।३६।

[अनुमानपरीक्षाप्रकरणम् २।५।]

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् ।२।१।३७।

अथावसरतोऽनुमानपरीक्षाप्रकरणम्। तत्र पूर्वपक्षसूत्रम्—"रोधो···प्रमाणम्"। रोधादपि नदीपूर्णत्वम्, उपघातादपि पिपीलिकाण्डसञ्चारः, पुरुषादपि वाशितविशेषः। तत्कथं तैः कृतवृष्टिभाविवृष्टिमयूराणामनुमानम्? व्यभिचारादिति सूत्रार्थः। अत्र नदीपूरमयूरवाशिते शेषवत उदाहरणे। पिपीलिकाण्डसञ्चारश्च स्वकारणं भूतक्षोभमनुमापयति। स च स्वकार्यं वृष्टिमिति पूर्ववदुदाहरणम्। यदा वर्षसञ्चारयोः स्वाभाविकसम्बन्धविशेषज्ञानादनुमितिस्तदा सामान्यतो दृष्टोदाहरणमेतदिति ध्येयम्।

यद्यपि रोधोपघातादीनां व्यभिचारेऽपि अनुमानसामान्यविशेषलक्षणयोर्न काचित् क्षतिस्तथापि व्याख्यातृपरम्परातस्त्रयं सूत्रकारस्य लक्ष्यत्वेनाभिमतमिति लभ्यते। प्रमापकत्वगर्भं च लक्षणम्। तेन यातीत्यव्याप्तौ [?] पूर्वपक्षिणस्तात्पर्यम्। २।१।३७।

नैकदेशत्राससादृश्येभ्योऽर्थान्तरभावात् ।२।१।३८।

व्यभिचारादित्यसिद्धमित्यत्र सूत्रम्—"नैक···भावात्"। वेगवतः पूरविशेषाद् बहुपत्रकाष्ठादिमत उपरि वृष्टिर्वृष्टीनामाश्रयाद्यनुपघाते सञ्चरणाद् भाविवृष्टिः, शब्द-

विशेषात् षडजात् मयूरकं च जातु अनुमीयते। तथा च पूरसञ्चारशब्देषु वैजात्यमेव तेषामनुमापकम्, तच्चाव्यभिचार्यैवेति भावः।

अक्षरार्थस्तु यादृक् पूरं हेतुस्तदेकदेशः पूर्णत्वमात्रम् त्रासजश्च सञ्चारः, मयूर-शब्दसदृशः शब्दश्च भवता व्यभिचारित्वेन दृश्यते। ततश्चार्थान्तरभावो विद्यते सदुक्तहेतुषु इति।२।१।३८।

[वर्तमानकालपरीक्षाप्रकरणम् ।५।६।]

वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः ।२।१।३९।

एवं पूर्ववदादिद्वारा अनुमानपरीक्षानन्तरं वर्तमानपरीक्षाप्रकरणम्। तत्र चोपोद्घातः सङ्गतिः। त्रिकालविषयस्यानुमानस्य वर्तमानाभावे विषयापहारात्। [वर्तमान] कालसिद्धौ सत्याम् [अनुमानपरीक्षा। इदानीं तु तत्रैव] पूर्वपक्षसूत्रम्—"वर्त···पत्तेः"। **वर्तमानाभाव** इति साध्यम्। वृन्तात् प्रच्युतस्य फलस्य यः खल्व-तीतः स **पतितकालः**। योऽनागतः स **पतितव्यकाल**स्तद्भिन्नः कालो नास्त्येव यो वर्तमानः स्यात्। तथा च त्रैकाल्यविषयमनुमानमिति[१।१।५।भाष्ये]उक्तं हीयते। तयोश्च पितापुत्रादिवत् वर्तमानं विनाऽपि परस्परापेक्षासिद्धेः। प्रागभावप्रध्वंस-प्रतियोगिद्वयोरेव तत्त्वात्। तयोश्च स्वत एव विशेषादित्यर्थः।२।१।३९।

तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात् ।२।१।४०।

सिद्धान्तसूत्रम्—"तयो··क्षत्वात्"। वर्तमानं चेन्नास्ति तदातीतानागतयो-रप्यभावः स्यात्। तदपेक्षत्वादुभयोः। तथा हि धात्वर्थात्मिका क्रिया पतनादिका वर्तमानत्वव्यञ्जिका। यदि च पतनमसदेव तदा कस्य गुरुत्वं करणं, कस्य वा फलं कारकं कस्य वाऽधःसंयोगः कार्यः? तथा च वर्तमानध्वंसप्रतियोगित्वमतीतत्वम्। वर्तमानप्रागभावप्रतियोगित्वमनागतत्वमतो वर्तमानाभावे तयोरप्यभावः पतत इति व्यपदेशव्याघातश्चेत्यर्थः।२।१।४०।

नातीतानागतयोरितरेतरापेक्षा सिद्धिः ।२।१।४१।

न च परस्परापेक्षा कस्याप्यसिद्धेः। पितापुत्रादावपि निमित्तसमावेशात् संज्ञा-समावेश इत्याह—"नातीता···सिद्धिः"। अतीतानागतयोर्न परस्परापेक्षा सिद्धिः। न हि प्रागभावप्रध्वंसमात्रगर्भत्वमुभयोरपि तु वर्तमानगर्भत्वमित्युक्तम्।२।१।४१।

वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ।२।१।४२।

वर्तमानाभावे दूषणान्तरमाह—"वर्त···पत्तेः"। प्रत्यक्षं कारणं विषयः फलं वा सर्वं वर्तमानसापेक्षमतस्तदनुपपत्तावनुपपन्नमतो पुनः प्रत्यक्षाभावे मानान्तरमपि न स्यादिति मानमेव व्यवहारलोपे व्याघात इति सूत्रार्थः। स च वर्तमानः क्वचित् स्वरूपव्यङ्ग्यः, यथा इदानीं घट इति। क्वचित् क्रियाव्यङ्ग्यः, यथा अस्तीति।

क्वचित् क्रिया[सन्तान]व्यङ्ग्यः, यथा पचतीति। क्वचित् क्रियाभ्यासव्यङ्ग्यः, यथा छिनत्तीति दिक् ।२।१।४२।

कृतताकर्तव्यतोपपत्तेस्तूभयथा ग्रहणम् ।२।१।४३।

नन्वयं घटः श्यामोऽभूद् रक्तश्च भविष्यतीत्यतीतादिप्रत्ययो वर्तमानप्रत्ययश्च कथमेकस्य वर्तमानस्येत्यत आह—"कृतता···ग्रहणम्"। वर्तमानस्येति शेषः। **कृतता** अतीतता **कर्तव्यता** अनागतता तयोर्वर्तमाने ग्रहणमविरुद्धम्। न हि स्वरूपेण स्थितस्य [वर्तमानत्वं] गृह्यते किन्तु अतीतादिधर्मसम्बन्धात्। कालद्वयग्रहणं विशेषणस्यातीतादित्वात्। विशिष्टस्यापि तत्त्वं भासत इति सूत्रार्थः ।२।१।४३।

[उपमानपरीक्षाप्रकरणम् ।५।७।]

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ।२।१।४४।

सम्प्रत्युद्देशक्रमप्राप्तावुपमानप्रमाणपरीक्षाप्रकरणम्। तत्र पूर्वपक्षसूत्रम्—"अत्यन्त···सिद्धिः"। प्रसिद्धसाधर्म्यात् साध्यसाधनम् [१।१।६।] इत्युक्तम्। तत्र न साधर्म्यमात्रमतिप्रसङ्गात्। नाप्यात्यन्तिकम्, विवक्षिते तदभावात्। नापि [सादृश्य] धर्मघटितरूपं सामान्यतस्तस्यातिप्रसक्तत्वात् विशिष्य चाननुगमात्। नाप्यैकदेशिकं सर्वसाधारण्यादित्यर्थः। अत्र **साधर्म्य**शब्देन वैधर्म्यस्यापि सङ्ग्रहः। तेन [तद्धर्मसामा] न्याक्षेपो भवतीति ।२।१।४४।

प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ।२।१।४५।

सिद्धान्तसूत्रम्—"प्रसिद्ध···नुपपत्तिः"। प्रकर्षेण व्यावृत्तं सिद्धं व्यवस्थितं यत् साधर्म्यादिप्रवृत्तिनिमित्तोपनययोग्यं तज्ज्ञानादुपमितौ नोक्तदोष इत्यर्थः। प्रकरणाद्यपेक्षं हि वाक्यं स्वार्थबोधकं न केवलम्। तदिह प्रतीतमहिषादिकं पुरुषं परिषदा [प्रति यदा] यथा गौस्तथा गवय इति वाक्यमुच्चार्यते, तदाह [तदा] महिषादिपरिहान्या भूयःसाधर्म्यं विवक्षितमित्यवगम्य तद्वाक्यं स्मरन् महिषादिषु गोसादृश्यं पश्यन्नपि न गवयसंज्ञां निवेशयति। साधर्म्यादौ च न नियमः। किन्तु क्वचित् किञ्चित् साधर्म्याद्याश्रित्यातिदेशवाक्यं प्रवर्तते। तच्च प्रकरणाद्युन्नेयम्। यस्य तु न महिषादिव्यावृत्तविवक्षितसादृश्यप्रमितिस्तस्योपमितिर्भवत्येव नेति प्रामाणिकः पन्थाः ।२।१।४५।

प्रत्यक्षेणाप्रत्यक्षसिद्धेः ।२।१।४६।

आक्षेपसूत्रम्—"प्रत्य···सिद्धेः"। उपमानमनुमानमिति शेषः। **प्रत्यक्षेण** प्रतीतेन गवा **अप्रत्यक्षस्य** प्रतीतस्य गवयस्य प्रतीतेः। यत् प्रत्यक्षाप्रत्यक्षस्यार्थस्य प्रत्यायकं तदनुमानम्। यथा धूमादिर्वह्न्यादेरिति सूत्रार्थः ।२।१।४६।

नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्यामः ।२।१।४७।

समाधिसूत्रम्—"नाप्रत्यक्षे···पश्यामः" । उपमानस्य प्रमाणार्थम् [अनुमानत्वेन न पश्याम इत्यर्थः । संज्ञासंज्ञिसम्बन्ध] परिच्छेदेन [अ] प्रत्यक्षे गवये तत्प्रत्यक्षतादशायामेव तत्परिच्छेदादिति ।

अक्षरार्थस्तु [न] अप्रत्यक्षत्वार्थप्रत्यायकत्वात्, एवमनुमानव्यभिचारादपि । तदुक्तिपक्षे [गोसमान] धर्मा गवयपदवाच्य इत्युपमानार्थे तत्त्वम् । गवयत्वनिमित्तकत्वस्याप्रसिद्धेरन्वयव्यतिरेकव्याप्त्योरप्रतीतेः । प्रतीतौ वा किञ्चिन्मेयमिति भावः। २।१।४७।

तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः ।२।१।४८।

अनुमाने वैधर्म्यस्यैव प्रदर्शनाय सूत्रम्—"तथेति···विशेषः" । उपमानस्यानुमानार्थाद् विशेषः । उपमाने हि यथा तथेति [सादृश्यबोधकवाक्यप्रयोगः । अनुमाने तु न तथा ।] नहि [यथा] धूमस्तथा वह्निरित्यनुमानम् । अतः प्रवृत्तिभेदादुपमानं [नानु]मानमित्यर्थः ।२।१।४८।

[शब्दसामान्यपरीक्षाप्रकरणम् ।८।८।]

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ।२।१।४९।

अथोद्देशक्रमाच्छब्दसामान्यपरीक्षाप्रकरणम् । प्रमाणनिर्व्यूढे पूर्वपक्षसूत्रम्—"शब्दो···त्वात्" । अर्थस्यानुपलब्धेरप्रत्यक्षत्वात् अनुमेयत्वं वाच्यम् । तथा च शब्दजन्या प्रमितिरनुमितिः, असाक्षात्कारिप्रमात्वात् । सत[?]वदित्यर्थः । न हि प्रत्यक्षानुमानाभ्यामन्यत् प्रमाणमस्तीत्यभिमानः । प्रयोजनं चात्र पृथक् तदङ्गपरिशोधनाय प्रवृत्तिः । श्रवणमननयोः दुर्घटत्वाद् हेतुहेतुमद्भावरक्षा···।२।१।४९।

उपलब्धेरद्विप्रवृत्तित्वात् ।२।१।५०।

उपलब्धेः फलभूताया **अद्विप्रवृत्तित्वात्** अद्विप्रकारत्वात्, प्रमाणभेदादुपलब्धिभेदो दृष्टः । यथा प्रत्यक्षानुमानयोः, न त्वेवं [शाब्दे] पारोक्ष्यापारोक्ष्ययोस्तदुभयविश्रान्तत्वादिति हृदयम् । तथा च शब्दजा प्रमितिरनुमितिरिन्द्रियाजन्यप्रमितित्वादिति ।२।१।५०।

सम्बन्धाच्च ।२।१।५१।

हेत्वन्तरमाह—"सम्बन्धाच्च" । सम्बन्धस्य न [?] जन्यज्ञानजनकत्वादित्यर्थः । व्याप्तेरत्र सङ्केतस्यापि सम्बन्धत्वात् उपमानस्याप्यनुमानत्वात् । न तेन व्यभिचार इत्यभिगानः ।२।१।५१।

आप्तोपदेशसामर्थ्याच्छब्दादर्थसम्प्रत्ययः ।२।१।५२।

सिद्धान्तसूत्रम्—"आप्तो···· सम्प्रत्ययः" । असिद्धप्रमात्वादिनानुमितिनियतमङ्गापूर्वदेवतादेर्मानान्तरादनवगतौ व्याप्तिग्रहस्य शब्दं [शब्दं प्रति उप] मनुपजीव्याशक्यत्वात् । किन्त्वाप्तोपदेशवत्त्वादेव तदुपस्थितिरित्यर्थः । अमुनैव सूत्रेणाद्विप्रवृत्तित्वमपास्तम् । व्याप्तिपक्षधर्मतेऽनपेक्ष्याप्तेनोपदिश्यमानः शब्दो वाक्यार्थान्वयं जनयतीति प्रवृत्तिप्रकारभेदकथनात् । यः [यत्] सम्बन्धादिति तन्न । न ह्यत्र व्याप्तिरूपः सम्बन्धो गमकः किन्तु वाच्यवाचक[भाव]रूपः । प्राप्तिलक्षणस्तु शब्दार्थयोः सम्बन्धः प्रतिषिद्धः । वायुवनस्पत्योरिव प्रत्यक्षेणानुपलब्धेः । एकेन्द्रियग्राह्ययोर्हि प्राप्तिः प्रत्यक्षा । शब्दार्थयोश्च न तथात्वम् [इति] ।२।१।५२।

पूरणप्रदाहपाटनानुपलब्धेश्च सम्बन्धाभावः ।२।१।५३।

[सा च प्राप्तिः] नाप्यनुमानग्राह्येति तज्ज्ञापनाय सूत्रम्—"पूरण···भावः" । न तावदर्थः शब्ददेशमागच्छति । आगच्छतोऽनुपलब्धेः । प्रत्युत अ[न्नाग्न्य]सि शब्दानामुच्चारणे मुखपूरणादीनि स्युरिति लोकव्यवहारोच्छेदः ।

नाप्यर्थदेशं गच्छति शब्दः, अमूर्तत्वात् । न च तत्रैवोत्पद्यते, तद्धेतुस्थानकरणाद्यभावात् । प्राप्तश्च न संयोगः, शब्दस्याद्रव्यत्वात् । नापि समवायः, द्वयोरन्यत्राश्रितत्वादित्यर्थः ।२।१।५३।

शब्दार्थव्यवस्थानादप्रतिषेधः ।२।१।५४।

आक्षेपसूत्रम्—"शब्दार्थ···षेधः" । यदि शब्दार्थावसम्बद्धौ स्याताम्, शब्दादर्थप्रत्ययव्यवस्था न स्यात् । स च वाच्यवाचकभावो नियामकस्तस्यापि सम्बन्धान्तरनियम्यत्वात् । तस्मादस्ति शब्दार्थयोः स्वाभाविकः सम्बन्धो नियामक इति न तत्प्रतिषेध इत्यर्थः ।२।१।५४।

न, सामयिकत्वाच्छब्दादर्थसम्प्रत्ययस्य ।२।१।५५।

परीहारसूत्रम्—"न···प्रत्ययस्य" । अस्माच्छब्दादयमर्थो बोद्धव्य इत्येवं सङ्केतो यस्य शब्दस्य यत्रार्थे स तमर्थं बोधयति । अत एवार्थप्रत्ययव्यवस्था । न च सादिपदेष्वेव । तथा लाघवेन पदमात्रस्यैव तथात्वात् । स्वाभाविकसङ्केतग्रहेऽपि सम्बन्धस्यैवापेक्षणीयत्वात् ।२।१।५५।

जातिविशेषे चानियमात् ।२।१।५६।

अनुपपन्नश्च स्वाभाविक इत्याह—"जाति···नियमात्" । शब्दार्थयोः स्वाभाविकसम्बन्धे काव्यार्यम्लेच्छानां शब्दार्थव्यवस्थायामनियमो न स्यात् । यवशब्दादार्या दीर्घशूकं म्लेच्छास्तु प्रियङ्गुम् प्रतियन्ति तत्रैव प्रयुञ्जते च । एवं त्रिवृच्छब्दमृषयः स्तोत्रीयनवके [श्रोत्रियनवके] प्रयुञ्जते आर्यास्तु लताविशेषे ।

ननु सर्वे शब्दाः सर्वैरेवार्थैः स्वभावसम्बद्धास्तथाप्यसौ सम्बन्धो नाज्ञातो गमकः। न च तज्ज्ञानं सङ्केताद्युपायम्। कं [तं] विना स च क्वचिदेव कस्यचिदित्य नियमः स्यादिति चेत्, न प्रमाणाभावात्। न च तत्तदनियतार्थज्ञानानुपपत्तिरेव तत्र मानं, जातिभेदेनार्थभेदप्रत्ययस्य सङ्केतभेदादप्युपपत्तेरिति ।२।१।५६।

[शब्दविशेषपरीक्षाप्रकरणम् ।१२।६।]

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः ।२।१।५७।

एवं शब्दसामान्यपरीक्षायास्तद्विशेषपरीक्षाहेतुत्वात् शब्दविशेषपरीक्षाप्रकरणम्। ननु क्वचिदुद्देशे लक्षणे वा वेदो नाधिकृत इत्यलक्षितपरीक्षा स्यात्। [इति चेत्] न, साक्षादनधिकृतत्वेऽपि अर्थतोऽधिकृतत्वात्। तत्प्रामाण्यमव्युत्पाद्य शास्त्रस्य निःश्रेयसेन सङ्गमयितुमशक्यत्वात्। तस्य तदुपदिष्टेतिकर्तव्यतापेक्षणात्।

तत्र पूर्वपक्षसूत्रम्—"तदप्रामाण्यं···दोषेभ्यः"। तत्पदेन वेदः परामृश्यते। अत्रेष्टिकारीर्यादिर्वा ऐहिकफलकत्वेनैव काम्यमानत्वात्। क्वचिदैहिकं फलं न दृश्यत इत्यनृतत्वं तत्प्रतिपादकवेदस्य।

व्याघातः परस्परविरुद्धार्थबोधकता। यथा "उदिते होतव्यमनुदिते होतव्यं समयाध्युषिते होतव्य"मिति विहितमेव होममनूद्य व्याहन्ति। "श्यावोऽस्याहुतिमभ्यवहरति य उदिते जुहोति, शबलोऽस्याहुतिमभ्यवहरति योऽनुदिते जुहोति, श्यावशबलावस्याहुतिमभ्यवहरति यः समयाध्युषिते जुहोती"ति निषेधकवेदानुमानात्। "यावज्जीवमग्निहोत्रं जुहुयात् स्वर्गकाम" इति विहितस्यैव निन्दया निषेधः। मव्या [हव्या ?] दीनामप्युदितादिकालेऽतिरेकाभावात्। उदितानुदितसमयाध्युषितवाक्यानामेव परस्परं विरोधः। एकमेव होममनूद्य परस्परविरुद्धकालविधानासम्भवात्।

पुनरुक्तं "त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाहे"ति। अत्रोत्तमत्वमाद्यत्वमेव। तथा चाद्याया एव वाचस्त्रिधाऽभिधानं त्रिस्त्रिरित्येव वा पुनरुक्तम्। यद्यपि पौनरुक्त्यं नाप्रामाण्यव्याप्तं वक्त्रकौशलासारख्यापकत्वात्। तथापि वक्तुरकौशलेनाप्तत्वस्य दुर्ग्रहत्वात् प्रामाण्यं दुर्ग्रहम्। एवं पुत्रकामादिवाक्यमप्रमाणमनृतत्वात् जगत्क्षणिकमितिवत्। तथा च पुत्रेष्ट्यादिवाक्यवत् बहुवाक्यत्वेनाप्येषामपि [तदेकजातीयत्वेनान्येषामपि] अप्रामाण्यम्। न चार्णुर्हिमस्येत्यादिना व्यभिचारः, विधायकत्वेन विशेषणात् [?]। २।१।५७।

न, कर्मकर्तृसाधनवैगुण्यात् ।२।१।५८।

अत्रानृतत्वादिति हेतुरसिद्धः फलाभावस्यान्यथोपपत्तेरिति प्रदर्शकं सिद्धान्तसूत्रम्—"न कर्म···वैगुण्यात्"। क्रियते इति कर्म [पुत्रेष्टौ] पित्रोः सम्प्रयोगस्तद्वैगुण्यं पुरुषायितादिः। कर्तारोऽपि तद्वाक्याद् द्विजाश्च। तद्वैगुण्यं पित्रादेः [अयथाविधित्वपुरुषायितत्वादेरिव] अविद्वत्ता च। विदुषो [हि विप्रस्या]त्राधिकारः।

साधनं करणमिष्टिः तद्वैगुण्यं हविरप्रोक्षितमुपहतञ्चे[त्या]दिभिः [अनृतत्वादिहेतो-रसिद्धता स्फुटा] ।२।१।५८।

अभ्युपेत्य कालभेदे दोषवचनात् ।२।१।५९।

व्याघातपरीहाराय सूत्रम्—"अभ्यु···वचनात्" । [कालभेदस्य] उदयादिकाल नियमस्याभ्युपगमात्[परि]ग्रहात् तदतिक्रमे "श्यावोऽस्याहुतिमभ्यवहरति" इत्यादिदोषवचनात् । [यद्यपि चैको होमः समुच्चयेन] तदा तदा कर्तुं न शक्यते तथापि विकल्पेन करिष्यते । केनचिदुदितहोमे केनचिदनुदितहोमे [केनचित्] समयाध्युषित-होमे···[कामतः संकल्पो विधीयत इति होमस्य व्य] त्यवस्थितविकल्पत्वात् । एवं च यस्योदितहोमे सङ्कल्पस्तस्य तेन धर्मः स्वर्गश्च एवं परयोरपि । व्युत्क्रमे तु निन्दति । अवान्तरजाति······।२।१।५९।

अनुवादोपपत्तेश्च ।२।१।६०।

पौनरुक्त्यपरिहाराय सूत्रम्—"अनु······पत्तेश्च" । चकारान्न पुनरुक्तमिति समुच्चीयते । पुनर्वचनं प्रयोजनाभावे पुनरुक्तं भवति । प्रयोजन [वत्त्वेऽनुवाद उपप-द्यते । याश्च श्रुतयः "त्रिःप्रथमामन्वाह त्रिरुत्तमामि"]ति वाक्ये श्रुतास्तेन प्रथमो-त्तमयोस्त्रिरभिधाने पञ्चदशत्वमासां भवति । तथा च मन्त्राभिवादः—"इदमहं भ्रातृव्यं पञ्चदशारेण वाग्वज्रेण बाधे योऽस्मान् द्वेष्टि यं च वयं द्विष्म" इति मन्त्रो वज्रं पञ्चदशसामिधेनीर्वदति तदभ्यासं विना न स्यादिति प्रयोजनवत्त्वान्न पौन-रुक्त्यमित्यर्थः ।२।१।६०।

वाक्यविभागस्य चार्थग्रहणात् ।२।१।६१।

एवं वेदाप्रामाण्यसाधनं निरस्य प्रामाण्यसम्भावनायां हेतुर्वक्तव्यः । सम्भा-वनाया अप्यभावे कुतोऽग्रेतनप्रामाण्यहेतुरिति । तमाह—"वाक्य······ग्रहणात्" । प्रामाण्यं सम्भाव्यते वेदस्येति शेषः । येषां वाक्यानां सिद्धोऽर्थस्तेषां प्रामाण्यमपि दृष्टमिति समानधर्मदर्शनात् संशय इत्यर्थः ।२।१।६१।

विध्यर्थवादानुवादवचनविनियोगात् ।२।१।६२।

विभागदर्शनाय सूत्रम्—"विध्यर्थ ·····योगात्" । मन्त्रब्राह्मणसमुदायो वेदः । तस्य ब्राह्मणविभागाय सूत्रमिदम् । विध्यादिरूपस्य वचनस्योपयोगात् त्रिवि-धम् [ब्राह्मणवाक्यम्] इत्यर्थः ।२।१।६२।

विधिर्विधायकः ।२।१।६३।

तत्र विधेः स्वरूपमाह—"विधि···यकः" । कृतिकारणचिकीर्षाहेतुज्ञानजनकः शब्द इत्यर्थः ।२।१।६३।

स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ।२।१।६४।

विधायकशब्दशून्यवाक्यमर्थवादइतितदवान्तरविशेषानाह—"स्तुति······न्यर्थवादः"। अत्रोपनिषत् पञ्चमी विधेत्येके। नापि स्तुतिरेवेत्यपरे। तत्र विधेयप्रवृत्त्यनुकूलप्राशस्त्यप्रतिपादकोऽर्थवादः स्तुतिः। निवृत्त्यनुकूलाप्राशस्त्यप्रतिपादकोऽर्थवादो निन्दा। पुरुषविशेषकर्तृकतया मिथो विरुद्धस्य विधेर्वादः परकृतिः। यथा "हुत्वा वपामेवाग्रे अभिधारयन्त्यथ पृषदाज्यं तदुह चरकाध्वर्यवः पृषदाज्यमेवाग्रेऽभिधारयन्ति अग्नेः प्राणाः पृषदाज्य"मित्यभिदधतीत्येवमादि। ऐतिह्यसमाचरिततया कीर्तनं पुराकल्पः। यथा "तस्माद्वा एतेन ब्राह्मणा बहिष्पवमानं सामस्तोममस्तौषन् योने यज्ञं प्रतनवामहे" इत्येवमादि ।२।१।६४।

विधिविहितस्यानुवचनमनुवादः ।२।१।६५।

अनुवादमाह—"विधि···मनुवादः"। अत्रानुवचनमनुवाद इति सामान्यलक्षणम्। प्राप्तस्य सप्रयोजनमभिधानमित्यर्थः। विधिविहितस्येत्यवान्तरविभागः। विधेर्विहितस्य चेत्यर्थः। तेन शब्दतदर्थानुवादौ दर्शितौ। प्रयोजनं तु स्तुतिर्निन्दा वा कश्चिद्विशेषो वा क्रमभेदो वा ज्ञाप्यत इति ।२।१।६५।

नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः ।२।१।६६।

उक्तविशेषमविदुषः पूर्वपक्षसूत्रम्—"नानु···पपत्तेः"। अभ्यासः आवृत्तिः, स च शब्दस्य। तस्मात् पुनरुक्तादि [अ] विशिष्टोऽनुवाद इत्यसाधुतेति ।२।१।६६।

शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ।२।१।६७।

सिद्धान्तसूत्रम्—"शीघ्र···विशेषः"। अनन्यलभ्यप्रयोजनसंवन्धरूपा[प] विशेषादनुवादः पुनरुक्ताद् भिद्यते। यथा शीघ्रं गम्यतामित्युक्ते शीघ्रतरं गम्यता मिति न पुनरुक्तम्। तरपः क्रियातिशयप्रतीतेः। तथा वेदेऽपि प्रयोजनरूपविशेषणा [शेषा]भ्यासादित्यर्थः ।२।१।६७।

मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ।२।१।६८।

एवं बाधाभावं प्रामाण्यसम्भावनाहेतुमुक्त्वा प्रामाण्यहेतुमाह—"मन्त्रा··· प्रामाण्यात्"। चकारः प्रामाण्यसम्भावनाहेतोरनुकर्षणार्थः। व्यधिकरणोपन्यासो व्याप्तिप्रदर्शनाय। आप्तस्य प्रामाण्यं यतोऽतस्तदुक्तत्वं प्रामाण्यव्याप्तत्वम्। तेन विवादपदान्यदृष्टार्थानि वेदवाक्यानि प्रमाणम् वेदवाक्यत्वात् दृष्टार्थमन्त्रायुर्वेदवत्। [दृष्टार्थ] वेदवाक्यानि प्रमाणम् आप्तोक्तत्वात् लौकिकवाक्यवत्। आयुर्वेदप्रामाण्यं [तु लोकव्यवहारे] स्फुटम्। मन्त्रपदानां च विषभूताशनिप्रतिषेधार्थानां प्रयोगेऽर्थस्य तथाभाव एतत्प्रामाण्य [मिति]···२।१।६८।

इति प्रथमाह्निकम्

———

तृतीयोऽध्यायः ।

प्रथमाह्निकम् ।

सुखेनाध्यापयन् काश्यां न्यायवेदान्तदर्शने ।
तृतीय [ाध्याय] सूत्रव्याख्यानं चक्रे श्रीकेशवः कविः ॥

[अवतरणम्]

इह पूर्वापराध्यायप्रतिपाद्ययोः प्रमाणप्रमेयपरीक्षयोर्हेतुहेतुमद्भावसङ्गतिः । अवसरो वा, प्रतिबन्धिकायाः प्रमाणजिज्ञासाया अपगमात् । प्रसङ्गो वा, स्मृतायाः प्रमेयपरीक्षाया उपेक्षानर्हत्वादिति । कारणरूपप्रमेयषट्कपरीक्षा चेहाध्यायार्थः । तत्र बुद्ध्युत्पादकप्रमेयपरीक्षा प्रथमाह्निकार्थ इति प्राञ्चः । मनोबुद्धिभिन्नकारणप्रमेयपरीक्षा तदर्थ इति तत्त्वम् । नव चात्र प्रकरणानि, तानि च यथास्थानं वक्ष्यन्ते ।

[इन्द्रियभिन्नात्मप्रकरणम् ।३।१।]

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ।३।१।१।

तत्र प्रथममिन्द्रियव्यतिरेक [कात्म] प्रकरणम् । तत्रात्मा विषयः । स इन्द्रियाद् भिन्नो न वेति संशयः । तत्कारणं वादिविप्रतिपत्तिः । प्रयोजनं मिथ्याधीनिवृत्तिः ।

पूर्वपक्षस्तु इन्द्रियाणि चेतनानि तदन्यत्र चेतने साधकमानाभावात् बाधकसत्त्वाच्च । तथाहि यदि[दं] जातं ध्वंसाप्रतियोगिवा ? तदसत् । यथा प्रागभावः ध्वंसो वा । जन्मनः सत्तागर्भत्वात् । अजातश्चात्मा । न चाश्रयासिद्धिः । सत्ख्यात्युपस्थितेऽपि धर्मिण्यनुमानप्रवृत्तेः ।

अत्र सिद्धान्तसूत्रम्—"दर्शन······ग्रहणात्" । चक्षु[ष]श्चैतन्ये तद्गृहीतस्य यमहमद्राक्षं तं स्पृशामीति त्वगादिना प्रतिसन्धानानुपपत्तिः । तस्य स्मृत्यादिजन्यत्वेऽनुभवितृभेदेऽनुपपत्तेः । बाधकानुमानं चाप्रयोजकमिति सूत्रार्थः ।३।१।१।

न, विषयव्यवस्थानात् ।३।१।२।

अत्र शङ्कते—"न···स्थानात्" । इन्द्रियभिन्नात्माभ्युपगमेऽपि तस्य सर्वानुभूतप्रतिसन्धातृत्वाभावात् कारणविशेषबलात् कस्यचिदेवानुभूतस्य प्रतिसन्धाने इन्द्रियेऽपि तथा । यद्वा स्वस्वविषयव्यवस्थितचक्षुरादेरेव प्रतिसन्धानं स्यात् । भिन्नविषयं च तदसिद्धम् । यमहमद्राक्षं तं स्पृशामीति ज्ञानद्वयं भेदाग्रहाच्चाभेदाभिमान इति नेन्द्रियभिन्नश्चेतन इति सूत्रार्थः ।३।१।२।

तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः ।३।१।३।

उत्तरसूत्रम्—"तद्व्यवस्था···प्रतिषेधः" । पूर्वापरप्रत्ययविषयत्वं ग्राहकत्वं प्रतिसन्धानगोचरः । न चासति बाधके तस्य मिथ्यात्वम् । न चेन्द्रिये तत् सम्भवति तेषां व्यवस्थितविषयत्वादिति प्रथमे पूर्वसूत्रार्थे[?] सूत्रार्थः । द्वितीये तु प्रतिसन्धाने व्यवस्थितविषयत्वं विरुद्धमत एकस्यैव प्रतिसन्धातुः सिद्धिः । अभाववादे चाकस्मिकत्वापत्तेः । भेदाग्रहश्चाभेदव्यवहारहेतुरित्यपास्तमेवेति ।३।१।३।

[शरीरव्यतिरिक्तात्मप्रकरणम् ।३।२।]

शरीरदाहे पातकाभावात् ।३।१।४।

इदानीमव्यवस्थितविषयतया प्रतिसन्धानयोग्याच्छरीरात्मव्यतिरेकप्रकरणम् । तत्रात्मा विषयः । स शरीरभिन्नो न वेति संशयः । पूर्वपक्षस्तु अहं गौरः जाने स्थूलोऽहं सुखी कृशोऽहं दुःखीति शरीरधर्मसामानाधिकरण्येन ज्ञाताद्यनुभवात् शरीरमात्मा । अत्र परपक्षबाधकद्वारा सिद्धान्तसूत्रम्—"शरीर···भावात्" ।

शरीरचैतन्ये परप्राणातिपाते पातकाभावप्रसङ्गात् हन्तृभिन्नत्वाद्भोक्तुरित्यर्थः । यद्यपि भूतचैतनिकानां नैतदनिष्टम्, तैः पातकानभ्युपगमात् । तथापि पातकाभ्युपगन्तॄन् शाक्यान् प्रतीदं तथा । तथा च कृतहानमकृताभ्यागमश्च स्यात् । न चेष्टापत्तिः, शास्त्रदेशितस्य फलस्यानु[ष्ठातरि दृष्टत्वात्]··
चितत्वादिति ।

तदभावः, सात्मकप्रदाहेऽपि तन्नित्यत्वात् ।३।१।५।

अत्र शङ्कते—"तदभावः···नित्यत्वात्" । सात्मकस्यापि शरीरस्य दाहे तदभावः हिंसाफलयोरभावस्तुल्यस्तन्नित्यत्वात् आत्मनो नित्यत्वात् । नहि नित्यस्य हिंसा फलं वा । नित्यस्य कार्यानाधारत्वात् । तदाहुः वर्षातपाभ्यामित्यादि* ।३।१।५।

न, कार्याश्रयकर्तृवधात् ।३।१।६।

परिहरति—"न···वधात्" । नात्मनो वधः । किन्तु कार्यं सुखादिज्ञानं तस्याश्रय आयतनं शरीरम् । कर्तृणि इन्द्रियाणि तत्साधनत्वात् तयोः । शरीरेन्द्रिययोः वधः प्रमापणम् आत्मवध इति च भाक्तो व्यवहार इति नात्मनित्यत्वे हिंसानुपपत्तिः ।

यद्वा कार्याश्रयः भक्त्या कर्तृ च शरीरमेव । तद्वधादात्मनः पातकमुत्पद्यते इति सूत्रार्थः । नापि नित्यात्मनः फलानाधारत्वम् चर्मवद् व्योम्नोऽपि वर्षातपसंयोगित्वादिति ।३।१।६।

---

*वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोर्भयम् ।
चर्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्फलः ॥
[न्यायवार्तिकम् ३।१।५।]

[चक्षुरद्वैतप्रकरणम् ।८।३।]

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ।३।१।७।

इदानीं शरीरव्यतिरेकितुल्यन्यायतया बुद्धिव्यतिरेकं प्रसाध्य चक्षुर्द्वैतमाश्रित्यात्मन इन्द्रियव्यतिरेकसाधनाय परेण यत् प्रतिसन्धानानन्तरमुपन्यस्तं तच्चक्षुरद्वैतस्थापनेन निराकर्तुं प्रसङ्गसङ्गत्या चक्षुरद्वैतप्रकरणमारभ्यते। तत्र दूषयितुमेकदेशिमतमुपन्यस्यति—"सव्य···· ज्ञानात्"। [य]महमद्राक्षं स एवायमर्थ इति सव्येन चक्षुषा दृष्टस्यार्थस्येतरेण प्रत्यभिज्ञानम्। चक्षुषस्तु चैतन्ये तन्न स्यात्, चक्षुषोर्भेदात्। तथा [च] यं वामेनाद्राक्षं तं दक्षिणेन पश्यामीति मानसमपि प्रत्यभिज्ञानमुभयदर्शनं विनाऽनुपपद्यमानमेकं द्रष्टारं साधयतीति सूत्रार्थः।३।१।७।

नैकस्मिन् नासास्थिव्यवहिते द्वित्वाभिमानात् ।३।१।८।

तदेतद्दूषयति—"नैकस्मिन् · मानात्"। एकं चक्षुर्गोलकद्वयाधिष्ठानं द्वित्वधीस्तु मध्ये नासास्थिव्यवधानात्। अन्तद्वय [ग्रन्थि] निवद्धमामध्यव्यवस्थितस्य वंशादेरिवेति सूत्रार्थः। ३।१।८।

एकविनाशे द्वितीयाविनाशान्नैकत्वम् ।३।१।९।

आक्षिपति—"एक···नैकत्वम्"। विनष्टत्वाविनष्टत्वविरुद्धधर्मसंसर्गान्नष्टानष्टपटयोरिव चक्षुषोर्भेद इति सूत्रार्थः।३।१।९।

अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः ।३।१।१०।

अत्रैकदेशिनः परिहारः—"अवयव···रहेतुः"। यथैकशाखाच्छेदेऽपि स एव वृक्ष इति प्रत्यभिज्ञानात् किञ्चदवयवनाशेऽपि अवयवी [अव]तिष्ठते तथा किञ्चिदवयवनाशे चक्षुरवयव्यवतिष्ठते। अवयवावयविनोर्भेदादिति सूत्रार्थः।३।१।१०।

दृष्टान्तविरोधादप्रतिषेधः ।३।१।११।

एकदेशिनः परीहारं दूषयति—"दृष्टान्त···प्रतिषेधः"। दृष्टाश्चासावन्तो व्यवस्थितश्चेति दृष्टान्तः। तन्त्वादिनाशे पटादिनाशः। समवायिकारण[नाश]स्य कार्यनाश[क]त्वात्। अनाशे च तद्विरोधः। प्रत्यभिज्ञानं तु सादृश्यादभ्युपपन्नम्। रूपोपलब्धिस्तु चक्षुरवयविनाशेऽपि अवस्थितसंयोगेभ्यः खण्डपटवत् खण्डचक्षुरवयव्युत्पादात्। एक गवाक्षपिधानेऽपि गवाक्षान्तरेणेव। अन्यथा तत्तद्दृष्टिविरोधादिति सूत्रार्थः।

एकेनैव सूत्रेणैकदेशिनिरासः स्वपक्षबाधकोद्धारश्च। चक्षुषोर्भेदे ह्यणुना मनसा युगपन्नानाधिष्ठाना[न सम्बन्धा]सम्भवात्। विकलैकचक्षुरविकलोभयचक्षुषोस्तुल्योपलब्धिः स्यात्। चक्षुरेकत्वे तु उभयाधिष्ठानाभ्यां निर्यत [निर्गतं] क्वचिदपि मनसाधिष्ठितमधिष्ठितमेवेत्यविकलाक्षस्य नोक्तदोषः।३।१।११।

इन्द्रियान्तरविकारात् ।३।१।१२।

एवमनुभवार्थ[नु]सारमार्गे दर्शितेऽपि तत्र विप्रतिपन्नं प्रति प्रसङ्गादात्मानुमानं प्रकारान्तरेणाह—"इन्द्रिय···रात्"। कस्यचिच्चिरबिल्वादेरम्लस्य रसगृहीतसाहचर्यं रूपादिदर्शनेनेन्द्रियान्तरे रसने दन्तोदकसंप्लवलक्षणविकारदर्शनात् तत्कारणक्रमेणेच्छा-स्मृतिसंस्कारानुभवानामनुमितानां प्रतिसन्धातृभेदव्यावृत्तौ पारिशेष्यात् समाना-श्रयत्वसिद्धिरिति सूत्रार्थः। शरीरस्य च बाल्यादिभेदेन भिन्नत्वात् ।३।१।१२।

न, स्मृतेः स्मर्तव्यविषयत्वात् ।३।१।१३।

आक्षिपति—"न स्मृतेः···त्वात्"। स्मृतिरात्मानं विषयतया गमयेत् कारण-तया वा ? नाद्यः, स्मर्तव्यानामेव रसादीनां तत्त्वात्। नान्त्यः, संस्कारस्यैव हेतुत्वात्। ३।१।१३।

तदात्मगुणसद्भावादप्रतिषेधः ।३।१।१४।

समाधत्ते—"तदात्म···षेधः"। स्मृतेरात्मगुणत्वं विना न सद्भावः। नहि कार्यमनाधारं नाम। नहि शरीरं तदाधारः। प्रत्यक्षतद्गुणानां स्वपरत्वलक्ष्यत्वात्। अतः स्मृतेरात्मा सिद्ध एवेत्ययुक्तस्तत्प्रतिषेध इति सूत्रार्थः।

तरणिमिश्रास्तु भाष्ये "अनुमीयते चायं" मित्युपक्रम्य [३।१।१२। अवतरण-भाष्यम्] "अतोऽनुमीयते" [३।१।१४ उपसंहारभाष्यम्] इत्युपसंहारात् 'इन्द्रिया-न्तरविकारात् [३।१।१२।] इत्यादिभिस्त्रिभिः सूत्रैः प्रतिसन्धानानुमेयत्वप्रकरण-मन्यदेवेत्याहुः। तन्न, प्रसङ्गसङ्गत्याऽप्येकवाक्यतासम्भवे वाक्यभेदस्यान्याय्यत्वा-दिति ।३।१।१४।

[आत्मनो मनोव्यतिरेकप्रकरणम्]

नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात् ।३।१।१५।

एवं प्रासङ्गिकं चक्षुरद्वैतप्रकरणं समाप्य प्रतिसन्धानादीनामिन्द्रियव्यतिरिक्ता-त्मसाधकानामर्थान्तरत्वनिरासाय मनोव्यतिरेकप्रकरणम्। तत्रात्मा विषयः मनोभिन्नो न वेति संशयः। तत्र पूर्वपक्षसूत्रम्—"नात्म···सम्भवात्"। दर्शनस्पर्शनादीना-मेकार्थग्रहणादेर्मनस्यपि चेतने सम्भवात्। तस्य स्थिरत्वाच्चेति न तद्भिन्नात्मकल्पन-मित्यर्थः ।३।१।१५।

ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् ।३।१।१६।

सिद्धान्तसूत्रम्—"ज्ञातु···मात्रम्"। चक्षुराद्यजन्यः सुखसाक्षात्कार इन्द्रिय-जन्यः जन्यसाक्षात्कारत्वादिति पक्षविशेषणमहिम्ना पक्षधर्मताबलाच् चक्षुराद्यन्य मनः सिद्धिः। तथा च ज्ञाता तद्भिन्न एवेति तत्र मनः संज्ञामात्रकरणम् न त्वात्म-प्रत्याख्यानमित्यर्थः। मनसोऽणुत्वात् तद्गुणानामतीन्द्रियत्वापत्तिरिति भावः ।३।१।१६।

नियमश्च निरनुमानः ।३।१।१७।

रूपादिसाक्षात्कारस्तथा न तु ज्ञानमात्रमिति शङ्कानिरासाय सूत्रम्—"नियम···नुमानः"। ज्ञानमात्रस्यैवेन्द्रियजन्यत्वे निर्व्यूढरूपादिधीरेव ससाधना न सुखादिधीरिति नियमो निःप्रमाणक इत्यर्थः ३।१।१।७

[आत्मनित्यत्वप्रकरणम्]

पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसंप्रतिपत्तेः ।३।१।१८।

सम्प्रत्यात्मनोऽनादिनिधनप्रकरणम्। तत्रात्मा विषयः। स नित्योऽनित्यो वेति संशयः। स च पूर्वप्रकरणसिद्धादिन्द्रियदेहमनोभिन्नत्वात् प्रमेयत्वाद्वा। प्रयोजनं च निःश्रेयसार्थे प्रवृत्तिरन्वाचितं च स्वगर्थार्थप्रवृत्तिः। स्थायिनं परलोकभागिनमात्मानमनुसन्धाय तदा भावात् [?]।

पूर्वपक्षस्तु आत्मनो नित्यत्वे मानाभावः। आत्मा प्रागभावध्वंसप्रतियोगी अश्रोत्रास्मदादिप्रत्यक्षगुणत्वात् घटवदिति बाधकं चेति।

[अत्र] सिद्धान्तसूत्रम्—"पूर्वा···संप्रतिपत्तेः"। जातमात्रस्यैतज्जन्मनि अनुभूतार्थदर्शनाद् हर्षशोकादिकं दृश्यते। तच्च नेष्टोपायतादिज्ञानं विना, तदपि न तज्जातीयत्वादिलिङ्गानुसन्धानं विना, तच्च न व्याप्तिपक्षधर्मतास्मृतिमन्तरेण [इति]। इहान्वयव्यतिरेकाग्रहेण तदनुभवाभावात्। अतस्तद्धेतुजन्मान्तरीयानुभवसिद्धौ पूर्वपूर्वजन्मन्यपि तथात्वादनादिनिधन आत्मेति सूत्रार्थः।

यद्यपि सूत्रम् [इदं] साक्षादनादित्वं साधयति न त्वनन्तरं तथाप्यनादेर्भावस्यानाशित्वनियमात् उभयानवच्छेद एव तात्पर्यम्। अनित्यत्वानुमाने च साधनावच्छिन्नसाध्यव्यापकः स्पर्शवत्त्वमुपाधिः। सर्वदा अमूर्तद्रव्यत्वं च नित्यत्वसाधकमिति भावः।

इष्यमाणतमविषयस्य प्रार्थनायां प्राप्तौ सत्यां सुखानुभवो हर्षः। अनिष्टसाधनोपनिपाते तज्जिहासोर्हानाशक्यताज्ञानं भयम्। अनौचित्येनेष्टवियोगे तत्प्राप्त्यशक्यताज्ञानं शोकः ।३।१।१८।

पद्मादिषु प्रबोधसम्मीलनविकारवत् तद्विकारः ।३।१।१९।

अत्र शङ्कते—"पद्मादि···विकारः"। नित्यत्वे साध्ये हर्षादिकं न हेतुरसाधारणत्वात्। न च कार्यत्वात् स्मृतिजन्यत्वं, पद्मादिप्रबोधादौ साधारणानैकान्तिकत्वात् ।३।१।१९।

नोष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम् ।३।१।२०।

दृष्टान्तमात्रस्यासाधकत्वात् परिहरति—"नोष्ण···विकाराणाम्"। हर्षादिना न साक्षान्नित्यत्वं साध्यते किन्तु उक्तक्रमेणेति नोक्तदोषः। दृष्टान्तमात्रं च न

साधकम्। न च कार्यत्वाद् हर्षादीनां पद्मप्रबोधादिदृष्टान्तेनानिमित्तकत्वं साध्यम्, दृष्टान्ते पञ्चभूतार्थग्रहारब्धे उष्णादिकारणत्वस्य दर्शनेन साध्यवैकल्यात्। आकस्मिकत्वस्य च निषेधादिति सूत्रार्थः।३।१।२०।

प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात्।३।१।२१।

लिङ्गान्तरमाह—"प्रेत्या···लाषात्"। जातमात्रस्य स्तन्ये प्रवृत्तिस्तदभिलाषजन्या। स चाहाराभ्यासजन्यः। स च पूर्वानुभूतेष्टसाधनत्वस्मृतिजन्य इति नित्यत्वमात्मन इति सूत्रार्थः।३।१।२१।

अयसोऽयस्कान्ताभिगमनवत् तदुपसर्पणम्।३।१।२२।

आक्षिपति—"अयसो···सर्पणम्"। वत्सस्य स्तन्ये प्रवृत्ति[नहाराभ्यासजन्या]। वस्तुतः यथा अयो नियमेनायस्कान्तं गच्छति न लोष्ठादिकं तथा जातमात्रवत्सोऽपि स्तन्ये प्रवर्त्स्यते। जन्मान्तरीयानुभवजन्यस्मृतेस्तद्धेतुत्वे जाता[न्य]न्धबधिरादयोऽपि शब्दरूपादिकं पूर्वजन्मानुभूतं स्मृत्वा व्याचक्षीरन्निति।३।१।२२।

नान्यत्र प्रवृत्त्यभावात्।३।१।२३।

समाधत्ते—"नान्यत्र··भावात्"। तत्रापि प्रवृत्तिनियमदर्शनात् अयस्कान्तरश्मिसंयोगो नियतमेव कारणम्। तथा च स्तन्यप्रवृत्तौ प्राग्भवीयानुभवजा स्मृतिरभिलापं प्रसूते। ततश्च नियम इत्यकारणकं न कार्यम्। यौवनाद्यवस्थासु सामानाधिकरण्येनैव स्मृत्यनुबन्धप्रवृत्त्योः कार्यकारणत्वेनोपलब्धेः। न च यदेकं स्मरति तदन्यदा[द]पीति नियमो येन जात्यन्धादयो व्याचक्षीरन्निति दोषः स्यात्। अदृष्टादिवशात् कस्यचिदेव स्मृतिरेकजन्मन्यपीति।३।१।२३।

वीतरागजन्मादर्शनात्।३।१।२४।

शिष्यधीवैशद्याय प्रकारान्तरेणात्मनो नित्यत्वं साधयति—"वीत··दर्शनात्"। अभ्यासे रागो जायते। रागं विना प्रवृत्त्यनुपपत्तेः। स च पूर्वानुभूतार्थस्मृतिजः। इह चानुभवात् प्राक्तनः सोऽनुभवः कल्प्यत इति।३।१।२४।

सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिः।३।१।२५।

शङ्कते—"सगुण···दुत्पत्तिः"। यथा द्रव्यं सगुणमुत्पद्यते तथा सराग एवात्मोत्पद्यते। तथा च पूर्वोक्तो हेतुरप्रयोजक इति सूत्रार्थः।३।१।२५।

[न] सङ्कल्पनिमित्तत्वाद् रागादीनाम्।३।१।२६।

सङ्कल्पः स्मृतिस्तत्कारणकत्वात्। स्मृत्यादि विना रागादयो न जायन्ते। आकस्मिकत्वस्य निषेधात्। अदृष्टावलम्बनेऽपि पूर्वजन्माप्रत्याख्यानादिति सूत्रार्थः।३।१।२६।

[शरीरपरीक्षाप्रकरणम् ।५।६।]

पार्थिवं गुणान्तरोपलब्धेः ।३।१।२७।

उद्देशक्रमानुरोधादिदानीं शरीरपरीक्षाप्रकरणम्। प्रसङ्गोऽप्यत्र सङ्गतिः। नन्वात्मपरीक्षानुमितैर्मिथः साकाङ्क्षैः कथममीभिः पञ्चप्रकरणैर्नैकमाह्निकम् ? उच्यते। आत्मादिचतुष्कवृत्तेरेव धर्मस्याह्निकोपाधित्वेनात्र विवक्षितत्वम्। पुंसां विच्छित्राभिसन्धित्वादिति।

ननु कोऽस्य विचारस्य लक्षणोपयोगः, अनुपयोगे वा किं परीक्षया ? उच्यते। शरीरस्य विजातीयारब्धत्वे इन्द्रियैरप्यारम्भसम्भवे तस्य तत्र समवायादिन्द्रियसंयोगगर्भं शरीरलक्षणमसिद्धं स्यात्। तदिह शरीरं विषयः। तदेकद्वित्रिचतुःपञ्चप्रकृतित्वे संशयः। प्रयोजनं च पार्थिवत्वादिभिरात्मभेदसिद्धिः। गन्धौष्ण्यादीनामुपलब्ध्यविशेषे कथं पृथिव्येव मानुषशरीरस्योपादानं न भूतान्तरम् ? अन्यथा सिद्धेरुभयत्रापि सम्भवात्। एवं चोष्णं जलं, सुरभिः समीरण इति धीरप्युपपद्यत इत्याक्षिप्तपूर्वपक्षकं सिद्धान्तसूत्रम्—'पार्थिवं…लब्धेः''। गुणान्तरं गुणविशेषो गन्धाख्यः। तेनेदं मानुषशरीरं पृथिवीत्वयोगि गन्धवत्त्वात् पृथिवीपरमाणुवत्। औष्ण्याद्युपलम्भस्तु संयुक्तसमवायात्। तत्रा[त्र] विजातीयानामपि निमित्तत्वात्। न चौष्ण्याद्युपलब्धेर्गन्धोपलम्भादविशेषः। तुल्यत्वेऽपि पृथिवीत्वानुभवाद्गुणान्तरोपलब्धेर्धर्मत्वव्यवस्थापनात्। न चौष्ण्याद्यनुभवेऽपि शरीरं तेजो जलं वा[यु]रिति [वा] कस्यचिदनुभवः ।३।१।२७।

पार्थिवाप्यतैजसं तद्गुणोपलब्धेः ।३।१।२८।

पूर्वपक्षसूत्राणि—''पार्थिवा…लब्धेः''। मानुषशरीरं पार्थिवाप्यम्, पार्थिवतैजसम्, आप्यतैजसम्, पार्थिवाप्यतैजसं चेत्यर्थः ।३।१।२८।

निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम् ।३।१।२९।

एतदुपजीव्याह—''निःश्वासो…भौतिकम्'' ।३।१।२९।

गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम् ।३।१।३०।

''तद्गुणोपलब्धेरिति'' [३।१।२८] तद्गुणान् विशिष्य दर्शयन्नाह—''गन्ध…भौतिकम्''। क्लेदः क्षरणम्, पाक औष्ण्यम्, व्यूहो हस्तादीनामितस्ततो नयनम्, अवकाशदानं गलादावन्नादेः, क्रमेण पञ्चानाम्। एतदुक्तयुक्त्यैव निराकृतमिति न सिद्धान्ते सूत्रान्तरम्। पूर्वपक्षवाद्याशयस्फोरणमात्रत्वादमीषाम्। तथा च भाष्यम् ''त इमे सन्दिग्धा अहेतव इत्युपेक्षितवान् सूत्रकार'' इति। अस्ति[एतत्]शून्यमशकादिशरीरदर्शनान्मांसस्यावष्टम्भकत्वमन्येषामुपष्टम्भकत्वमात्रमिति कश्चित्। हस्तादीनां विचित्राणां शरीरावयवत्वात् का गतिरिति चिन्त्यम् ।३।१।३०।

श्रुतिप्रामाण्याच्च ।३।१।३१।

शरीरपार्थिवत्वे युक्त्यन्तरमाह—"श्रुतिप्रामाण्याच्च"। प्रकृतौ विकृतिलय-प्रकाशनप्रकरणे श्रूयते "सूर्यं ते चक्षुर्गच्छतात् पृथिवीं ते शरीर" मिति। मन्त्रान्तरे च "सूर्यं ते चक्षुः स्पृणोमि पृथिवीं ते शरीर" मिति। स्मृ [स्पृ,तिरुत्पत्तिः। सूर्यमिति पञ्चम्यर्थे द्वितीयाविभक्तिविपरिणामात्। तथा च पृथिव्या उत्पादयामि इत्यर्थात्तस्याः प्रकृतित्वलाभ इत्यर्थः ।३।१।३१।

[इन्द्रियपरीक्षाप्रकरणम् ।१६।७।]

कृष्णसारे सत्युपलम्भात् व्यतिरिच्य चोपलम्भात् ।३।१।३२।

उद्देशक्रमानुरोधादिन्द्रियपरीक्षाप्रकरणम्। तत्रेन्द्रियाणि विषयः। अधिष्ठाना-न्यभूतात्मकानि न वेति संशयः। नेति पक्षे अधिष्ठानात्मकान्येव ततोऽन्यानि वेति संशयस्त्वार्थः। अन्यथा अर्थभेदे प्रकरणभेदापत्तिः। प्रयोजनं तु भूतान्यस्य विशेष-गुणवत्त्वेनात्मत्वापत्तौ करणत्वासिद्धिः। तच्छून्यत्वे कालाद्यन्यतमत्वापत्तिः। अधि-ष्ठानात्मकत्वे च तेषां शरीरावयवत्वेन तत्संयोगगर्भेन्द्रियलक्षणासिद्धिः। संशयहेतु विप्रतिपत्तिवीजोपदर्शनाय सूत्रम्—'कृष्णसारे···संशयः। कृष्णसाराद्यन्वयव्यति-रेकाभ्यां रूपाद्युपलब्ध्यनुपलब्धः। **व्यतिरिच्य** दूरे।

यद्वा **सतिः** समीचीने। तथा च तदुपघातानुपघाताभ्यां रूपाद्युपलब्ध्यपकर्षोत्क-र्षादधिष्ठान एवेन्द्रियव्यवहारा [दतिरि] क्ते मनो[माना]भावाच्च तदेवेन्द्रियमिति **सौगताः**।

अधिष्ठानाप्राप्तविप्रकृष्टस्य ग्रहणात् भूतैश्चाप्राप्तैरग्रहात् युगादौ तथा दर्शनात् स्फटिकादिव्यवहितोपलब्धेश्च नाधिष्ठानमिन्द्रियम्। किन्तूत्कट सात्वा [?] [सात्त्विका] हङ्कारप्रभवमिन्द्रियम्। तस्य वैभवाप्राप्यकारित्वमपीति **साङ्ख्याः**। ततो विप्रतिपत्तेः संशयः ।३।१।३२।

महदणुग्रहणात् ।३।१।३३।

तत्र पूर्वपक्षसूत्रम्—"मह···णात्"। अण्विति दृष्टान्तः। तेनाणुग्रहणवन्महतः स्वाधिकपरिमाणस्य ग्रहणान्न भौतिकमिन्द्रियम्। भौतिकं हि यावत् प्राप्तं तावदेव बध्नाति नाप्राप्तं न वाधिकपरिमाणम्। आहङ्कारिकस्य च वैभवात् सर्वप्राप्तेस्तद्-ग्रहणमुपपद्यत इत्यर्थः ।३।१।३३।

रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणम् ।३।१।३४।

सिद्धान्तसूत्रम्—'रश्म्यर्थ···ग्रहणम्"। रश्म्यर्थसन्निकर्षविशेषात् चतुर्वि-धात्[1] प्रत्यक्षसूत्रोक्तात् [१।१।४।] तस्य महतो ग्रहणम्। अतः दृष्टमविभिन्नं भौतिक-

---

१—"तद् यथा इन्द्रियेणार्थस्य सम्बन्धः, इन्द्रियावयवैरर्थस्य, अर्थावयवैरिन्द्रियस्य इन्द्रियावयवैरर्थावयवानाम्" इति तात्पर्यटीकाकथामभिप्रेति ग्रन्थकारः। [ता० टी० ।१।१।४।]

मिन्द्रियम् । तद्धि गत्वा गृह्णाति । [कुड्या] दिना च प्रतिबद्ध्यते पृथ्वग्रतया च दीपप्रभावद् विसारि च । आहङ्कारिकत्वे च काचवत् [तस्या] पि ग्रहणापत्तेः । महद्ग्रहणस्य चाभौतिकत्वे साध्ये दीपशिखायां व्यभिचारात् ।३।१।३४।

तदनुपलब्धेरहेतुः ।३।१।३५।

शङ्कते—'तद···हेतु" । रूपोपलब्ध्या तदा[द]नुमानमयुक्तम् । रूपवतो महतो योग्यानुपलब्धेर्बाधादिति सूत्रार्थः ।३।१।३५।

नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः ।३।१।३६।

परिहरति—"नानुमीय···रभावहेतुः" । योग्यानुपलब्ध्या हि योग्यस्याभावः सिद्ध्यति नायोग्यस्य । अयोग्यत्वं च नायनरश्मेः रूपोद्भवाभावात् । स च प्रत्यक्षसूत्रे [१।१।४। तात्पर्यटीकायां] व्युत्पादितः ३।१।३६।

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ।३।१।३७।

महतोऽनेकद्रव्यस्य रूपवतश्चक्षु [षो रश्मेः] योग्यत्वमेव कुतो नेत्यत आह— "द्रव्य···नियमः" । द्रव्यधर्मो महत्त्वादिः । गुणादीनां रूपादीनां धर्म उद्भवरूपस्तयोर्भेदो नानात्वम् । अत एव हेमन्तादौ रूपानुद्भवात् विषक्तावयवमाप्यं द्रव्यं नोपलभ्यते । स्पर्शस्तु शीतरूप उद्भूतो गृह्यते । रूपानुद्भवान्नायनो रश्मि [र्न गृह्यते] ···रयोगश्च तेजसि चातुर्विध्यं स्फुटमेवेति सूत्रार्थः ।३।१।३७।

कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ।३।१।३८।

तेजस्त्वाविशेषे कथं वैचित्र्यमित्यत अह—"कर्म···तन्त्रः" । भोजकादृष्टविशेषजनितमिदं वैचित्र्यमिति सूत्रार्थः ।३।१।३८।

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ।३।१।३९।

महतो रूपवतश्चानुपलब्धिर्दृष्टेत्यत दृष्टान्तमाह—"मध्यन्दिनो···नुपलब्धिः" । यथा महान् रूपविशेषवांश्च उल्काप्रकाशोऽभिभवान्न गृह्यते तथा चक्षु[षो रश्मिः] रूपानुद्भवादिति सूत्रार्थः ३।१।३९।

न रात्रावप्यनुपलब्धेः ३।१।४०।

यदि सदपि रूपं नोपलभ्यतेऽभिभवात्तदा लोष्ठादावप्यभिभूतं तेजोऽस्तीति स्यात् अनुपलब्धेरन्यथासिद्धत्वात् । अत आह—"न···लब्धे" । दिवा अभिभवसम्भवेऽपि रात्रावभिभावकतेजोऽन्तराभावेऽप्यनुपलब्धिरिति न साऽन्यथा सिद्धेति सूत्रार्थः ।३।१।४०।

बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ३।१।४१

नायनो रश्मिरनुद्भूतरूपत्वान्नोपलभ्यत इत्यत्र मानमाह—"बाह्य···नुपलब्धिः"। अनभिव्यक्तिरनुद्भवः। ततो नायनरश्मेरनुपलम्भः। यज्जातीयं बाह्यालोकानुग्रहापेक्षं तस्याग्रहणमनुद्भवादेव, हैमन्तिकशीतद्रव्यवदिति व्याप्तेरित्यर्थः। ३।१।४१।

अभिव्यक्तौ चाभिभवात् ।३।१।४२।

नन्वभिभवाम्भे [? वादेव] तदग्रहणमित्यत आह—"अभि···भवात्"। यदुद्भूतरूपतया कदाचिदभिव्यज्यते तस्याभिभवो वा यथोक्ताप्रकाशः बाह्यप्रकाशानपेक्षायां चेति चार्थः ।३।१।४२।

नक्तञ्चरनयनरश्मिदर्शनात् ।३।१।४३।

दृष्टान्तप्रतिपादकं सूत्रम्—"नक्त···दर्शनात्"। गोलकं चाक्षुषधीजनकविषयसंयोगाधिकरणतज्ज्ञानजनकतेजःसंयोगवत् चाक्षुषधीजनकगोलकत्वात् नक्तञ्चरगोलकवदिति सूत्रार्थः ।३।१।४३

अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ।३।१।४४।

आक्षेपसूत्रम्—"अप्राप्य···तोपलब्धेः"। चक्षुरप्राप्यकारि काचादिव्यवधानेनाप्राप्तस्य ग्राहकत्वात्। प्राप्यकारित्वे तन्न स्यादित्यर्थः ।३।१।४४।

कुड्यान्तरितो[तानु]पलब्धेरप्रतिषेधः ।३।१।४५।

समाधिसूत्रम्—"कुड्या···रप्रतिषेधः"। चक्षुषो प्राप्यकारित्वे कुड्यादिव्यवहितमपि तद्गृह्णीयादतो नैवमित्यर्थः ।३।१।४५।

अप्रतिघातात् सन्निकर्षोपपत्तिः ।३।१।४६।

काचाद्यन्तरितोपलब्धिमन्यथोपपादयति—"अप्रति·····पत्तिः"। काचादि स्वच्छत्वाच् चक्षुरश्मिं न विष्टभ्नातीति तत्रापि प्राप्तिरस्त्येवेति सूत्रार्थः ।३।१।४६।

आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽविघातात् ।३।१।४७।

नन्वभौतिकत्वाविशेषात् कथं तत्प्रतीयात् कमित्यत आह—"आदित्य··· विघातात्"। आदित्यरश्मिः कुम्भादिना न प्रतिहन्यते। कथमन्यथा तत्रस्थे जलादावौष्ण्यधीः। स्फटिकेन प्रदीपप्रभा भर्जनकपालेनाग्निः [न प्रतिहन्यते]। स्फटिकान्तरितस्य प्रभया प्रकाशनात्, भर्जनकपालस्थितानां तण्डुलानां दाहाच्च। भौतिकत्वाविशेषेऽपि स्वच्छत्वमविघातकत्वे तन्त्रमिति सूत्रार्थः। अविघातश्च सच्छिद्रत्वादवयविनाम् ।३।१।४७।

नेतरेतरधर्मप्रसङ्गात् ।३।१।४८।

आक्षिपति--"नेतरे···प्रसङ्गात्" । अविघातः काचादिधर्मः कुड्यादौ, कुड्यादिधर्मो विघातः काचादौ स्यात् । मूर्तत्वाविशेषादिति सूत्रार्थः ।३।१।४८।

आदर्शोदकयोः प्रसादस्वाभाव्याद् रूपोपलब्धिवत्तदुपलब्धिः ।३।१।४९।

समाधत्ते--"आदर्शो···दुपलब्धिः" । प्रसादो रूपविशेषस्तस्य स्वो धर्मो रूपोपलम्भनम् । रूपविशेषविघाते रूपानुपलब्धेः । स चादर्शादीनां स्वो धर्मः । यथा आदर्शे पतितस्तेन प्रतिहतश्च नायनो रश्मिः परावृत्तो स्वयं गृह्णाति न कुड्यादौ पतितस्तथात्रापि नियम इति सूत्रार्थः ।३।१।४९।

दृष्टानुमितानां हि नियोगपर्यनुयोगानुपपत्तिः ।३।१।५०।

वैपरीत्याभावे हेतुमाह—"दृष्टा···नुपपत्तिः" । प्रमाणके वस्तुनि एवं भवेति नियोगस्य, कुतो नैवं भूतोऽसीति पर्यनुयोगस्य चानुपपत्तिरिति प्रसङ्गादिति सूत्रार्थः । ३।१।५०।

[इन्द्रियनानात्वप्रकरणम् ।८।८।]

स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः ।३।१।५१।

अथोपोद्घातितमिन्द्रियनानात्वप्रकरणम् । पूर्वप्रकरणसाधितयोरिन्द्रिया[य]-भूतत्वप्राप्यकारित्वयोस्तदैकत्वे अनुपपत्तिः । एकत्वे हि रूपादिषु मध्ये रूपस्यैव व्यञ्जकत्वादित्यादेर्भौतिकत्वसाधकस्यासिद्धेः । तदसिद्धौ प्राप्यकारित्वस्यासिद्धेः, जन्यभूतधर्मत्वात् । प्रयोजनं तु "दर्शनस्पर्शनाभ्याम्" [३।१।१।] इत्यादिनात्मनो भेदसिद्धिरिन्द्रियेभ्यः । तदेकत्वे तदेव स स्यात् ।

तत्र संशायकधर्मप्रदर्शकं सूत्रम्—"स्थानान्यत्वे·· संशयः" । स्थानान्यत्वमत्र नानास्थानत्वम् । तेन नाना स्थानं घटपटाद्यनेकमेकञ्चावयवि दृष्टमिति साधारणाद् धर्मात् शरीरभिन्नत्वात् असाधारणाद् वा घ्राणादीनि अन्योन्यमभिन्ना [नि] न वेति रसनादिचतुष्कं घ्राणभिन्नं न वेत्यादिर्वा संशय इति सूत्रार्थः ।३।१।५१।

त्वगव्यतिरेकात् ।३।१।५२।

शङ्कासूत्रम्—"त्वगव्यतिरेकात्" । एकमिन्द्रियमिति शेषः । अव्यतिरेकः सर्वेन्द्रियाधिष्ठानव्यापकत्वम् । सति भावो वा, न ह्यसत्यां त्वचि किञ्चिद्विषयग्रहणम् । तादृशात्त्वगिन्द्रियादेव सर्वज्ञानोपपत्तौ तद्भिन्नेन्द्रिये मानाभावादिति सूत्रार्थः ।३।१।५२।

न, युगपदर्थानुपलब्धेः ।३।१।५३।

सिद्धान्तसूत्रम्--"न···लब्धेः" । यदि त्वगेकमिन्द्रियं तदा तत्प्राप्तौ रूपादयो युगपद् गृह्येरन् अन्धबधिराद्यभावप्रसङ्गश्च। रूपादिग्राहिकायाश्च त्वचः सत्त्वादित्यर्थः ।३।१।५३।

इन्द्रियार्थपञ्चत्वात् ।३।१।५४।

इन्द्रियानेकत्वे हेत्वन्तरमाह--"इन्द्रिया···त्वात्" । इन्द्रियाणामर्थो विषयस्तस्य मिथोऽसङ्कीर्णत्वात् तद्ग्राहकाण्यपीन्द्रियाणि पञ्चेति सूत्रार्थः । त्वचापि ग्रहणासम्भवात् तद्ग्रहणायान्यसिद्धेरावश्यकत्वादिति भावः ।३।१।५४।

न, तदर्थबहुत्वात् ।३।१।५५।

आक्षिपति--"न तदर्थबहुत्वात्" । यद्यपीन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणि । हन्त ! अर्थानां गन्धादीनां सुरभित्वाद्यनेकप्रकारकत्वादतिबहूनीन्द्रियाणि प्राप्तानीति सूत्रार्थः ।३।१।५५।

गन्धत्वाद्यव्यतिरेकाद् गन्धादीनामप्रतिषेधः ।३।१।५६।

समाधत्ते—"गन्धत्वा···प्रतिषेधः" । परस्पराग्राह्यार्थभेदादिन्द्रियभेदो नार्थमात्रभेदात् । गन्धादयो गन्धत्वादिभिः स्वसामान्यैरुपगृहीता घ्राणाद्येकैकेन्द्रियग्राह्या इति न तद्विशेषः [षाः] करणान्तराणि प्रयोजयन्ति इत्यर्थः ।३।१।५६।

विषयत्वाव्यतिरेकादेकत्वम् ।३।१।५७।

शङ्कते—"विषय··देकत्वम्" । यद्येकसामान्योपग्रहादेकेन्द्रियग्राह्यत्वं तदा विषयत्वसामान्येन सर्वोपग्रहादेकेन्द्रियग्राह्यत्वं सर्वेषामित्येकमिन्द्रियं प्राप्तमिति सूत्रार्थः। ।३।१।५७।

न, बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः ।३।१।५८।

परिहरति—"न बुद्धि···पञ्चत्वेभ्यः" । नैकमिन्द्रियम् । **बुद्धय एवं लक्षणानि** असाधारणकारणप्रयोजकत्वात् । तेषां पञ्चत्वात् । पञ्चेन्द्रियगणविषयत्वसामान्ययोगिनामपि रूपादीनां त्वगादिभिरग्रहात् करणान्तरस्वीकारात् । पञ्च च गोलकान्यधि**ष्ठानानि** । यस्य चाधिष्ठानं भिन्नं तस्य घटादेरनेकत्वात् । न चेदमसिद्धम्, अन्धबधिराद्यभावग्रहप्रसङ्गात् । **गतिः** प्रकारः । चक्षुर्हि निर्गत्य घटादीन् प्राप्य गृह्णाति त्वगादीनि तु अधिष्ठानप्राप्तान्येव गृह्णन्ति । **आकृतिरियत्ता** परिमाणम् । श्रोत्रं हि विभु,चक्षुर्वहिर्निःसृतमधिष्ठानाधिकमहत्त्वं,घ्राणादीन्यधिष्ठानतुल्यपरिमाणानि। **जाति**र्योनिः कारणम् । जायते अस्मादिति व्युत्पत्तेः । घ्राणादीनि पृथिव्यादिप्रकृतीनि विलक्षणयोनित्वाद् भिन्नानि । श्रोत्रं तु अप्रकृतिकमेव । स्वभावो वा जातिः । पृथिव्यादि-

स्वभावत्वं घ्राणादीनां, श्रोत्रस्य चाकाशत्वम्। इन्द्रियैकत्वे मिथो विरुद्धजाति-सङ्करापत्तेस्तद्भेद इति सूत्रार्थः।३।१।५८।

[अर्थपरीक्षाप्रकरणम्। १।६।]

गन्धरसरूपस्पर्शशब्दादीनां स्पर्शपर्यन्ताः पृथिव्याः।३।१।५९।

अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः ३।१।६०।

इदानीं क्रमप्राप्तार्थपरीक्षाप्रकरणम्। तत्र "गन्धरसरूपस्पर्शशब्दाः पृथिव्यादि गुणास्तदर्थाः" [१।१।१३] इत्यर्थसूत्रम्। तच्च गन्धाद्येकैकं पृथिव्याद्येकैकगुण एवेति नियोगार्थं वा, कस्यचिदेकं कस्यचिद् द्वावित्यादिविकल्पार्थं वा, सर्वं [र्वः] सर्व-गुण इति समुच्चयार्थं वेति संशयः। प्रयोजनं च परीक्षाया इन्द्रियनानात्वसिद्धिः। पृथिव्यादिषु लक्षणस्यासिद्धिपरिहारश्च। समुच्चये हि नेन्द्रियपञ्चत्वं स्यात्। भूतानि [नां] हि लक्षणा[ण] भेदेन भेदानुपपत्तौ नियतगुणव्यञ्जकत्वानुपपत्तेः। एवं गन्धाश्रय-त्वादिविशेषलक्षणानामतिव्याप्तिः स्यात्।

तत्राभिमतपक्षप्रदर्शनार्थे सूत्रे—"गन्धरस…पृथिव्याः"। "अप्तेजो…स्यो-त्तरः"। पञ्चानां मध्ये स्पर्शपर्यन्ताः गन्धरसरूपस्पर्शाः पृथिव्या इत्यर्थः। गन्धादीनां स्पर्शपर्यन्तानां पूर्वं पूर्वमपोह्य त्यक्त्वा। तथा चैकैकशोऽपकर्षो जले गन्धस्यापकर्षः, तेजसि रसस्य, वायौ रूपस्य। उत्तरः शब्द आकाशस्यैव, न गन्धादय इति सूत्रार्थः। उत्तरशब्दश्चात्र परपर्यायः।३।१।५९-६०।

न सर्वगुणानुपलब्धेः।३।१।६२।

अत्र पूर्वपक्षसूत्राणि—"न सर्व…लब्धेः"। विकल्पपक्षे न गुणविनियोगो साधु। यत्प्रकृतिकं यदिन्द्रियं तत्तद्वृत्तियोग्याशेषविशेषगुणग्राहकमिति नियमात्। पृथिवीप्रकृतिकं घ्राणं गन्धमिव भूमिगान् रसादीनपि गृह्णीयात्। एवं रसनचक्षुषो-रप्यापाद्यम्।३।१।६१।

एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः।३।१।६२।

उत्तरोत्तराणां जलादीनामुत्तरोत्तरस्य गुणस्य सद्भावो वृत्तिः। कुतः ? एकैकश्येन एकस्यैक एव गुणो यतः। एवञ्च तदनुपलब्धिः तेषां तयोस्तस्य चानु-पलब्धिः। घ्राणेन रूपादीनामनुपलब्धिः। एवं रसनाचक्षुर्भ्यामित्याद्युन्नेयमिति सूत्रार्थः।

नन्वेकैकस्य पक्षे कथं पृथिव्यादौ रसादिग्रहः ? तत्तद्गुणवद्द्रव्यसंसर्गादिति गृहाण। शिलादौ शैत्यवत्।३।१।६२।

विष्टं ह्यपरं परेण ३।१।६३।

अथैवं जलादौ गन्धादयोऽप्युपलभ्येरन् संसर्गाविशेषादित्यनियमः स्यादित्यत आह—"विष्टं···परेण"। अपरं पृथिव्यादि **परेण** जलादिना **विष्टं** व्याप्तमिति भूतसृष्टिबोधकागमे प्रतिपादितम्। तेन पृथिव्यां व्याप्यायां व्यापकजलादीनां गुणा रसादयो गृह्यन्ते न तु वैपरीत्यमिति नियम इति सूत्रार्थः।३।१।६३।

न पार्थिवाप्ययोः प्रत्यक्षत्वात् ३।१।६४।

सिद्धान्तसूत्रम्—"न पार्थिवा··त्वात्"। नेति त्रिसूत्रीं प्रत्याचष्टे। रूपं तेजस्येत्येवं [?] [रूपवत्त्वेन तैजसमेव चाक्षुषमित्येवं] नियोगपक्षे पार्थिवाप्ययोश्चाक्षुषत्वं न स्यात्, अरूप [व]त्वात्। अस्पर्शत्वाच्च न स्पार्शनत्वमित्यप्रत्यक्षे एव ते स्याताम्। एवं द्रव्यान्तरेऽपि गुणान्तरेऽपि। आगमस्त्वन्याभिप्रायः।३।१।६४।

पूर्वपूर्वगुणोत्कर्षात् तत्तत्प्रधानम् ।३।१।६५

ननु पृथिवीगुणत्वाविशेषे गन्धवद्रसादीनपि घ्राणं गृह्णीयादित्यत्र नियामकमाह—"पूर्वपूर्व···प्रधानम्"। पूर्वं पूर्वं घ्राणादि गुणानां गन्धादीनामुत्कर्षात् उत्तररसनाद्यवृत्तित्वे पूर्वघ्राणादिवृत्तित्वात् तत्तत्प्रधानं तेन स्वगुणेन प्रधानं यतस्ततो न सर्वगुणोपलब्धिः। येनैव हि गुणेन यस्योक्तरूपं प्रधानत्वं स एवोद्भूतस्तेन गृह्यते न सर्वः।३।१।६५।

तद्व्यवस्थानन्तु भूयस्त्वात् ।३।१।६६।

नन्वगन्धाद्यभिव्यञ्जकत्वाविशेषे कुतो नान्यत् तज्जातीयं घ्राणादीत्यत आह—"तद्व्यवस्था···त्वात्"। भूयस्त्वं ग्राह्यजातीयगुणप्रकर्षः। तच्चादृष्टविशेषात्। [पार्थिवं] सर्वं नेन्द्रियं तथैव प्रमाणप्रवृत्तेरिति सूत्रार्थः।३।१।६६।

सगुणानामिन्द्रियभावात् ।३।१।६७।

ननु घ्राणादि पार्थिवादि कथं, गन्धवत्त्वादिति चेन्न तत्र मानाभावात्। भावे वा···दित्यत आह—'सगुणा···भावात्"। गुणविशिष्टानामिन्द्रियत्वात् स्वगुणग्राहकत्वे तेषां कर्मत्वकरणत्वयोरसतो विरोधानु······भावः करणत्व इति ध्येयम्।३।१।६७।

न शब्दगुणोपलब्धेः ।३।१।६८।

आक्षिपति--"न शब्द···लब्धेः"। स्वगुणमिन्द्रियम्।३।१।६८।

तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ।३।१।६९।

समाधत्ते- "तदुप···वैधर्म्यात्"। इतरद्रव्यवैधर्म्यमाकाशस्येतरेन्द्रियगुणवैधर्म्यं च शब्दस्येति······अनुमीयते च परिशेषात् शब्दसाक्षात्कारकरणत्वाच्च। तदिन्द्रियं बाह्यगुणसाक्षात्कारस्य ग्राह्यजातीयविशेषगुणवद् द्वीन्द्रियजन्यत्वात्।३।१।६९।

इति गोतमीयसूत्रप्रकाशे तृतीयाध्यायस्याद्यमाह्निकम्।६९।

तृतीयोऽध्यायः ।

द्वितीयाह्निकम् ।

[बुद्ध्यनित्यत्वप्रकरणम् ।१०।१।]

कर्माकाशसाधर्म्यात् [संशयः] ३।२।१।

सम्प्रति शरीरानुवृत्ति [न्तर्वृत्ति] कारणप्रमेयपरीक्षा। सैवाह्निकार्थः। [अत्र सप्त] प्रकरणानि भवन्ति। तानि यथास्थानं वक्ष्यन्ते। तत्र बुद्धिरात्मादिचतुष्टयकार्येत्यतो हेतुहेतुमद्भावात् पञ्चभिः प्रकरणैः बुद्धिपरीक्षा। मानसः [प्रत्यात्मसंबद्धतया] बुद्धिहेत्वात्मादिपरीक्षायाः परम्परयोपयोगः। तत्राप्युत्तरोत्तरोपयोगात् पूर्वं बुद्ध्यनित्यताप्रकरणम्। तच्च परीक्षानुकूलसंशयोपपादनाय सूत्रम्—"कर्माकाश-साधर्म्यात्"। नित्याकाशानित्यकर्मणोरस्पर्शत्वादिः साधारणो धर्मः [तस्य बुद्धौ सत्त्वादियं नित्याऽ] नित्या वेति संशयः।......

ननु साङ्ख्यादि [नि] रासाय तावदयमायासः।......ज्ञानस्यानित्यत्वं साङ्ख्या अप्याहुः। महत्तत्त्वस्यासिद्धेराश्रयासिद्धिः। बुद्धिपदार्थश्चैतदादिसाधारणः।

उच्यते। द्रव्यत्वबुद्धिः..............समानाधिकरणं न वेति संशयः।३।२।१।

विषयप्रत्यभिज्ञानात् ।३।२।२।

पूर्वपक्षसूत्रम्—"विषय...ज्ञानात्"। बुद्धिनित्यत्वमिति शेषः।

....।

साध्यसमत्वादहेतुः ३।२।३।

सिद्धान्तसूत्रम्—"साध्य...दहेतुः"। बुद्धेर्यथा नित्यत्वमसिद्धमेवं प्रत्यभिज्ञाव-त्त्वम्। ज्ञातुर्हि अहमिति प्रत्यभिज्ञानं, न तु बुद्धेरन्तःकरणरूपायाः। ज्ञानवत्त्वेऽप्या-त्मनः कौटस्थ्यानपायात्। उत्पत्तिविनाशधर्मवत्तद्धर्मधर्मिणोरत्यन्तभेदेन धर्मिणो-रपरिणामित्वे विरोधादित्यर्थः।३।२।३।

[न] युगपदग्रहणात् ।३।२।४।

यस्तु मन्यते बुद्धेरेव स्थिताया यथाविषयं ज्ञानात्मिका वृत्तयो निश्चरन्ति वृत्तमदभिन्ना इति। तां निराकरोति—"युगपदग्रहणात्"। वृत्तिवृत्तिमतोरनन्यत्वे वृत्तिमदवस्थानात् वृत्तीनामवस्थानमिति युगपद् विषयग्रहणप्रसङ्ग इति सूत्रार्थः। ३।२।४।

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः ।३।२।५।

अथ वृत्तीनामनवस्थायित्वम् । तत्राह—"अप्रत्यभिः···प्रसङ्गः" । प्रत्यभिज्ञानस्य वृत्तिरूपस्याभावे तदभिन्नो वृत्तिमानपि नश्येत् । विपर्यये च तयोर्भेदादिति सूत्रार्थः ।३।२।५।

क्रमवृत्तित्वादयुगपद्ग्रहणम् ।३।२।६।

यस्य त्वरितंमनः पर्यायेणेन्द्रियैः संयुज्यते तस्य नायं दोष इत्याह—"क्रम······ग्रहणम्" । क्रमवृत्तित्वात् क्रमेणेन्द्रियमनः सम्बन्धात् सम्बन्धस्य सम्बन्धिनोऽन्यत्वात् नायं दोष इति सूत्रार्थः ।३।२।६।

अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गात् ।३।२।७।

व्यासङ्गश्चाणुमनःपक्ष एवेत्याह—"अप्रत्यभि··व्यासङ्गात्" । अप्रत्यभिज्ञानमज्ञानम्, तदणावेव मनस्युपपद्यते । न च वृत्तिरणुः । वृत्तिवृत्तिमतोरभेदे मनसोऽप्यणुत्वापत्तेः । विभुत्वे च क्रमवृत्तित्वस्याभावादयुगपद् ग्रहणानुपपत्तिरिति सूत्रार्थः ।३।२।७।

न, गत्यभावात् ।३।२।८।

विभुत्वे चान्तःकरणस्यानपेक्षविषयग्राहीन्द्रियविभागजनकक्रियानुपपत्तिरित्याह—"न गत्यभावात्" । न विभुनोऽन्तःकरणस्य गतिः नेन्द्रियाणां गतिः । न चायुगपद्ग्रहणोपपादकान्तरमस्तीति सूत्रार्थः ।३।२।८।

स्फटिकान्यत्वाभिमानवत्तदभिमानः ।३।२।९।

नन्वसिव्या[?]न्तःकरणाभिन्नमेव ज्ञानं वृत्तिरूपम् । तयोर्भेदधीस्त्वौपाधिकी विषयभेदोपधानार्थविधानात् । नीलपीताद्युपधानभेदैः स्फटिकस्येवातो न बुद्धेरनित्यत्वमिति साङ्ख्यमतमाह—"स्फटिकान्य···दभिमानः" ।३।२।९।

न हेत्वभावात् ।३।२।१०।

तदिदं दृष्टान्तमात्रबलेन प्रत्यवस्थानं हेतुहीनं [न] स्वपक्षसाधनायालमित्याह—"न हेत्वभावात्" । केचित्तु नैतत्सूत्रम् । तन्न, पूर्वविचारासमाप्तावुत्तरविचारानवतारात् । न चाक्षेपलभ्यः सिद्धान्तः । शाब्दे पूर्वपक्षे सिद्धान्तस्यापि तथौचित्यात् ।

हेत्वभावादिति भाष्यमिति टीका च सूत्रव्याख्यानभाष्याभिप्रायेण । अत एवाद्याक्षरशून्यं तत्राहेति वृद्धाः ।

अत्रेदं चिन्त्यम् । शरीरपाञ्चभौविकत्ववत् शाब्देऽपि पूर्वपक्षे शाब्दः सिद्धान्तो मा भूत् सुगमत्वादुपेक्षाया उभयसाम्यादिति ।३।२।१०।

[क्षणभङ्गभङ्गप्रकरणम् प्रासङ्गिकम् ।८।२।]

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद् व्यक्तीनामहेतुः ।३।२।११।

सम्प्रति साङ्ख्यमते सौगतैर्यत् साधर्म्यमुक्तं तन्निरासाय प्रासङ्गिकं क्षणभङ्गभङ्गप्रकरणम् । न च "सा नित्याऽनित्या वे" ति [३।२।१।] उपक्रम्योपपन्न"मनित्या बुद्धिरिति" [३।२।१७] भाष्योपसंहारात् पूर्वप्रकरणैकदेश एवायं न तु प्रकरणान्तरमिति वाच्यम् । यत्प्रसङ्गेन क्षणभङ्गभङ्गप्रकरणं तस्यैव प्रकरणस्य भाष्यान्त उपसंहारादविरोधात् । प्रयोजनं चास्य सर्वशास्त्रोपकाराविशेषेऽपि प्राधान्यत आत्मसिद्धिः । स्थैर्ये हि दर्शनस्पर्शनाभ्यामित्यादयः प्रतिसन्धानहेतवो निःप्रत्यूहा भवन्ति । तत्र संशयः, कार्यं स्वसमवायिकारणसमानकालीनं [न] वा ? तत्र पूर्वपक्षसूत्रम्—"स्फटिके···महेतुः" । अभिन्नस्फटिका[वस्थितस्य] उपरागभेदाद् यथा नानात्वाभिमानस्तथा बुद्धीनामिति नात्र हेतुः । स्फटिकेऽप्यपरापरोत्पत्तिर्यतः । न चेयमसिद्धा व्यक्तीनां क्षणिकत्वात् ।३।२।११।

नियमहेत्वभावाद् यथादर्शनमभ्य[भ्य]नुज्ञा ।३।२।१२।

सिद्धान्तसूत्रम्—"नियम···मप्यनुज्ञा" । [स्फटि]कादेर्नाशसामग्रीसमवधानमित्यत्र नियमहेतुर्नास्ति । क्वचिद्दर्शनं तु क्वचिद्दर्शनप्रतिबद्धं बाध्यबाधकभावे······। एवञ्च यथा दृश्यते स्थानियो नाशस्तथा [क्षणिकस्यापि] । शरीरे च न प्रतिक्षणभाविनावुपचयापचयौ येन तथा कल्प्येतापीति भावः ।३।२।१२।

नोत्पत्तिविनाशकारणोपलब्धेः ।३।२।१३।

....

"नोत्पत्ति···पलब्धेः । यत्रावयवसंयोगादि उत्पत्तिकारणम्, अवयवविभागादि नाशकारणमुपलभ्यते तत्र पटादावुत्पत्तिविनाशाद्युपलब्धेः । स्फटिके प्रतिक्षणं न तथा । यैश्चानुपलब्धेरिति[?]सूत्रार्थः ।३।२।१३।

क्षीरविनाशे कारणानुपलब्धिवद्दध्युत्पत्तिवच्च तदुत्पत्तिः ।३।२।१४

पूर्वपक्षवाद्याह—"क्षीरविनाशे···तदुत्पत्तिः" । यथाऽनुपलभ्यमानमपि क्षीरविनाशकारणं दध्युत्पत्तिकारणं चोपेयते [तथा स्फटिकेऽप्यपरापरासु व्यक्तिषु विनाशकारणमुत्पादकारणं चाभ्यनुज्ञेयमिति सूत्रार्थः] ।३।२।१४।

लिङ्गतो ग्रहणान्नानुपलब्धिः ।३।२।१५।

सिद्धान्तसूत्रम्—"लिङ्गतो······नुपलब्धिः" । क्षीरादौ लिङ्गात्तदुपलब्धिरस्त्येव । स्फटिकादौ च न तथा । न च शीतोष्णस्पर्शभेदोपलम्भात् तदनुमानं, तयोरौपाधिकत्वादित्यर्थः ।३।२।१५।

न पयसः परिणामगुणान्तरप्रादुर्भावात् ।३।२।१६।

पूर्वाक्षेपे अन्येषां परिहारमुपन्यस्यति—"न पयसः······प्रादुर्भावात्" । न क्षीरस्य विनाशो न वा दध्न उत्पत्तिः । [अवस्थि]तस्यैव पयसः परिणामति[स्ति] रोभावः । तादृशस्यैव दध्नः प्रादुर्भावमात्रम् । अतो न तत्कारणवत् स्फटिकेऽप्युत्पत्ति-विनाशकारणं कल्पनीयम् । परिणाम एवं गुणः गुणान्तरं वेत्यर्थः ।३।२।१६।

व्यूहान्तराद् द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् ।३।२।१७।

[एतन्निराकरणाय] सूत्रम्—"व्यूहान्तराद्······रनुमानम्" । व्यूहान्तराद-वयवसंस्थानभेदाद् यद् द्रव्यान्तरोत्पत्तिदर्शनम्, तदेव पूर्वद्रव्यनिवृत्तेरनुमानं हेतुः । सति पूर्वद्रव्ये द्रव्यान्तरानुत्पत्तेः । परिणामप्रादुर्भावौ तु न नाशोत्पत्तिभ्यामतिरिच्यत इत्यर्थः ।३।१।२७।

क्वचिद् विनाशकारणानुपपत्तेः[लब्धे]ःक्वचिच्चोपपत्ते[लब्धे]रने-कान्तः ।३।२।१८।

दधिक्षीरोत्पत्तिनाशाधिक[वका]रणादि[वि]त्यभ्युपगम्य दूषयति—"क्वचिद्··· रनेकान्तः" । दधिक्षीरयोरुत्पत्तिनाशावकारणौ दृष्टौ । कुम्भस्य चोत्पादविनाशौ सकारणौ । तदिह स्फटिके सकारणत्वाकारणत्वे संशयः स्यात् । [ऐ]कान्तिकी व्यवस्थितेति सूत्रार्थः । न वा स्फटिके प्रतिक्षणमुत्पत्तिनाशौ कुतश्चित् सिद्धौ । यत्र क्षीरदधिनाशोत्पादौ दृष्टान्तौ स्यातामिति भावः ।३।२।१८।

[बुद्धेरात्मगुणत्वप्रकरणम् ।२४।३।]

नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात् ।३।२।१९।

तदेवं साङ्ख्यादिमतनिराकरणम् । बुद्धेरात्मगुणत्वं प्रति [पूर्वप्रकरणस्य] हेतुतया निर्वाहकतया च तदनन्तरं प्राधान्येन बुद्धेरात्मगुणत्वप्रकरणम् । अन्यत्रात्मनो बुद्धिरूपगुणत्वं साधितम् । प्रयोजनपूर्वपक्षौ पूर्ववत् । विषयसन्निकर्षजत्वसमानधर्म-दर्शनात् सुखादिवदात्मगुण इन्द्रियादिगुणो वा ज्ञानमिति संशयः ।

सिद्धान्तसूत्रम्—'नेन्द्रिया··· वस्थानात्" । इन्द्रियार्थयोः प्रत्येकं समुदितयो र्वा गुणो न ज्ञानम् । तद्विनाशेऽपि ज्ञानस्य भावात् । कथमन्यथा चक्षुराद्यपगमेऽपि तदनुभूतरूपादिस्मरणम् ।३।२।१९।

युगपज् ज्ञानानुपलब्धेश्च न मनसः ।३।२।२०।

मनोगुणत्वनिरासाय सूत्रम्—"युगपज्······मनसः" । युगपज्ज्ञानानुपलब्ध्या यदर्थं मनोऽनुमितं न तस्य गुणो ज्ञानम् । कारणत्वेनैव तत्सिद्धेः । परमाणुगुणस्या-तीन्द्रियतया ज्ञानादेरप्रत्यक्षत्वापत्तेः । मनोगुणत्वे योगिनां कायव्यूहस्याप्य[पि]भोगा-

भावप्रसङ्गात् । तस्य युगपज्ज्ञानानुत्पत्त्या अर्थत्वेनैव कल्पनादिति चकारार्थः । न च मनो विभु, संज्ञाभेदमात्रत्वात् । स्मृत्यनुमितादेः करणजन्यतया मनोऽन्तरस्यावश्यं कल्पनादित्यर्थः ।३।२।२०।

तदात्मगुणत्वेऽपि तुल्यम् ।३।२।२१।

पूर्वपक्ष्याह—"तदात्म ·····तुल्यम्" । ज्ञानस्यात्मगुणत्वेऽपि यौगपद्यापत्तिः । विभोस्तस्य सर्वेन्द्रियैः सम्बन्धाविशेषादिति सूत्रार्थ ।३।१।२१।

[इन्द्रियैर्मनसः] सन्निकर्षाभावात्तदनुत्पत्तिः ।३।२।२२।

सिद्धान्तवाद्याह—"सन्निकर्षा·····नुत्पत्तिः" । इन्द्रियमनःसन्निकर्षो ज्ञान-हेतुस्तदभावात्तादनुत्पत्तिर्युगपदिति सूत्रार्थः ।३।२।२२।

नोत्पत्तिकारणानपदेशात् ।३।२।२३।

नन्वात्मेन्द्रियार्थसन्निकर्षादेव ज्ञानमुत्पद्यते किं मनसेत्यत आह—"नोत्पत्ति··· देशात्" । मनोनैरपेक्ष्येण ज्ञानमुत्पद्यत इत्यत्र ज्ञानायौगपद्यान्यथानुपपत्तौ वा त्वदुक्त सामग्रीतः शरीरानवच्छिन्नेऽप्यात्मनि ज्ञानोत्पत्तिप्रसङ्गनिरासे वा त्वया कारणं हेतुर्नापदिश्यते प्रत्युत मनोऽपेक्षायामेव मानमस्तीति ।३।२।२३।

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ।३।२।२४।

पूर्वपक्षसूत्रम्—"विनाश······प्रसङ्गः"। चकारः पूर्वशङ्कासूत्रसमुच्चये । आत्म-गुणत्वे बुद्धेर्नित्यत्वप्रसङ्गः । आश्रयनाशाभावात् आत्मनो नित्यत्वात् । विरोधि-गुणस्य चाभावादित्यर्थः ।३।२।२४।

अनित्यत्वग्रहणाद् बुद्धेर्बुद्ध्यन्तराद् विनाशः शब्दवत् ।३।२।२५।

सिद्धान्तसूत्रम्—"अनित्यत्व · ···शब्दवत्" । बुद्धेरनित्यत्वस्थापनात्, तत्र च कारणान्तरस्याभावात् बुद्ध्यादिरेव विरोधी गुणस्तन्नाशकः कल्प्यते । यथा शब्दस्य शब्दान्तरमित्यर्थः ।३।२।२५।

ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः ।३।२।२६।

ननु बुद्धेरात्मगुणत्वेऽपि युगपत् स्मृतयः स्युः । आत्मनि स्मृतिहेतूनां संस्काराणां मनःसन्निकर्षस्य च सत्वात् । कारणक्रमाभावात् परिच्छेद-स्वाभाव्यात् करणधर्मत्वाद्वा ज्ञानक्रम इति चेन्न तर्हि कारणक्रमस्तत्र प्रयोजक इति किं मनसा ?

अत्रैकदेशिनः परीहारसूत्रम्—"ज्ञानसमवेत·····दुत्पत्तिः" । यत्रात्मप्रदेशे ज्ञानं समवेतं तत्रैव तज्जन्यः संस्कारोऽपीति तत्तत्प्रदेशे मनःसन्निकर्षक्रमात् स्मृतिक्रम इत्यर्थः ।३।२।२६।

नान्तःशरीरवृत्तित्वान्मनसः ।३।२।२७।

तमिमं परिहारमेकदेशिनो दूषयति—"नान्तः······मनसः" । आत्मनो नान्ये प्रदेशाः किन्तु ते ते विषया दे[ए]व । तैश्च व्यवहितैर्मनो न संयुज्यते । शरीरान्तर्वृत्तित्वात्तस्य । अन्यथा मनसो देहाद्बहिर्भावे नित्यं प्रायणादिप्रसङ्गात् । अतो न तत्क्रमात् स्मृतिक्रम इत्यर्थः ।३।२।२७।

साध्यत्वादहेतुः ।३।२।२८।

आक्षिपति—"साध्य···हेतुः" । मनः शरीरान्तरे वर्तत इत्यसिद्धम् । जीवनमदृष्टविशेष इत्यर्थः ।३।२।२८।

स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः ।३।२।२९।

समाधत्ते—"स्मरतः···प्रतिषेधः" । मनः प्रणिधाय चिरेण शरीरासंबद्धमथ चिन्तावशात् स्मरता [शरीरधारणं दृश्यते] शरीरलिङ्गते [शरीरानालिङ्गते] मनसि गुरुत्वाच्छरीरं पतेत् । शरीरे [आत्म]मनःसन्निकर्षं विना धारकप्रयत्नाभावादिति सूत्रार्थः ।३।२।२९।

न तदाशुगतित्वान्मनसः ।३।२।३०

पुनराक्षिपति—"न तदाशु··· मनसः" न धारकप्रयत्नानुपपत्तिः । आशु सञ्चारि मनो धारकं प्रयत्नमुपपाद्य निःसृतमथवा निःसृत्य धारकं प्रयत्नमुत्पादितवदिति कल्पनादिति सूत्रार्थः ।३।२।३०।

न, स्मरणकालानियमात् ।३।२।३१।

समाधत्ते—"न स्मरण······नियमात्" । यत्र सुस्मूर्षया चिन्तया चिरेण कञ्चिदर्थं स्मरति तत्र देहधारणं न स्यात् । नहि शीघ्रमेव स्मृतिर्भवतीति नियम इत्यर्थः । किञ्च यदि शरीरालिङ्गितं मनः शरीरा[र]संयोगानपेक्षं स्मृतिं जनयेत् तदा देहस्य भोगायतनत्वभङ्गे तन्निर्माणवैयर्थ्यं स्यादिति भावः ।३।२।३१।

आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः ।३।२।३२।

अत्रैकदेशिपरीहारमाह—"आत्मप्रेरणः विशेषः" । मनसो वहिर्गतस्य न संयोगविशेषः प्रदेशविशेषेण । स हि न स्मरणार्थम्, प्रेणरस्य तज्ज्ञानपूर्वकतया प्रागेव तदर्थस्य स्मृत्यापत्तेः । तत्तत्प्रदेशानामप्रत्यक्षत्वाच्च । नापि यदृच्छया अकस्मात् आकस्मिकत्वनिषेधात् । नापि ज्ञत्वेन, मनसस्तत्र तत्प्रतिषेधादिति मनो बहिर्यातीत्यनु[यु]क्तमिति ।३।२।३२।

व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् ।३।२।३३।

तद्दूषयति—"व्यासक्त···समानम्" । यद् व्यासक्तमनसश्चरणादौ कण्टकादियोगात् पादे व्यथनात् दुःखमुत्पद्यते । तेन तुल्यमिदम् । अथादृष्टादेर्यदि तत्र शीघ्रं मनसः क्रिया तदत्रापि सम्भवतीति नायं परीहार इति ।३।२।३३।

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावादयुगपत्स्मरणम् ।३।२।३४।

कथं तर्हि स्मृतीनां क्रम इत्यत आह—"प्रणिधान···स्मरणम्" । प्रणिधानादीनां संस्कारसहकारिणां क्रमात् स्मृतीनां क्रम इति सूत्रार्थः ।३।२।३४।

ज्ञस्येच्छाद्वेषनिमित्त्वादारम्भनिवृत्त्योः ।३।२।३५।

पुरुषधर्मो ज्ञानमन्तःकरणस्येच्छादिपञ्च[क]मिति सांख्यैकदेशी । तन्मतमपाकर्तुमाह—"ज्ञस्येच्छा···निवृत्योः" । ज्ञानेच्छादीनां सामानाधिकरण्ये प्रत्यक्षसिद्धेऽप्युपपत्तिसूचनाय सूत्रम् । प्रवृत्तिनिवृत्योर्ज्ञानवैयधिकरण्येऽतिप्रसङ्गात् । भेदाग्रहस्य दूषितत्वादित्यर्थः ।३।२।३५।

तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः ३।२।३६।

अत्रान्तरे यदि यस्यारम्भनिवृत्ती तस्येच्छाद्वेषौ, यस्य च तौ तस्य चैतन्यम् । हन्तायति [हन्त ! आपतति] भूतचैतन्यम् । भूतानामेव कायाकाराणां स्पन्दरूपायाः प्रवृत्तेर्दर्शनादिति नात्मगुणता बुद्धेरिति लब्धावकाशो भूतचैतनिकः प्रत्यवतिष्ठते—"तल्लिङ्ग···प्रतिषेधः" । पार्थिवशरीरेषु प्रवृत्यादिदर्शनात् तद्गुणत्वं बुद्धीच्छाद्वेषाणामित्यर्थः । आद्यपदं पाञ्चभौतिकत्वाभिप्रायम् तैराप्याद्यानङ्गीकारात् ।३।२।३६।

परश्वादिष्वारम्भनिवृत्तिदर्शनात् ।३।२।३७।

सिद्धान्तसूत्रम्—"परश्वा···दर्शनात्" । उक्तहेतोर्न शरीरचैतन्यम् । नहि स्पन्दास्पन्दौ प्रवृत्तिनिवृत्ती लिङ्गमिच्छादौ, साध्यहीने परश्वादौ गतत्वात् । किन्तु प्रयत्नरूपे ते विवक्षिते । तथा च ते वाक्छलमित्यर्थः ।३।२।३७।

नियमानियमौ तु तद्विशेषकौ ।३।२।३८।

परं निरस्य स्वपक्षे साधकमाह—"नियमा···शेषकौ" । तयोरिच्छाद्वेषयोर्विशेषकौ भूतवृत्तित्वव्यावृत्त्या तदन्यगुणत्वव्यवस्थापकौ **नियमा नयमौ** । नियमो हि क्वचिदेव वृत्तिः सर्वत्र[अ]वृत्तिर्वा विवक्षाभेदात । अनियम एतद् विपर्ययः । सर्वत्र वृत्तिः क्वचिद्[द]वृत्तिर्वा । तेनेच्छादीनां पृथिव्यादिगुणत्वे तदेकदेशवृत्तिता न स्यात । स्याच्च सर्वपृथिव्यादिवृत्तिता गुणत्वादीनामिवेति सूत्रार्थः ।३।२।३८।

यथोक्तहेतुत्वात् पारतन्त्र्यात् स्वकृताभ्यागमाच्च न मनसः ।३।२।३९।

दूषणान्तरमाह—"यथोक्त···मनसः" । यथोक्तमाप्तलक्षणात् प्रकृतिभूतादि-गुणत्वनिषेधे हेतुजातं तत्तथैव परीक्षितत्वात् सुदृढमिति प्रकटनाय त्वप्रत्ययः । मनस्तूदाहरणमात्रम् । पारतन्त्र्यं परव्यापार्यत्वम्, भूतत्वमूर्तत्वादिकम् । यस्तु कश्चिदभ्युपेतवेदप्रामाण्यः पुरुषमचेतनं फलभागिनमभ्युपगम्य शरीरादीनां चैतन्यं मन्यते तं प्रति तदचैतन्यहेतुमाह स्वकृताभ्यागमाच्च । शरीरादीनां चैतन्ये स्वातन्त्र्यात् त एव कर्मणः कर्तारः । न च तेषां भस्मसाद् भूतानां स्वर्गादिभागिता । अतोऽचेतनस्यात्मनस्तद्भागिता वाच्या । न चैतद् युज्यते कर्त्रपेक्षितोपायताबोध-कत्वादुपदेशस्योत्सङ्गतः कर्तृगतफलबोधकत्वात् पुंसः कर्तृत्वे चैतन्ये च स एव युक्त इति ।३।२।३९।

परिशेषाद् यथोक्तहेतूपपत्तेश्च ।३।२।४०।

प्रागुक्तहेत्वर्थमुपसंहरति—"परिशेषाद्···पत्तेश्च" । आत्मगुणा ज्ञानादय इति शेषः । परिशेषः प्रसक्तनदन्ययावद्बाधे तदन्वयफलकमनुमानम् । यथोक्तानां हेतूनां प्रतिसन्धानस्मृत्यादीनामुपपत्तेर्व्यवस्थितेः विरोधनिरासात् । यद्वा उपपत्तेश्चेति हेत्वन्तरमेव । श्रूयते हि नित्योऽयमात्मा धर्माधर्माचरित[त]त्वात् देहान्तरे स्वर्गनरकौ प्राप्नोतीति । चकारेण संसारापवर्गौ आत्मन एव चेतनस्येति समुच्चीयते ।३।२।४०।

स्मरणं त्वात्मनो ज्ञस्वाभाव्यात् ।३।२।४१।

ननु बुद्धेः क्षणिकत्वात् कथं चिरेण तज्जन्या स्मृतिरत आह—"स्मरणं··· स्वाभाव्यात्" । उपपद्यत इति शेषः । तु शब्दोऽवधारणे । आत्मनो ज्ञस्वाभाव्यं ज्ञानसमवायिकारणतावच्छेदकरूपम् । तस्माज् ज्ञानवत्त्वेन तज्जन्यज्ञानसंस्कार-समानाधिकरणं स्मरणमुपपद्यते नान्यथेत्यर्थः ।३।२।४१।

प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धा-नन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्व क्रियारागधर्माधर्मनिमित्तेभ्यः ।३।२।४२।

इदानीं चिन्तान्तरान्तरितं स्मरणयौगपद्यसमाधानं तत्परिसमाप्ताववसरप्राप्तौ "स्मरणं त्वात्मनो ज्ञस्वाभाव्यात्" [३।२।४१।] इति स्मारयित्वा तद्बोधापरनामक सहकारिक्रमेण स्मरणक्रम इति दर्शयितुं सूत्रमाह—"प्रणिधान·······निमित्तेभ्यः । संस्कारोद्बोध इति शेषः । प्रणिधानं तत्तद्विषयावगाहिष्विन्द्रियेषु लग्नमनसो विषयान्तरासङ्गवारणेन सुस्मूर्षितसम्बन्धिनि धारणम् । निबन्ध एकग्रन्थोपग्रह आनुपूर्वी वा । अभ्यासोऽभ्यावृतिः । तेन स्वजन्यो दृढः संस्कारो लभ्यते । लिङ्गं व्याप्यं, तेन व्यापकः [स्य] स्मृतिः । लक्षणं चिह्नं साङ्केतिकम् । गवादौ शृङ्गादि ।

तेन तत्कर्ता स्मर्यते। यथा गं णां[?] गौरयमिति। सादृश्यं चित्रगतप्रतिकृत्यादि। तेन तदाश्रयः स्मर्यते। परिग्रहः स्वीकरणम्। यथाश्वेन स्वामी, स्वामिना वाश्वं स्मर्यते। आश्रय उपजीव्यः। यथा ग्रामण्या तदधीनं स्मरति। आश्रित उपजीवकः। यथा अधीनेन ग्रामण्यम्। सम्बन्धः गुर्वन्तेवासित्वादिः। स च यद्यपि प्रणिधानादप्यस्ति तथापि गोवृषन्यायात्तावद्भिन्नः सम्बन्धो ज्ञेयः। आनन्तर्यं क्रमः। यथाहुः कर्तव्येषु प्रबोधानन्तरमुत्थानं ततो मौन[शौच]मित्यादि। वियोगः शोकस्तेन शोच्यं स्मरति। एकीकार्य कर्तव्यं येषां तत्रैकं दृष्ट्वाऽन्यं स्मरति। विरोधो यथा विजिगीषमाणयोरन्यतरदर्शनेनान्यतरः स्मर्यते। अतिशयः संस्कारः। स येनाचार्येणोत्पादितस्तमाचार्यं ब्रह्मचारी स्मरति। प्राप्तिः धनादिनातः यतोऽनेन लब्धं लब्धव्यं वा तमभीष्टं वा स्मरति। व्यवधानमावरणम्। यथा कोशादिभिरस्यादयः स्मर्यन्ते। सुखदुःखाभ्यां तद्धेतुः स्मर्यते। इच्छाद्वेषाभ्यां यमिच्छति यं च द्वेष्टि तं स्मरति। भयाद् यतो बिभेति तं स्मरति। अर्थित्वात् येनार्थी सुवर्णादिना तं स्मरति। क्रियया रथेन रथकारं स्मरति। रागात् यस्यां स्त्रियां रक्तो भवति तां स्मरति। धर्माधर्माभ्यां जातमात्रस्य सुखादिसाधनतास्मरणमाद्यप्रवृत्त्यादिहेतुः। निमित्तग्रहणमुक्त्वा[क्ता]ऽतिरिक्तलोकसिद्धानां तत्तत्स्मृतिहेतूनां संग्रहः [हार्थः] ३।२।४२।

[बुद्धेरुत्पन्नापवर्गित्वप्रकरणम् ४।४।]

कर्मानवस्थायिग्रहणात् ।३।२।४३।

सम्प्रति उत्पन्नापवर्गित्वेन बुद्धिः परीक्ष्यते। तदेव प्रकरणार्थः। तत्रोपोद्घातः सङ्गतिः। ज्ञानेच्छाप्रयत्नानां सामानाधिकरण्ये बुद्धेः प्रत्यक्षं प्रमाणमुक्तम्। तच्चाशुविनाशित्वे घटते। तथा भूतस्यैवात्मगुणस्य प्रत्यक्षत्वात्। स्थिरस्यादृष्टादेव प्रत्यक्षत्वनियमादिति। यद्वा "स्मरणं त्वात्मनो ज्ञस्वाभाव्यात्" [३।२।४१।] इत्युक्तम्। तदेतत् स्मरणे सति स्यात्। तच्च सति संस्कारे। स च ज्ञानस्याशुविनाशित्वेन नत्वन्यथेति। तदिह बुद्धिविषयः, अनित्यत्वादिसाधारणधर्मदर्शनात् चिरस्थायिनी घटवत् आशुविनाशिनी शब्दवद् वेति संशयः। प्रयोजनमुक्तम्। पूर्वपक्षस्तु अनुभवः स्मृतिहेतुरिति साधितम्। हेतुत्वं च साक्षात् परम्परया वा अन्त्ये व्यापारस्य योग्यानुपलम्भबाधः। अयोग्यतत्कल्पने च तत्कल्पनं तत्स्थैर्यकल्पनं चेति तावत् कालं बुद्धेरेव स्थैर्यं कल्प्यताम् लाघवात्। एवमाद्यमेवमुक्तम् आशुविनाशित्वे मानाभावश्चेति।

अत्र सिद्धान्तसूत्रम्—"कर्मा···ग्रहणात्"। क्षिप्तस्येषोराद्यकर्मणः विभागादिना नाशेऽपि तज्जन्यसंस्कारात् कर्मोत्पत्तौ तन्नाशात् पुनः संस्कारान्तरात् कर्मसन्तानोत्पत्तौ प्रत्यर्थनियतबुद्धिसन्तानगोचरं प्रत्यक्षमनुभवसिद्धम्। तत्राद्यकर्मगोचरं प्रत्यक्षं नोत्तरं तद्विषयीकरोति। तदानीं तस्यानागतत्वात्। न चोत्तरकाले तद् गृह्णाति। बुद्धेर्विरम्य व्यापाराभावात्। तस्माज् ज्ञानान्तरं गृह्णाति। न च पूर्वमपि ज्ञानं तदा ज्ञानद्वयानुपलम्भात्। तथा च तत्तद्बुद्धीनां तत्तत्कर्मनियतत्वात् आशुविनाशित्वमिति सूत्रार्थः ।३।२।४३।

अव्यक्तग्रहणमनवस्थायित्वात् विद्युत्संपाते रूपाव्यक्तग्रहणवत् ।३।२।४४।

नन्वाशुतरविनाशित्वे प्रत्यर्थनियमे तद्बुद्धीनां विद्युत्प्रदीपार्चिषोस्तुल्योपलम्भ इति शङ्क्ते—"अव्यक्त·· ग्रहणवत्" । यथा विद्युदादे रूपादिग्रहणमव्यक्तम् । तथा बुद्धेराशुविनाशित्वे घटादिग्रहणं स्यात् । बुद्ध्यनवस्थानस्यैवाव्यक्तत्वादित्यर्थः । ३।२।४४।

हेतूपादानात् प्रतिषेद्धव्याभ्यनुज्ञा ।३।२।४५

अत्रोत्तरम्—"हेतू···भ्यनुज्ञा" । विद्युत्संपाते बुद्धेराशुविनाशित्वं चेदभ्यनुज्ञातं तर्हि प्रतिषेद्धव्यं क्वापि स्वीकृतमिति विरोध इति सूत्रार्थः । बुद्धेश्च व्यक्तत्वाव्यक्तत्वे एकत्र सामान्यविशेषतद्वतां ग्रहणादन्यत्र सामान्यतद्वतोः । ते च सामग्रीतद्विशेषाधीने, न तु बुद्ध्यवस्थानानवस्थानप्रयोज्ये ।३।२।४५।

प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत् तद्ग्रहणम् ।३।२।४६।

किञ्च सर्वा बुद्धिः स्वविषये व्यक्तैवान्यत्र न व्यक्ता नाव्यक्ता । न वा बुद्धेरवस्थानादव्यक्तत्वं ग्रहणस्यापद्यते अनेकान्तादित्याह—"प्रदीपा ··तद्ग्रहणम्" । बुद्धीनामाशुविनाशित्वेऽपि व्यक्तत्वमविरुद्धम् । यथा प्रदीपार्चिषां नानात्वात् सन्तत्या वर्तमानादध्यक्षं व्यक्तं नाना च विषयभेदानुविधानादिति ।३।२।४६।

[बुद्धेः शरीरगुणव्यतिरेकप्रकरणम् ।१०।५।]

द्रव्येषु स्वगुणपरगुणोपलब्धेः संशयः ।३।२।४७।

एवं बुद्धेरुत्पन्नापवर्गित्वस्य शरीरगुणत्वाभावसाधकत्वात् वक्ष्यमाणाद् यावद्द्रव्यभावित्वादेस्तद्धेतोरनुकूलत्वाच्च अनन्तरं शरीरगुणत्वव्यतिरेकप्रकरणम् । पूर्वं प्रसङ्गात् तथा, सम्प्रति साक्षादित्यपौनरुक्त्यम् ।

ननु सार्वलौकिकात् प्रत्यक्षादेव बुद्धेः शरीरगुणत्वं सिद्धमिति संशयाभावात् क्व विचार इत्यत आह—"द्रव्येषु···संशयः" । विरोधिसाधकोपस्थितौ विशेषादर्शनदशायामुपलम्भमात्रात् समानात् धर्मात् संशयः सम्भवति । जले हि तद्गुणाः द्रवत्वादयः परगुणाः औष्ण्यादय उपलभ्यन्ते इति सूत्रार्थः । प्रत्यक्षस्योपजीव्यजातीयतया बलवत्वाभिमानादत्र पूर्वपक्षः ।३।२।४७।

यावच्छरीरभावित्वाद् रूपादीनाम् ।३।२।४८

सिद्धान्तसूत्रम्—"यावच्छ··दीनाम्" । न शरीरगुणश्चेतनेति शेषः । ये हि शरीरगुणास्ते यावद्द्रव्यभाविनः । यथा रूपादय इति व्यतिरेकी ।३।२।४८।

न, पाकजगुणान्तरोपलब्धेः ।३।२।४९।

ननु पिठरपाकपक्षे तद्रूपादिभिर्व्यभिचार इत्यत आह—"न,...पलब्धेः" । न व्यभिचारः । एकस्मिन् रूपादौ निवृत्ते सति रूपाद्यन्तरमुत्पद्यते नात्यन्तं पिठरे रूपाभावः । नचैवं चेतनेति सूत्रार्थः ।३।२।४९।

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ।३।२।५०।

तदेवमात्यन्तिकानात्यन्तिकत्वे वैधर्म्यमुक्त्वा प्रतिद्वन्द्वित्वाप्रतिद्वन्द्वित्वे वैधर्म्यमाह—"प्रतिद्वन्द्वि...प्रतिषेधः" । ये शरीरविशेषगुणास्तेषां शरीरवृत्तिसजातीयगुणान्तरं विरोधि भवति । यथा रूपादेः रूपाद्यन्तरम् । एकत्रैकदा रूपत्वाननुभवात् । चेतनायाश्च न चेतनान्तरं रूपादयो वा एकदावस्थानविरोधिनः । अतो रूपादिषु व्यभिचारान्न यावच्छरीरभावित्वप्रसङ्ग इति न प्रतिषेध इत्यर्थः ।३।२।५०।

शरीरव्यापित्वात् ।३।२।५१।

अनिष्टप्रसङ्गान्तरमाह—"शरीरव्यापित्वात्" । यदि चेतनं शरीरविशेषगुणः स्यात् रूपादिवद् व्याप्यवृत्ति स्यादिति विपर्ययेण प्रयोगः । शब्दो दृष्टान्तः । यद्वा शरीरव्यापित्वादित्यत्र चेतनाया इति शेषः । सर्वः शरीरावयवश्चेतन उपलभ्यते । तथा चैकस्मिन्नपि शरीरे बह्वयश्चेतनाः स्युः । न चैवं, हस्तेनानुभूतस्य छिन्ने तस्मिन्नस्मरणप्रसङ्गादित्यर्थः ।३।२।५१।

न, केशनखादिष्वनुपलब्धेः ।३।२।५२।

अत्र पूर्वपक्षसूत्रम्—"न, केश...लब्धेः" । दृष्टान्तार्थमिदम् । करचरणादयो न चेतनाः, शरीरावयवत्वात् केशादिवदित्यर्थः ।३।२।५२।

त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गात् ।३।२।५।

सिद्धान्तसूत्रम्—"त्वक्पर्यन्त...प्रसङ्गात्" । केशादीनां शरीरावयवत्वमसिद्धम् । अतः साधनविकलो दृष्टान्तः । असाधारणानैकान्तिकत्वं च । घटादेरपि व्यावृत्तेः । न च केशादयोऽपि शरीरावयवाः । त्वक्पर्यन्तमेव शरीरम् । यत इन्द्रियाश्रयत्वं हि शरीरलक्षणम् ।३।२।५३।

शरीरगुणवैधर्म्यात् ।३।२।५४।

बाधकान्तरमाह—"शरीर...धर्म्यात्" । ये शरीरगुणा दृष्टास्ते बहिरिन्द्रियग्राह्याः । यथा रूपादयः । अतीन्द्रिया एव वा । यथा गन्धत्वादयः । न चैवं चैतन्यमित्यर्थः ।३।२।५४।

न, रूपादीनामितरेतरवैधर्म्यात् ।३।२।५५।

आक्षिपति—"न, रूपा···वैधर्म्यात्" । यथा परस्परविधर्मिणोऽपि रूपादयस्तथा चेतनापि स्यादित्यर्थः ।३।२।५५।।

ऐन्द्रियकत्वाद् रूपादीनामप्रतिषेधः ।३।२।५६।

समाधत्ते—"ऐन्द्रिय·· प्रतिषेधः" । शरीरगुणत्वव्यापकं बाह्येन्द्रियप्रत्यक्षाप्रत्यक्षान्यतरत्वम् । तच्चेतनातो व्यावर्तमानं शरीरगुणत्वमपि व्यावर्तयति । रूपादीनां तु मिथोवैधर्म्यं चाक्षुषत्वादिकं सदपि न शरीरगुणत्वव्यापकमित्यर्थः ।३।२।५६।

[मनःपरीक्षाप्रकरणम् ।४।६।]

ज्ञानायौगपद्यादेकं मनः ।३।२।५७।

तदेवं पञ्चभिः प्रकरणैः बुद्धिः परीक्षिता । इदानीमुद्देशक्रमानुरोधेन मनःपरीक्षाप्रकरणम् । मनः प्रतिशरीरमेकमनेकं वेति संशयः ? प्रयोजनं च तल्लक्षणव्यवस्थितौ तेनात्मभेदानुमानम् । प्रत्याहारसिद्धावेकाग्रतायां प्रयत्नलाघवात् प्रवृत्तिसौकर्यं च । अन्यथैकस्मिन् मनसि प्रत्याहृते मनोऽन्तरविक्षेपादेकस्मिन्नपि [शरीरे]··· नाशुसञ्चारिणि वा प्रत्याहारसिद्धिः [मनोऽन्तरविक्षेपादसञ्चारित्वे विभुत्वे वा प्रत्याहर्तुमशक्यत्वात् न प्रत्याहारादिसिद्धिः] । तथा च निदिध्यासनासिद्धौ मननार्थ [ानुप] योगे न्यायविद्यावैयर्थ्यमापद्येत । सुस्वापजागरणजीवनमरणव्यवस्था च प्रयोजनम् । पुरीतत्यवस्थितौ सुस्वापः । शरीराद् विच्युतौ चैकस्य प्रायणमिति । तत्र पूर्वपक्षः ज्ञानयौगपद्यप्रत्ययोऽसति बाधके प्रमा । न च व्यासङ्गाद्यनुपपत्तिः । एकदा सर्वमनसामेकेन्द्रियसम्बन्धेनैव तदुपपत्तेः । तेषां चैकदा पुरीतत्यवस्थितौ प्रच्युतौ च तदुभयोपपत्तेरिति ।

अत्र सिद्धान्तमाह—"ज्ञाना····· मनः" । ज्ञानानां युगपदुत्पादो नोभयसिद्धः । क्रमोत्पादस्तु व्यासङ्गादावुभयसिद्ध इति तद्दृष्टान्तेन क्रमः सर्वत्रानुमीयते । मनःकल्पनलिङ्गेन लाघवादेकस्यैव कल्पनात् ।३।२।५७।

न, युगपदनेकक्रियोपलब्धेः ।३।२।५८।

आक्षिपति—"न, युग···पलब्धेः" । युगपदनेकाः क्रियाः दृश्यन्ते । अयं खल्वध्यापकोऽधीते, व्रजति, दन्तं धावयते [दण्डं धारयति] स्मरति गन्तव्यं [स्थानीय] मतोऽनेकं मन इति सूत्रार्थः ।३।२।५८।

अलातचक्रदर्शनवत्तदुपलब्धिराशुसञ्चारात् ।३।२।५९।

यथाशुसञ्चारादलातस्य भ्रमतो विद्यमानः क्रमो न लक्ष्यते क्रमाग्रहणादविच्छेदबुद्ध्या चक्रबुद्धिर्भवति । तथा बुद्धीनां क्रियाणां चाशुविनाशित्वाद् विद्यमानक्रमाग्रहे यौगपद्याभिमानः ।३।२।५९।

यथोक्तहेतुत्वाच्चाणु ।३।२।६०।

तथापि विभुन एव मनसः करणधर्मत्वाद् बुद्धिक्रमोऽस्त्वित्यत आह—"यथोक्त ⋯चाणु"। यथोक्तो हेतुर्यत्र स यथोक्तहेतुस्तस्य भावस्तत्त्वम् तस्मात्। यथोक्तस्य हेतुत्वादिति वा। तेन यथा ज्ञानायौगपद्यादेकं मनस्तथाऽण्वपीति समुच्चये चकार इति सूत्रार्थः ।३।२।६०।

[शरीरस्यादृष्टनिष्पाद्यत्वप्रकरणम् ।१२।७।]

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः ।३।२।६१।

सम्प्रति शरीरस्य पुरुषसमवेतादृष्टनिष्पाद्यताप्रकरणम्। सा च यद्यपि शरीर-निरूपणावसर एव निरूपयितुमर्हा। तथाप्येवं मन एव सम्बन्धिमुखेन परीक्षितं भवतीति तदनन्तरमेव तदवतारः प्रसङ्गसङ्गत्या। इन्द्रियान्तराणामिव मनसोऽपि शरीर एव वृत्तिलाभात्। पुरुषभोगस्य शरीरायतनत्वाच्च। तत्र किं शरीरमदृष्टकार-णकमुत नेति विप्रतिपत्तेः संशयः। अदृष्टमप्यात्मगुणो भूतगुणस्तदन्यो वा ? प्रयोजनं च विग्रहादिव्यवस्था संसारापवर्गव्यवस्था प्रायणव्यवस्था च। आत्मसंबन्धस्य सर्व-देहसाधारण्यात् सर्वाणि शरीरेन्द्रियमनांसि सर्वस्य न वा कस्यचित् स्युः। भूत-स्वाभाव्यादारम्भे तदनुपरमे अपवर्गाभावः भोगप्रयोजकरूपानपायात्। अन्यथा संसारो न स्यात्, प्रायणानुपपत्तिश्च। जीवनप्रयोजकाद् प्रच्यवते [?] [दृष्टनिमित्ताद्] वर्णाश्रमप्रवृत्तयस्तदर्थानि च शास्त्राणि निष्फलानि स्युः। सति त्वदृष्टे सर्वमुपपद्यत इति मनस्त [?] लोकशास्त्रोपकारकमिदं प्रकरणम्।

पूर्वपक्षस्तु दृष्टादेव कारणकलापाच्छरीरोत्पत्तिरन्वयादिदर्शनात् अदृष्टकल्प-नायां मानाभावादिति।

सिद्धान्तसूत्रम् —"पूर्वकृत⋯तदुत्पत्तिः"। पूर्वकृता पूर्वशरीरसाधिता विहित-निषिद्धगोचरप्रयत्नरूपा प्रवृत्ति स्तत्फले धर्माधर्मौ तस्यानुबन्धो विपाककालानियम [व्य]वस्थितस्य सहकारिसाचिव्यम्। ततो भूतसंयोजनद्वारा शरीरोत्पत्ति-रित्यर्थः ।३।२।६१।

भूतेभ्यो मूर्त्युपादानवत्तदुपादानम् ।३।२।६२।

अत्र नास्तिक आक्षिपति—"भूतेभ्यो⋯दुपादानम्"। यथा कर्मनिरपेक्षेभ्य एवैभ्यो मूर्तयः सिकतापाषाणाद्याः पुरुषार्थप्रयोजनत्वादुपादीयन्ते। तथा शरीरमप्यु-पादीयेत। तथा च लक्ष्यमाणो हेतुरनेकान्त इति सूत्रार्थः ।३।२।६२।

न, साध्यसमत्वात् ।३।२।६३।

समाधत्ते—"न, साध्यसमत्वात्"। यथा शरीरोत्पत्तिरकर्मनिमित्ता साध्या तथा सिकताद्युत्पत्तिरति। तत्र पक्षसमेनानेकान्तः। ३।२।६३।

नोत्पत्तिनिमित्तत्वान् मातापित्रोः ।३।२।६४।

तथा आहारस्य ।३।२।६५।

सिकतादीनां कर्मनिमित्तत्वेऽपि तत्साध्यं शरीरे निराकरोति सूत्राभ्याम्—"नोत्पत्ति·······पित्रोः" । "भूतेभ्यो मूर्त्युपादानवदिति" [३।२।६२।] सिकता साम्यं न शरीरे । मातापित्रोर्लोहितरेतः संयोगजननद्वारा देहोत्पत्तिनिमित्तत्वं यतः । सिकतादौ तदभावात् । सत्त्वस्य गर्भे वासानुभवनीयं कर्म, पित्रोश्च पुत्रफलानुभवनीये कर्मणी मातुर्गर्भाशये शरीरोत्पत्तिं [भूतेभ्यः] प्रयोजयन्तीत्युपपद्यते बीजानुविधानमिति ।३।२।६४।

"तथा आहारस्य" । उत्पत्तिनिमित्तत्वादित्यनुषज्यते । [भुक्तं पीतमाहारस्तस्य पक्तिनिर्वृत्तं] रसद्रव्यं मातृशरीरे [चोपचिते बीजे] गर्भे च [बीजसमानपाकं] मात्रया चोपचीयते । उपचितं च [कललार्बुदादि] क्रमेण देहमारभते ।

न चैवं स्थाल्यादिगतस्या [न्नस्य पाके भोक्तुर्वै] लक्षण्यं सिद्धमिति । प्रयोगोऽस्मदादिशरीरं भोक्तृविशेषगुणप्रेरितभूतपूर्वकं कार्यत्वात् रूपादिवदिति दिक् ।३।२।६५।

प्राप्तौ चानियमात् ।३।२।६६।

विपक्षे बाधकमाह—"प्राप्तौ चानियमात्" । ······पक्षतो नैव शरीरहेतुः । तदा दम्पत्योः संयोगे पुत्राभावो न स्यात् । दृष्टकारणानुपलब्धेः । अतोऽधिकमपेक्षणीयमिति दिक् ।३।२।६६।

शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्म ।३।२।६७।

ननु शरीर·········शरीरं प्रत्यात्मनियतं स्यात् । अन्यथा सर्वात्मनां संयोगाविशेषात् साधारणविग्रहवत्त्वप्रसङ्ग इत्यत आह—"शरीरो·····कर्म" । यथा शरीरं कर्मजन्यं तथा [धातु] प्राणवाहिनीनां नाडीनां मांसादिशुक्रान्तानां धातूनां वातपित्तकफानां दोषाणामामाशयापक्वाशया नामूर्ध्वाधःस्रोतसां च संयोगा अपि कर्मनिमित्ता एव । [अन्यथा] तथासन्निवेशवैचित्र्यानुपपत्तेः । तत्तत्संयोगानां सर्वात्मसाधारण्यापत्तेश्च । भूतानां साधारण्यात् । कर्मनिमित्तकत्वे तु तेषां यद्भोगजनकादृष्टजन्यो यः स तस्य [भोगायतन] मुपपद्यते ।३।२।६७।

एतेनानियमः प्रत्युक्तः ।३।२।६८।

सांख्यास्तु न कर्मनिबन्धनः शरीरः । स किन्तु प्रकृत्यादिनिबन्धनः । प्रकृतयो हि कर्मानपेक्षाः स्वयमेव सहजतया [सत्त्वरजस्तमोरूपतया] प्रवृत्तिशीलाः स्वं स्वं विकारमारभन्ते । प्रतिबन्धकशरीरापगममात्रे तु धर्माधर्मावपेक्षन्ते । यथा कृषाणः [केदारादपां पूर्णात् केदारान्तरमपूर्णमापिप्लावयिषुरेषां] सेतुमात्रं भिनत्ति । आप्तास्तु [तास्तु निम्नाभिसर्पणस्वभावाः] स्वयमेव केदारानाप्लावयन्ति एवमापूरयन्ति प्रकृतयो

न [? पि] विकारमिति वदन्ति । तान् प्रत्याह—"एते···प्रत्युक्तः"। एतेन कर्मसापेक्षाणां भूतानां शरीरसर्गे [अ]नियमाभिधानेन तन्निरपेक्षाणां भूतानां विकाराणां शरीरारम्भे प्रकृतेरेकत्वात् सर्वात्मसाधारण्येन यो भोगादेरनियमः स सर्वसाधारण्येन [न शरीराणामस्तीत्यसाधारण्ये हेतुः] ।३।२।६८।

[तददृष्टकारितमिति चेत्] पुनस्तत्प्रसङ्गोऽपवर्गे ।३।२।६९।

आर्हतास्तु मनसां परमाणूनां च गुणमदृष्टं वदन्ति । पार्थिवाद्या अणवः स्वादृष्टप्रयुक्ता मिथःसहिताः शरीरमारभन्ते । मनांसि च स्वस्वगुणादृष्टात् [शरीरमाविशन्ति । तच्च] स्वकादेवादृष्टात् पुद्गलस्य सुखदुःखे साधयन्ति । न त्वदृष्टं । पुद्गलस्यास्तीति तान् प्रत्याह—"पुनस्तत्प्रसङ्गोऽपवर्गे"। परमाणूनां भोक्तृग्रहोपग्रहं विना [गुणानुच्छेदात्] साधारणमेवेत्यपवर्गेऽपि पुनः शरीरप्रसङ्ग इति सूत्रार्थः ।३।२।६९।

मनःकर्मनिमित्तत्वाच्च संयोगाद्यनुच्छेदः ।३।२।७०।

अदृष्टस्य परमाणुगुणत्वं साधयित्वा मनोगुणत्वं दूषयति—"मनः···नुच्छेदः"। [आत्मनि यदि नित्यः शरीरारम्भक]संयोगस्तदा निमित्तनित्यत्वात् तन्नाशो न स्यात् । अथानित्यं तत्, तर्हि व्यधिकरणपुरुषभोगस्य तदनाशकत्वे यत्किञ्चित् संयोग[नाशेऽपि शरीराम्भक] संयोग[गा]नाशादिति सूत्रार्थः ।३।२।७०।

नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ।३।२।७१।

शरीरमनःसंयोगो न नश्यतीत्यत्र दूषणमाह—"नित्यत्व·····नुपपत्तेः"। जीवनस्य सदातनत्वे प्रायणं न स्यात्, जीव[न]कारणानुच्छेदात् । प्रायणस्याकस्मिकत्वे च प्रायणभेदो न स्यात् । कश्चित् गर्भगत एव प्रैति, कश्चिज्जातमात्रः, कश्चित्कुमार इति सूत्रार्थः ।३।२।७१।

अणुश्यामता नित्यत्ववदेतत् स्यात् ।३।२।७२।

आक्षिपति—"अणु·····स्यात्"। यथाणुश्यामता पाकान्निवर्तते तथा देहाद्यपि निवर्त्स्यतीति सूत्रार्थः । ३।२।७२।

नाकृताभ्यागमप्रसङ्गात् ।३।२।७३।

समाधत्ते—"नाकृता·····प्रसङ्गात्"। अकृतं प्रमाणतोऽविषयीकृतं तस्याभ्यागमोऽभ्युपगमस्तत्प्रसङ्गात् । न हि देहादिसम्बन्धस्तापकादृष्टसद्भावे तन्नाशः। न च परमार्थाभ्यासताप्यनादिः । पार्थिवरूपत्वात् लोहितरूपवदिति सूत्रार्थः । यथाश्रुति वा सूत्रार्थः । अदृष्टनित्यत्वे केनचित्तदकरणादकृतस्यैव फलं पुरुषैरुपभुज्यत इति तदर्थमास्तिकानां विहितनिषिद्धगोचरप्रवृत्तिप्रचयोऽनुपपन्नः । तद्व्युत्पादकशास्त्रप्रणयनं चानर्थकं भवेदित्यकर्मनिमित्ता शरीरसृष्टिः, अकर्मनिमित्तः सुखदुःखभोग

इति पापिष्ठा मिथ्यादृष्टिर्हेया। कर्मनिमित्तः सङ्ग इति तत्त्वधीरुपादेयेति सर्वमवदातम् ।३।२।७३।

इति तृतीयोऽध्यायः।

तीरभुक्तिमहीपालपरिषन्मुख्यसूरिणा।
श्री केशवकवीन्द्रेण कृता सूत्रप्रकाशिका॥

त्रिस्त्रिरष्टौ त्रिरङ्कौ त्रिग्रहैकं वसुरीश्वरः।
दिशोष्टौ श्रुतिदृक्वेदाः दिशो वेदास्त्रिरूपकम्॥

नियोग विकल्प समुच्चय। विषयसंशयप्रयोजनपूर्वपक्षसिद्धान्ताः विचाराङ्गानि पञ्च।

अनिन्द्रियमकायं च [चक्षुरेकं] मनोऽन्यथा [ता]।
नित्यता च शरीरं च [भौतिकत्वं] तत्त्वं च भूरिता॥
अर्थाः शेषेऽनित्यत्वं स्थैर्यं बुद्ध्यात्मवृतिता।
विनाशित्वमलङ्ध्यत्वं मनश्चादृष्टजन्यता॥

इति महामहोपाध्यायवेदान्तव्यासतर्काचार्यश्रीकेशवमिश्रकृते गौतमीयसूत्रप्रकाशे तृतीयोऽध्यायः समाप्तः।

ओं नमो भगवते वासुदेवाय श्री श्री श्री ल० स० ४३८। सूत्रम् १४२।

इति

———

चतुर्थोऽध्यायः ।

प्रथमाह्निकम् ।

सुखेनाध्यापयन् काश्यां न्यायवेदान्तदर्शने ।
श्रीकेशवकविश्चक्रे न्यायसूत्रप्रकाशनम् ॥
कार्यषट्कपरीक्षात्र प्रथमे तत्र धर्मतः ।
द्वितीये विषयिश्लाघ्यतत्त्वज्ञाननिरूपणम् ॥

[प्रवृत्तिदोषसामान्यलक्षणप्रकरणम् ।२।१।]

प्रवृत्तिर्यथोक्ता ।४।१।१।

तृतीये कारणरूपप्रमेयषट्कं परीक्षितमिहेदानीमवसरसङ्गत्यात्मादीनां प्रवत्त्यादिकारणतया तत्परीक्षायाः प्रवृत्त्यादिपरीक्षादिहेतुत्वेन हेतुहेतुमद्भावसङ्गत्या च कार्यरूपप्रमेयषट्कपरीक्षा । न च कार्यरूपप्रमेयत्वेन परीक्षात्वे शरीरादेरप्यत्र परीक्षापातः । तेनापि रूपेण प्रवृत्त्यादिषट्कस्यैव परिचिक्षिपितत्वात् । प्रतिपाद्यतावच्छेदकधर्मातिप्रसङ्गस्य घटपटौ द्रव्यमित्यत्रेवादोषत्वात् । विभज्यमानसाकाङ्क्षैकार्थावच्छेद[क]स्यैवैकवाक्यत्वे तन्त्रत्वात् ।

तत्रापरीक्षितविषयस्य तत्त्वज्ञानस्य परीक्षितुमशक्यत्वात् तत्त्वज्ञानपरीक्षातः प्राक् प्रवृत्तित्वादिना धर्मेण प्रवृत्त्यादिषट्कपरीक्षा प्रथमाह्निके । अत्र च चतुर्दश प्रकरणानि भवन्ति । तानि यथास्थानं वक्ष्ये । तत्रापि क्रमानुरोधादुक्तरूपवत्तया प्रवृत्तिदोषयोः परीक्षानुकीर्तनं प्रथमप्रकरणार्थः । यथा तते[थे]ति सूत्रावयवाभ्यामुक्तरूपवत्त्वज्ञापनात् । न चार्थभेदः, अतिदिष्टरूपवत्त्वस्यानुगतत्वात् । सूत्रम्—"प्रवृत्तिर्यथोक्ता" । तथेति शेषः । [यथा] येन प्रकारेण उक्ता लक्षिता । [प्रवृत्तिः] वाग्बुद्धिशरीरारम्भ [१।१।१६।] इत्यनेन तथैव तद्धर्मवत्येवेति नासिद्धं लक्षणम् । अतस्तेनेतरभेदादिसिद्धिरित्यर्थः । प्रवृत्तिर्हि द्वयी कारणरूपा कार्यरूपा च । आद्या अनित्ययत्नात्मिका अन्त्या धर्माधर्माख्या । उभयेऽप्येकात्मवृत्तीः ।४।१।१।

तथा दोषाः ।४।१।२।

दोषपरीक्षासूत्रम्—"तथा दोषाः" । दोषा अपि तथा "प्रवर्तनालक्षणा" [१।१।१७।] इति लक्षणवन्त एवेति नासिद्ध्यादिरित्यर्थः । कार्यरूपप्रवृत्तितुल्यतया बुद्धिसमानाश्रयांशे दोषाणामात्मगुणत्वादिकं परिक्षितमिति तथाशब्दस्यार्थः ।

द्वितीय सूत्रे [१।१।२।] [दोषाः] कारणोच्छेदरूपेणोच्छिद्यन्त इति परीक्षितं वीतरागजन्मादर्शनात् [३।१।२४] इत्यत्रानादिना प्रबन्धेन संसारकारणमिति परीक्षितमिति । नन्वियं परीक्षा तदनुकीर्तनार्हा [स्वतन्त्रा वा ?] नाद्यः, पूर्वपक्षाद्य-

भावात् । नान्त्यः, परीक्षाध्यायबहिर्भावापातादिति । न, परीक्षादेशस्यापि परीक्षात्वात् । पूर्वपक्षादीनां च विशिष्य सूत्रकृतानभिधानेऽपि तात्पर्यविषयत्वादिति । ४।१।२।

[दोषत्रैराश्यप्रकरणम् ।७।२।]

तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात् ।४।१।३।

एवं दोषाः सामान्यतः परीक्षिताः । सम्प्रति त्रैराश्येन विशेषण परीक्षणाय हेतुहेतुमद्भावसङ्गत्या तत्त्रैराश्यप्रकरणम् । तत्र कामक्रोधावित्येके । शोकमोहावित्यन्ये । क्लेशपञ्चकमित्यपरे । रागद्वेषमोहा इति वृद्धा इति विप्रतिपत्तेः प्रवर्तनालक्षणा दोषाः [१।१।१७।] इति लक्षणं सम्यगसम्यग्वेति संशयः, दोषा इति बहुवचनेन सूचितः । शोकादीनामदोषत्वे तत्रैव लक्षणातिव्याप्तिरिति पूर्वपक्षः । सिद्धान्त सूत्रम्—"तत्त्रैराश्ययं···भावात्" । तेषां दोषाणां त्रयो राशयस्त्रयः पक्षाः । न तु रागद्वेषमोहानामेकत्वम् । तेषामर्थान्तरभावात् मिथोभेदकधर्मवत्त्वात् । तथा च शोकमानादीनामेष्वेवान्तर्भावान्न विभागस्य न्यूनता । न वा लक्षणातिव्याप्तिरित्यर्थः । तत्रेच्छात्वं रागस्य, द्वेषत्वं द्वेषस्य, मिथ्याधीत्वं मोहस्य लक्षणम् । तत्र रागपक्षः कामो मत्सरः स्पृहा तृष्णा लोभो माया दम्भः कार्पण्यमिति । द्वेषपक्षः क्रोध ईर्ष्याऽसूया द्रोहोऽमर्षोऽवमान इति । मोहपक्षः विपर्ययसंशयतर्कमानप्रमादभयशोका इति । ४।१।३।

नैकप्रत्यनीकभावात् ।४।१।४।

आक्षिपति—"नैक··भावात्" । रागादीनां भेदो न किन्त्वेकत्वमेव । एकप्रत्यनीकभावात् तत्त्वज्ञानरूपैकविरोधिकत्वादित्यर्थः ।४।१।४।

व्यभिचारादहेतुः ।४।१।५।

समाधत्ते—"व्यभि···हेतुः" । एकविरोधित्वं भेदनिषेधेऽहेतुः व्यभिचारात् । एकाग्निसंयोगनाश्यत्वेऽपि रूपादीनां भेदादित्यर्थः ।४।१।५।

तेषां मोहः पापीयान् नामूढस्येतरेतरोत्पत्तेः ।४।१।६।

तत्त्वज्ञानान्मोहनाशे रागद्वेषनाश इति तत्त्वज्ञानस्य कारणकारणत्वादन्यथासिद्धेरेक विरोधित्वममीषामसिद्धमित्येतत् प्रदर्शकमपि निदानोच्छेदं विना निदानिनो नोच्छेद इत्यस्यापेक्षिततमत्वात् । तत्प्रदर्शनायापि सूत्रम्—"तेषां···तरोत्पत्तेः" । यद्यपि बहूनां निर्द्धारणे पापतम इति युक्तम् । तथाप्यत्र द्वौ द्वावधिकृत्य निर्द्धारणं द्रष्टव्यम् । द्वयोरेव निर्द्धारणे ईयसुनोऽनुशासनात् । तेन रागमोहयोर्द्वेषमोहयोर्वा मोहः पापीयान् । कस्मात् यतोऽमूढस्य इतरौ रागद्वेषौ नोत्पद्येते इत्यर्थः ।

१—अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः । [योगसूत्रम् ।२।३।]

न च रागद्वेषौ विना न हिताहितप्राप्तिपरीहारार्थे प्रवृत्तिनिवृत्ती इति तत्त्वज्ञानिनोऽपि तदुभयहेतुभूताविति तयोर्मोहः व्यभिचार इति वाच्यम्। धर्माधर्महेतुयत्नहेत्वोरेव तयोर्दोषत्वात् ४।१।६।

प्राप्तस्तर्हि[1] निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः ।४।१।७।

शङ्कते—"प्राप्तस्तर्हि…दोषेभ्यः"। दोषेभ्य इति बहुवचनमान्तर्गणिकभेदविवक्षया। एवं रागादयो जन्या मोहो जनक इति सिद्धम्। तथा च हेतुत्वाद् दोषभेदो मोहस्य प्रसक्तः। अभेदे तदभावात् ।४।१।७।

[न] दोषलक्षणावरोधान्मोहस्य ।४।१।८।

निराकरोति—"दोष" मोहस्य"। दोषलक्षणवत्त्वान्मोहस्य दोषत्वम् न तु तद्धेतुत्वाददोषत्वम् ।४।१।८।

निमित्तनैमित्तिकभावोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः ।१।१।६

अनैकान्तिकश्च हेतुरित्याह—"निमित्त…प्रतिषेधः"। तुल्यजातीयानामपि द्रव्यादीनां निमित्तनैमित्तिकत्वं दृष्टमतो व्यभिचारान्न हेतुतया तुल्यजातीयत्वस्य निषेध इत्यर्थः।

न च मोहस्य दोषत्वे द्वितीयसूत्रे[१।१।२]प्रातिस्विकतदुपादानवैयर्थ्यं मिथ्याज्ञानत्वेन प्रतिपादनस्योच्छेदक्रमज्ञापन उपयोगात्। अतएव च "पापीयान्" [४।१।६।] इत्युक्तमिति ।४।१।९।

[प्रेत्यभावपरीक्षाप्रकरणम् ४।२।]

आत्मनित्यत्वे प्रेत्यभावसिद्धिः ।४।१।१०।

उद्देशक्रमानुरोधादवसरसङ्गत्या प्रेत्यभावपरीक्षाप्रकरणम्। तत्र प्रेत्यभावो बुद्धेरित्येके। शरीरस्येत्यन्ये। आत्मन इति वृद्धा, इति विप्रतिपत्तेः प्रेत्यभाव [वा] आत्मप्रतियोगिनो न वेति संशयः। तत्र "पुनरुत्पत्तिः प्रेत्यभाव" [१।१।१८।] इति लक्षणसूत्रे उत्पादप्रायणपदयोरुत्पत्तिविनाशावर्थः प्रतीयते। न च नित्यस्यात्मनस्तौ स्त इति लक्षणमसिद्धं स्यादित्युत्पादविनाशपदार्थयोर्देहसम्बन्धप्रतियोगिकत्ववर्णनेनासिद्धिनिरासः प्रयोजनम्। पूर्वपक्षस्तु प्रेत्यभावपदस्योत्पादविनाशावर्थौ बलतो वर्णयित्वेति। अत्र सिद्धान्तसूत्रम्— 'आत्म…सिद्धिः"। शरीरसन्तानमूलभूतशरीरयोगाभावः भोगघटकान्यशरीरावच्छेदः प्रायणमेतदुभयमात्मनित्यत्व एव भवति। ल्यपः समानकर्तृकत्वोपस्थापकत्वादित्यर्थः।

१—न्यायसूचीनिबन्धे प्राप्तस्तर्हि इति न सूत्रांशतया परिगृहीतोऽस्ति। म० म० फणिभूषणतर्कवागीशचरणाः भाष्यपंक्तिरूपेण तदङ्गीकुर्वन्ति। म० म० डा० गंगानाथझा महाशयानामप्यत्रैव सम्मतिः।

ननु भावपूर्वकत्वात् प्रायणस्य कथं प्रेत्यभाव इति। मुखं व्यादाय स्वपितीत्यत्र स्वप्ने मुखं व्याददातीतिवत् ल्यपो व्यत्ययाद् भूत्वा प्रायणमित्यर्थादिवं प्रयोग उक्तः। जन्ममरणयोरनादिताख्यापनायेति समानकर्तृकत्वं पौर्वापर्यं चोपपद्यते।४।१।१०।

व्यक्ताद् व्यक्तानां प्रत्यक्षप्रामाण्यात्।४।१।११।

उत्पत्तिनिरूप्यत्वात् प्रेत्यभावस्य, प्रसङ्गादुत्पत्तिप्रकारं निरूपयति "व्यक्ताद्···प्रामाण्यात्"। उत्पत्तिरिति शेषः। व्यक्तात् व्यक्तजातीयात् परमाणोर्व्यक्तानां द्व्यणुकादीनामुत्पत्तिः। कुतः, प्रत्यक्षप्रामाण्यात्। यज्जन्यरूपवत् तद्रूपवज्जन्यमिति व्याप्तिप्रत्यक्षमूलकमनुमानं प्रत्यक्षमित्युक्तम् तस्यात्र प्रामाण्यात् प्रमाणत्वात्। तथा च महतो वत् परत[?]स्त्र्यणुकरूपवत् सावयवावयवकत्वानुमानात् कारणत्वेन परमाणुसिद्धौ भवति सजातीयादेव व्यक्तानामुत्पत्तिः।४।१।११।

न घटाद् घटानिष्पत्तेः।४।१।१२।

अबुध्वा आक्षिपति—"न···निष्पत्तेः"। यदि सजातीयादुत्पत्तिः स्यात् घटादपि घटोत्पत्तिः स्यात्। न चैवं, तस्मान्न सजातीयात् व्यक्तात् व्यक्तोत्पत्तिः।४।१।१२।

व्यक्ताद् घटनिष्पत्तेरप्रतिषेधः।४।१।१३।

समाधत्ते—"व्यक्ताद्···प्रतिषेधः"। सजातीयात् सजातीयोत्पत्तेरप्रतिषेधः। कस्मात्? व्यक्ताद् रूपादिमतः सजातीयात् कपालात् घटनिष्पत्तेः। तथा च यथा कपालाद् घटोत्पत्तिस्तथा परमाणोरपि व्यक्तोत्पत्तिः स्यात्। न च घटाद् घटोत्पत्तिप्रसङ्गोऽन्त्यावयवित्वादिति।४।१।१३।

[अभावोपादानतानिराकरणप्रकरणम् ५।४।]

अभावाद् भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात्।४।१।१४।

व्यक्ताद् व्यक्तानामित्यत्रोपोद्धातादष्टौ प्रकरणानि। प्रयोजनं त्वष्टानामपि व्यक्ताद् व्यक्तनिष्पत्तिः। तत्राभावोपादानतानिराकरणप्रकरणम्। समवायिकारणत्वमभावे वर्तते न वेति संशयः। पूर्वपक्षसूत्रम्—"अभावाद्······प्रादुर्भावात्"। अभावात् समवायिकारणात् भावस्य कार्यस्योत्पत्तिः। कुतः? न बीजमनुपमृद्याङ्कुरस्य प्रादुर्भावो यतः। अत्रोपमर्दं विना नेति व्यतिरेकः शाब्दस्थनियतत्वादभावे सति भवतीत्यन्वयोऽपीति तदुभयसहकृतप्रत्यक्षमेवाभावोपादानत्वे मानमतस्तद्दृष्टान्तेनान्यत्रापीति ४।१।१४।

व्याघातादप्रयोगः।४।१।१५।

अत्रोपमृद्य प्रादुर्भावादिति [४।१।१४।] प्रयोगो मुख्यो भाक्तो वा? आद्यं निरस्यति—"व्याघातादप्रयोगः"। अत्रोपमर्दे कारणं नाङ्कुरोऽसत्त्वात्। एवमसन्नि-

रुपाख्यो बीजाभावोऽपि नाङ्कुरोपादानं तत्त्वे वालीकत्वविरोधात् । तथा चोपमर्दं प्रत्यङ्कुरकारणताप्रयोगो व्याघातादयुक्त इत्यर्थः ।४।१।१५।

नातीतानागतयोः कारकशब्दप्रयोगात् ।४।१।१६।

अर्थदूषणमविद्वान् पूर्वपक्षी भक्त्या प्रयोगं समर्थयति—"नातीता…… प्रयोगात्" । यथाऽतीतेऽभूत् कुम्भः, अनागते भविष्यति कुम्भ इति कारकशब्दप्रयोगो भक्त्या तथा ममापीत्यतो भाक्तत्वान्न व्याघातः । भक्तिबीजं चानन्तर्यमुपमर्दकमप्युपमृद्योत्तरकालमनुवर्तते अङ्कुरोऽपीत्यर्थ ।४।१।१६।

न, विनष्टेभ्योऽनिष्पत्तेः ।४।१।१७।

न प्रयोगं व्यासेधामो किन्त्वलीकस्योपादानत्वम् । तच्च न समाहितमित्यभिसन्दधानः सिद्धान्ती केवलाभावहेतुत्वं निषेधति—"न……निष्पत्तेः" । भावे वतः । निरपेक्षश्चेद् बीजनाशोऽङ्कुरकारणं स्यादसत्यपि व्यूहान्तरे मिथो विच्छिन्नेष्वपि बीजावयवेष्वङ्कुरः स्यात् । न चैवम् । तस्मात् केवलेभ्योऽङ्कुरानुत्पत्तेर्न केवलो बीजनाशोऽङ्कुरकारणमित्यर्थः ।४।१।१७।

क्रमनिर्देशादप्रतिषेधः ।४।१।१८।

भावापेक्षोऽभावो हेतुरिति मतमभ्युपगमेनोत्तरयति—"क्रम…पेधः" । अस्मत् पक्षेऽप्युक्तरूपस्याभावकारणत्वस्याप्रतिषेधः पूर्वव्यूहस्य प्रतिबन्धकस्याभावः क्रमः, तत्त्वेन निर्देशात् । तथा च खण्डपटस्योत्पत्त्यादाववस्थितव्यूहापेक्षस्य पटध्वंसस्य मयाङ्गीकारान्मतैक्यादप्रतिषेधः । कार्यदर्शनात् तादृशानामेव हेतुत्वमतो नातिप्रसङ्गः ।४।१।१८।

[ईश्वरोपादानतानिराकरणप्रकरणम् ।३।५।]

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात् ।४।१।१९।

शून्यतोपादानत्वे निराकृते ईश्वरोपादानता शङ्क्यते इति, तेन समं हेतुहेतुमद्भावेन च सङ्गत्या तदनन्तरमीश्वरोपादानतानिराकरणप्रकरणम् । कार्यमात्रं ब्रह्मोपादानकं न वेति संशयः । पूर्वपक्षसूत्रम्—"ईश्वरः…दर्शनात्" । चिच्छक्तिक्रियाशक्तिरूपेशनायोगादीश्वरो ब्रह्म कारणं समवायिकारणम् । ब्रह्मैव हि गोघटादिरूपेण परिणमते । श्रूयते हि "तदैक्षत बहु स्यां प्रजायेय" इत्यादि । श्रुत्यर्थस्तु तद् ब्रह्म ऐक्षत अबुद्धचत, अहं बहु स्यां भवेयं प्रजायेय जन्म कुर्याम् । तत ईक्षणस्य बहुत्वप्रजननसामानाधिकरण्यात् । कार्याणां चेतनाभेदः प्रतीयत इति त्रिदण्डाः ।

ननु जीवकर्मणैव कार्यजातं जन्यतां किं ब्रह्मपरिणामेनात उक्तम् पुरुषकर्माफल्यदर्शनादिति । कारणान्तरापेक्षायां तदेवास्तु किं कर्मणेत्यर्थः ।४।१।१९।

न, पुरुषकर्माभावे फलानिष्पत्तेः ।४।१।२०।

सिद्धान्तसूत्रम्—"न, पुरुष…निष्पत्तेः" । ईश्वरो नानपेक्षो जगदुपादानम् । पुरुषकारं विना फलानिष्पत्तेः । अन्यथा सर्वं फलं सर्वदा सर्वस्य च स्यात्, उपादानैक्यात् । सर्वजातीयं स्यात्[1] । न चैवम् । तस्मात् कादाचित्कत्वाददृष्टनिमित्तमपि जातिप्रतिनियमान्न ब्रह्मोपादानकं किन्तु व्यक्तोपादानकमेवेत्यर्थः ।४।१।२०।

तत्कारितत्वादहेतुः ।४।१।२१।

नन्वेवं तस्य निरपेक्षत्वोपादानरूपत्वविशेषद्वयनिषेधात् सकलकार्ये सापेक्षहेतुत्वमभ्युपेतम् । तच्चायुक्तम् अपेक्षणीय एवादृष्टादावहेतुत्वात् । न हि कुलालादीनामपेक्षणीयदण्डादिहेतुताऽपि दृष्टास्तीत्यत आह—"तत्कारितत्वादहेतुः" । यदप्यपेक्षणीयं तदपि तत्कारितमेव तत् प्रेरितपुरुषकृतमेवेति नापेक्षणीयत्वमजन्यत्वे हेतुर्बाधादित्यर्थः ।

विद्यासागरास्तु परिणामक्रमेणेश्वरोपादानकं जगदित्याक्षिप्तपूर्वपक्षकं सिद्धान्तसूत्रम्—"ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्" । ईश्वरः कारणं निमित्तकारणं पुरुषकर्माफल्यदर्शनात् पुरुषव्यापारोऽफलोऽपि दृश्यते यतोऽतः कारणान्तरापेक्षेत्यर्थः । न तूपादानात् कार्यैकजात्यादिति भावः । देश्यम्—"न, पुरुषकर्माभावे फलानिष्पत्तेः" । पुरुषव्यापारमन्तरेण न कार्यमतो दृष्टेनैवोपपत्तेर्नातिरिक्तकारणकल्पनेत्यर्थः । सिद्धान्तः—"तत्कारितत्वादहेतुः" । न ह्यचेतनं चेतनानधिष्ठितं प्रवर्तत इति द्व्यणुकादेस्तत्कारितत्वात् । तदायोजितपरमाणुजन्यत्वादीश्वरसिद्धौ तन्निषेधोऽहेतुरित्यर्थ इत्याहुः ।४।१।२१।

[आकस्मिकत्वनिराकरणप्रकरणम् ।३।६।]

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् ।४।१।२२।

आकस्मिकत्वे ह्यनिराकृते न व्यक्ताद् व्यक्तोत्पत्तिः, न वेश्वरनिमित्ततेत्युपोद्घाताभ्यामाकस्मिकतानिराकरणप्रकरणम् । तच्च कार्यपूर्ववर्तिनि तन्नियतत्वं वर्तते न वेति संशयः । चार्वाक आह—"अनिमित्त…दर्शनात्" । अनिमित्तत इति वहुव्रीहिसमासात् प्रथमान्तात्तसिः । निमित्तं कारणं भावः कार्यं तैक्ष्ण्यमवयवसंयोग विशेषः । आदिशब्दाद्गैरिकादिपरिग्रहः । तथा च कण्टकतैक्ष्ण्यादि अकारणमतस्तद्दृष्टान्तेन कार्यमात्रस्योत्पत्तिमत्त्वेनाकस्मिकत्वसाधनमित्यर्थः । न च घटादिना व्यभिचारः, तेष्वपि तत एव तत्साधनात् ।४।१।२२।

अनिमित्तनिमित्तत्वान्नानिमित्ततः ४।१।२३।

व्याघातेन दूषयति—"अनिमित्त…निमित्ततः" । अनिमित्तसाधकप्रमाणस्यानिमित्तप्रतीतौ निमित्तत्वमस्ति न वा ? आद्ये अनिमित्ततो भावोत्पत्तिरिति न । कुतः,

---

१. सर्वजातीयं स्यात् इति घ. पुस्तके नास्ति ।

अनिमित्तेऽनिमित्तप्रतीतौ प्रमाणस्य निमित्तत्वात्। तथा च प्रमाणमभ्युपगच्छतः कारकमात्रनिषेधो व्याहतः। अन्त्ये प्रमाणाभावात् क्व कारणनिषेध इत्यर्थः। ४।१।२३।

[1]अनिमित्तनिमित्तयोरर्थान्तरभावादप्रतिषेधः ।४।१।२४।

दोषान्तरमाह—अनिमित्त···दप्रतिषेधः"। इदं निमित्तमिदं निमित्तान्यदिति विलक्षणव्यवहारबलेन तयोर्भेदसिद्धौ कारणमात्रं प्रत्याचिख्यासोस्तव निमित्तमात्र-प्रत्याख्यानेन कारणमात्रनिषेधः किं नु न्यूनं निग्रहस्थानमित्यर्थः ।४।१।२४।

[सर्वानित्यत्वनिराकरणप्रकरणम् ।४।७।]

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात्[2] ।४।१।२५।

अथौपोद्घातिकं सर्वानित्यतानिराकरणप्रकरणम्। सर्वानित्यत्वे हि नित्यात्म-निरूप्यः प्रेत्यभावो न सिद्ध्येदिति तन्निर्वाहकत्वात् प्रसङ्गो वा सङ्गतिः। प्रमेयत्वं नित्यत्वव्याप्यं न वेति संशयः। पूर्वपक्षसूत्रम्—"सर्वं···धर्मकत्वात्"। सर्वं भौतिकाभौतिकमनित्यं विनापि उत्पत्तिधर्मकस्य विनाशधर्मकत्वादिति व्याप्तिप्रदर्शन-परं [सूत्रम्] तेनोत्पत्तिधर्मकत्वादिति हेतुः। व्योमादीनामपि वस्तुत्वेनोत्पत्तिसाधनान्न भागासिद्धिः ।४।१।२५।

नानित्यतानित्यत्वात् ।४।१।२६।

सिद्धान्तसूत्रम्—"नानित्यतानित्यत्वात्"। उत्पत्तिमत्त्वं विनाशित्वे न हेतुः। कुतः, अनित्यता ध्वंसस्तस्य नित्यत्वात् अविनाशित्वात्। अन्यथा भावोन्मज्जना-पातादित्यर्थः ।४।१।२६।

तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत् ।४।१।२७।

देशयति—"तदनित्यत्व···विनाशवत्"। तस्या अनित्यताया अनित्यत्वं विनाशः। सकलानित्यविनाशानन्तरमनित्यतापि नश्यत्येवमुन्मज्जनमपीत्यत्र दृष्टान्त माह–अग्नेरित्यादि। सप्तमीसमर्थाद्वतिः। यथा दाह्यं विनाश्य स्थितस्याग्नेर्दाह्य विरोधिनो निमित्तेनादिनाशेन नाशेऽपि न दाह्योन्मज्जनं तथा घटादिविरोधिन्या अनित्यताया अपि विनाशे घटाद्युन्मज्जनं नेत्यर्थः ।४।१।२७।

नित्यस्याप्रत्याख्यानं यथोपलब्धिव्यवस्थानात् ।४।१।२८।

प्राक् प्रध्वंसानाधारकालस्य प्रतियोग्याधारत्वनियमादुन्मज्जनप्रसङ्गस्तद-वस्थ एवेति देश्यमुपेक्ष्य प्रथमहेतोरेव बाधमाह—"नित्यस्या·····व्यवस्थानात्"।

१—निमित्तानिमित्तयोरिति प्रचलितपाठः। २—क पुस्तके "विनाश" पदं सूत्रे नास्ति।

नित्यताविशिष्टस्याकाशादेरप्रत्याख्यानम् प्रत्याख्यानं बाधितम् । उपलब्ध्यनतिक्रमेण व्यवस्थापनात् [०स्थानात्] प्रमितत्वात् । तथा च धर्मिग्राहकमानसिद्धं तन्नित्यत्वमिति तदभावसाधने बाध इत्यर्थः ।

प्राञ्चस्तु एकदेश्याह—"नानित्यता नित्यत्वात्" । अनित्यता रूपादिवद् घटादिधर्मः । तस्यानित्यत्वाद् तद्धर्मिणो घटादेरपि नित्यत्वं परममहत्त्वनित्यत्वे व्योमादिवदिति । अनित्यता धर्मिणि नित्ये हेतुर्विरुद्धः । अथानित्यता अनित्या तर्हि तदभावदशायामनित्यताशून्यो धर्मानित्य एव स्यात् । हेतुश्चानैकान्त इत्यर्थः । तदेतत् पूर्वपक्षी दूषयति—"तदनित्यत्वमग्नेरित्यादि" । यथा दाह्यं विनाश्याग्निर्नश्यति तथाऽनित्यान् धर्मिणो विनाश्य शेषेऽनित्यता विनश्यतीत्युभयमप्यनित्यमित्यर्थः । आद्ये नित्यसमा जातिरन्त्ये प्रतिदृष्टान्तसमेति द्वयमप्युपेक्ष्य सिद्धान्त्याह—"यथोपलब्धीत्यादि" पूर्ववदर्थ इत्याहुः ।४।१।२८।

[सर्वनित्यत्वनिराकरणप्रकरणम् ५।८।]

सर्वं नित्यं पञ्चभूतनित्यत्वात् ।४।१।२९।

सर्वनित्यत्वे हि न प्रेत्यभावस्तस्योत्पत्तिघटितत्वात् । न वा व्यक्ताद् व्यक्तानामित्यौपोद्घातिकं सर्वनित्यतानिराकरणप्रकरणम् । नित्यत्वं प्रमेयत्वव्यापकं न वेति संशयः । पूर्वप्रकरणेन हि किञ्चिन्नित्यसिद्धौ तद् दृष्टान्तेनान्येषामपि नित्यत्वं साधयिष्यामीत्यभिमन्यमानः साङ्ख्यः पूर्वपक्षयति—"सर्वं···नित्यत्वात्" । सर्वं गोघटादि नित्यं सकलकालस्थायि भूतत्वात् परमाण्वाकाशवत् । पञ्चेत्यादि व्याप्तिग्राहकसहचारदर्शनपरम् । पञ्चस्वपि भूतेषु भूतत्वं नित्यत्वसहचरितं दृष्टं यत इत्यर्थः ।४।१।२९।

नोत्पत्तिविनाशकारणोपलब्धेः ।४।१।३०।

सिद्धान्तः—"नोत्पत्ति······लब्धेः" । घटादीनामुत्पत्तिर्विनाश एतदुभयकारणानि चोपलभ्यन्ते । तथा च न नित्यम् [इत्यर्थः] ।४।१।३०।

तल्लक्षणावरोधादप्रतिषेधः ।४।१।३१।

साङ्ख्यो बाधमपश्यन् विप्रतिपत्तिमुद्धरति—"तल्लक्षणा···षेधः" । गोघटादीनि भूतानि न नित्यानि उत्पत्त्याद्युपलब्धेरित्यादिप्रतिषेधो न युक्तः । तेषां बहिरिन्द्रियग्राह्यजातीयविशेषगुणवत्त्वरूपभूतलक्षणादित्यर्थः ।४।१।३१।

नोत्पत्तिविनाशकारणोपलब्धेः ।४।१।३२।

एतद्भूतत्वमप्रयोजकं बाधञ्चोद्घाटयन् पूर्वसूत्रमेवोत्तरयति—"नोत्पत्ति··· लब्धेः" । एतल्लक्षणवतामेव घटादीनामुत्पत्त्याद्युपलब्धेर्नित्यत्वसाधनं बाधितमित्यर्थः उत्पत्त्याद्यर्थं प्रवृत्तिविरोधश्चेति भावः ।४।१।३२।

न व्यवस्थानुपपत्तेः ।४।१।३३।

ननु परिणामित्वात् प्रवृत्तिः स्यात् नित्यता तु दृष्टैवेति स्वायम्भुवमतमाशङ्क्य निराकरोति—"न व्यवस्थानुपपत्तेः"। सर्वनित्यत्वं न, उत्पन्नादिव्यवस्थानुपपत्तिप्रसङ्गात् । प्रकृतिपरिणामयोरभेदात् । भेदाभेदयोर्विरुद्धत्वादित्यर्थः ।४।१।३३।

[सर्वपृथक्त्वनिराकरणप्रकरणम् ।३।९।]

सर्वं पृथक् भावलक्षणपृथक्त्वात् ।४।१।३४।

सर्वपृथक्त्वे हि तत एव परमाणोः स एव पृथक् तदेव कार्यं ततः पृथगिति क्व व्यक्ताद् व्यक्तानामित्यौपोद्घातिकं सर्वपृथक्त्वनिराकरणप्रकरणम् ।

यद्वा प्रेत्यभावपदार्थासिद्धिः । अर्थस्यैककर्तृकत्वव्यापारात् [त्वस्याभावात्] । एतत्पटभेद एतत् पटवृत्तिर्न वेति संशयः । **सौत्रान्तिकवैभाषिका**वाहतुः—"सर्व··· पृथक्त्वात्" । **सर्वं** वस्तुमात्रं **पृथक्** नाना, भावो लक्ष्यते ज्ञाप्यतेऽनेनेति **भावलक्षणं** समाख्याशब्दः तस्य **पृथक्त्वं** पृथगर्थता समूहवाचिनी यतः । प्रयोगस्तु घटः समूहरूपः स्वतन्त्रानेकवाचकपदवाच्यत्वात् । न चासिद्धिः, घटपदं स्वतन्त्रानेकवाचकं पदत्वात् सेनापदवत् इति मानात् ।

यद्वा घटः पृथक्स्वभावो न वा ? अन्त्ये अद्वैतप्रसङ्ग । आद्ये स्वस्मादपि पृथक्त्वम् । तथा च **सर्वं** स्वस्मादपि **पृथक् भावलक्षणेन** स्वभावेन पृथक्त्वात् पृथक्त्वस्वभावत्वादित्यर्थः ।४।१।३४।

नानेकलक्षणैरेकभावनिष्पत्तेः ।४।१।३५।

सिद्धान्तसूत्रम्—"नानेक···निष्पत्तेः" । अनेकविधैर्लक्षणैर्गन्धादिभिः सम्बद्धस्यैकस्य **भावस्य** धर्मिणो **निष्पत्तेः** प्रमाणतः सिद्धेरनेकत्वसाधनं न युक्तं बाधादित्यर्थः । सेनादेरप्यसमूहत्वात् दृष्टान्ताभावश्चेति भावः ।४।१।३५।

तल्लक्षणव्यवस्थानादेवाप्रतिषेधः ।४।१।३६।

युक्त्यन्तरमाह—"तल्लक्षण···षेधः" । **तल्लक्षणस्य** भावलक्षणस्य यमहमद्राक्षं तं स्पृशामीत्यादि प्रत्यभिज्ञानादेकत्वेनैव व्यवस्थानात् । अन्यथाणूनामतीन्द्रियत्वात् प्रत्यभिज्ञैव न स्यादित्यर्थः ।

यद्वा **तल्लक्षणं** समूहलक्षणं तस्य व्यवस्थानमेकावच्छिन्नानेकसमूह इति रूपं तत एवैकस्य सिद्धेः । अन्यथा समूह एव न स्यादित्यर्थः ।४।१।३६।

[सर्वशून्यत्वनिराकरणप्रकरणम् ।४।१०।]

सर्वमभावो भावेष्वितरेतराभावसिद्धेः ।४।१।३७।

सर्वशून्यत्वे क्व व्यक्ताद् व्यक्तोत्पत्तिरित्यौपोद्घातिकं तन्निराकरणप्रकरणम् । पूर्वप्रकरणेन हि सर्वपृथक्त्वनिराकरणेन व्यवस्थितस्य स्वरूपस्य सिद्धौ तन्निराकारक

एतत्प्रकरणपूर्वपक्षोऽवतरति इति पूर्वप्रकरणेन समं हेतुहेतुमद्भावसङ्गतिः। प्रमेयत्वं केवलान्वय्यत्यन्ताभावप्रतियोगि न वेति संशयः। माध्यमिक आह— "सर्वं····सिद्धेः"। सर्वं वस्तुत्वेन विवादपदमवस्तुच्छं भावेषु वस्तुत्वेनाभिमतेषु घटादिषु अघटः पटोऽपटो घट इत्यादिप्रतीतेः परस्परविरहात्मकत्वसिद्धेः। अभावस्य केवलाधिकरणरूपत्वात् तादृशस्यापि तुच्छत्वात्। तथा च प्रत्यक्षमेव शून्यतायां मानम्। अनुमानं च प्रमेयत्वं केवलान्वय्यत्यन्ताभावप्रतियोगिज्ञेयत्वात् व्योमवदिति ।४।१।३७।

न, स्वभावसिद्धेर्भावानाम् ।४।१।३८।

सिद्धान्त्याह— "न, स्वभाव···· भावनाम्"। भावानां पदार्थानां स्वभावसिद्धेः स्वकीयसत्ताघटत्वादिरूपसाधारणासाधारणधर्मसिद्धेः। तथा च सन् घटो न पट इत्यादिप्रमाणपथावतीर्णाः पदार्था नापह्नोतुं शक्या इति त्वदनुमानं बाधितमित्यर्थः ।४।१।३८।

न, स्वभावसिद्धिरापेक्षिकत्वात् ।४।१।३९।

आक्षिपति—"न·····कत्वात्"। सर्वे भावाः भिन्नस्वभावाः। भिन्नत्वं च तेषां न स्वाभाविकम्। स्वतोऽपि भिन्नत्वापत्तेः। किन्त्वितरेतरापेक्षम्, यच्चेतरापेक्षं तदवस्तुभूतम्। यथा जवापेक्षः स्फटिकारुणिमा। तथा च भावानां भिन्नत्वं तदेव च भावानामात्मेति तुच्छा एव पदार्था इत्यर्थः ।४।१।३९।

व्याहतत्वादयुक्तम् ।४।१।४०।

समाधत्ते—"व्याह····युक्तम्"। आपेक्षिकत्वेन तुच्छाद्वैतसाधनमयुक्तं व्याहतत्वात्। तथा हि अपेक्षा तुच्छा न वा? आद्ये कुत्र [त] आपेक्षिकत्वम्। अन्त्ये कुतस्तुच्छाद्वैतम्। एवं तुच्छप्रमातत्प्रमाणादीनां तुच्छत्वातुच्छत्वयोरपि व्याघात इत्यर्थः ।४।१।४०।

[सङ्ख्यैकान्तवादनिराकरणप्रकरणम् ।३।११।]

सङ्ख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् ।४।१।४१।

अथाद्वैते सति न व्यक्ताद् व्यक्तोत्पत्तिर्न वा प्रायणजन्मनी इत्यौपोद्घातिकं सङ्ख्यैकान्तनिराकरणप्रकरणम्। शून्यत्वे ह्यनिरस्ते नाद्वैताद्यवतार इति तेन समं हेतुहेतुमद्भावोऽवान्तरसङ्गतिः। एकं ब्रह्मैवेत्येके। प्रकृतिपुरुषावित्यन्ये। ज्ञाताज्ञेयज्ञप्तिकरणत्रयमित्यपरे। पशुपाशतदुच्छेदेश्वरा इति पाशुपताः। रूपादिस्कन्धपञ्चकमिति सौत्रान्तिकाः। तथा च सङ्ख्या एकान्तो येषु वादेषु ते सङ्ख्यैकान्तवादाः। प्रमेयस्य वास्तवं द्वित्वत्रित्वादिकं नास्ति किन्त्वेकत्वादिकमेवेत्येवंभूता वादा इति यावत्। व्यक्तिरेव द्वयी त्रयीत्यादि हृदयं पूर्वपक्षिणाम्। संख्यात्वं पञ्चत्वव्यभिचारि-

वृत्ति न वेति संशयः । पञ्चत्वव्यभिचारित्वं पञ्चत्वात्यन्ताभाववद्गामित्वम् । नहि षट्सु कदाचिदपि पञ्चत्वं वर्तते । एकादौ तु वर्तत इत्येकत्वादिकं न पञ्चत्वव्यभिचारि किन्तु षट्त्वादिकमेव । एतावन्तं पूर्वपक्षमाक्षिप्य सिद्धान्तसूत्रम्—"सङ्ख्यैकान्ता·····पत्तिभ्याम्" । न सङ्ख्यैकान्तः सिद्ध्यति । कारणस्य प्रमाणस्यानुपपत्तः साधनस्य साध्यातिरिक्तस्याभावात् । अतिरेके चैकान्तत्वव्याघातात् । अभेदे च गम्यगमकभावे लोकविरोध इत्यर्थः ।४।१।४१।

न, कारणावयवभावात् ।४।१।४२।

देशयति—"न, कारणा····· भावात्" । एकत्वादीनां कश्चिदेकदेशः साधनमिति न सङ्ख्यान्तरम्, न वा साधनाभाव इत्यर्थः ।४।१।४२।

निरवयवत्वादहेतुः ।४।१।४३

उत्तरयति—"निरवयवत्वादहेतुः" । यदि साध्यस्य कश्चिदवयवो भवेत् न सङ्ख्यैकान्तः स्यादिति । सर्वमेकमित्यादिप्रतिज्ञायां सर्वस्य पक्षीकरणे कश्चिदेकदेशो न वर्तते यत्साधनं स्यादिति । साध्यस्य निरवयवत्वान्न त्वदुक्तो हेतुरित्यर्थः ।४।१।४३।

[फलपरीक्षाप्रकरणम् ।११।१२।]

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ।४।१।४४।

तदेवमियता प्रबन्धेन प्रेत्यभावे परीक्षिते सम्प्रत्युद्देशक्रमेणावसरसङ्गत्या फलपरीक्षाप्रकरणम् । तत्र कथं सर्वजनसिद्धे फले संशय इत्यतः परीक्षाङ्गसंशयप्रदर्शनाय सूत्रम्—"सद्यः ·····संशयः" । निष्पत्तेरिति षष्ठीदर्शनादिति शेषः । संशयजनकाज्ञानहेतुतया हेतुपञ्चमी वा । पाकादिक्रियाफलमोदनादि सद्यो दृश्यते । कृष्यादि क्रियाफलं तु शस्यादि कालान्तरे [दृश्यते]। तथा च फलत्वसमानधर्मदर्शनादग्निहोत्रादि फलं सद्योभावि कालान्तरभावि वेति संशयः । न च लोकपक्त्यादेरनन्तरोपलम्भात् तत्फलत्वनिश्चयः । स्वर्गफलत्वश्रुत्या प्रतिघातात् । न वा श्रुतितोऽपि स्वर्गफलत्वनिश्चयः । कर्तृविशेषणतया श्रुतस्य स्वर्गस्याप्रधानतयापाततः साध्यत्वानवगमात् । प्रयोजनं तु संसारापवर्गव्यवस्था । सद्यःफलत्वे जन्मान्तरानुबन्धाभाव इति न संसारः । तदभावाच्च नापवर्गः । स्वर्गफलत्वे हि अदृष्टतत्स्थितितत्परिपाकादि कल्पनागौरवमिति ।४।१।४४।

न, सद्यः कालान्तरोपभोग्यत्वात् ।४।१।४५।

लोकपक्त्याद्येव फलम् । न च स्वर्गकामश्रुतिविरोधः, अतिशयितसुखशक्तेन स्वर्गपदेन हेतुलक्षणया चन्दनादिवदभिधानादित्याक्षिप्तपूर्वपक्षकं सिद्धान्तसूत्रम्—"न, सद्यः····· भोग्यत्वात्" । क्षेत्रादेर्न सद्यः फलं, स्वर्गो हि फलं श्रूयते । स [तत्] च कालान्तरे देशान्तरे चोपभुज्यते यत इत्यर्थः । न चातिशयितसुखं शक्यं, तावद्दुःखराशौ तावन्मात्रार्थितयाऽप्रवृत्तेरिति दिक् ।४।१।४५।

कालान्तरेणानिष्पत्तिर्हेतुविनाशात् ।४।१।४६।

अपूर्वकल्पनामपश्यन्नाक्षिपति—"काला…विनाशात्"। कालान्तरेणेति फलाधिकरणकालस्याहेतुत्वविवक्षया। कालान्तरे फलस्य नोत्पादः, हेतोर्हवनादेर्विनाशादित्यर्थः ।४।१।४६।

प्राङ्निष्पत्तेर्वृक्षफलवत्तत् स्यात् ।४।१।४७।

समाधत्ते—"प्राङ्……स्यात्"। यथा रसार्जनद्वारा फलजनकं मूलसेकादि, वृक्षफलस्य निष्पत्तेः प्राक् व्यापारानुबन्धेनाव्यवहितपूर्ववर्ति। तथा अदृष्टरूपव्यापारद्वारा हवनमपि स्यादिति न यागनाशो दोषायेत्यर्थः ।४।१।४७।

नासन्न सन्न सदसत् सदसतोर्वैधर्म्यात् ।४।१।४८।

हेतुफलभावसिद्धौ सद्यः कालान्तरे वेति विशेषचिन्ता। स एव तु सर्वथा विचारं न सहत इत्याक्षिपति—"नासन्न…वैधर्म्यात्"। उत्पत्तेः प्राक् फलं नासतः[1] सदसतोर्वैधर्म्यात्। तथा हि फलोपायताज्ञानेन फलार्थिनः साधने प्रवृत्तिः। तच्च फलज्ञानसाध्यं, फलज्ञानं च फलसत्त्वसाध्यमसतोऽभानादिति प्रवृत्त्यनुरोधादुत्पत्तेः प्राक् फलस्य सत्त्वमङ्गीकरणीयम्। तथा च सतोऽसत्त्वं विरुद्धमिति न तदा तदसत्। नाप्युत्पत्तेः प्राक् सत्, सदसतोर्वैधर्म्यात्। वर्तमानस्योत्पादविरोधात् तदा तस्यासत्त्वं वक्तव्यमिति न तदा सत्त्वं व्याघातादेव। नापि तदा सदसत् सदसतोर्वैधर्म्यात्। एकस्य विरुद्धद्विस्वभावत्वाभावादित्यर्थः ।४।१।४८।

उत्पादव्ययदर्शनात् ।४।१।४९।

समाधत्ते प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा। [कस्मात्]—"उत्पादव्ययदर्शनात्"। उत्पत्तिधर्मकमुत्पादि वस्तु उत्पत्तेः प्रागसदित्यद्धा सत्यम्। कुतः, उत्पादव्ययौ दृश्येते यतः। न च नित्यं सत उत्पादव्ययौ युज्येते इत्यर्थः ।४।१।४९।

बुद्धिसिद्धं तु तदसत् ।४।१।५०।

फलसाधनताज्ञानं तु फलासत्त्वेऽपि सम्भवतीत्याह—"बुद्धि…सत्"। तत् कार्यमुत्पत्तेः प्रागसदेव बुद्धिसिद्धं बुद्ध्या विषयीक्रियमाणं परिचाययतीति। तथा च तज्जातीयसाधनताज्ञानात् तदर्थिनस्तत्साधने प्रवृत्तिरित्यर्थः ।४।१।५०।

आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः ।४।१।५१।

देहादिभिन्नं परलोकभागिनमसन्तं मन्वानः प्रकृते देशयति—"आश्रय……त्यहेतुः"। मूलसेकादि फलयोरेकवृक्षाश्रयत्वात् परस्परहेतुहेतुमद्भावो युक्तः।

---

१. उत्पत्तेश्च प्राक् करणं नासत्-इति घ मातृकापाठः।

कर्मणस्तु हवनादेरेतच्छरीरमाश्रयः। स्वर्गादेस्त्वामुष्मिकं तदित्याश्रयव्यतिरेकात् स्वर्गादेः वृक्षफलोत्पत्तिवदित्यसदृशस्त्वदुक्तो दृष्टान्तः। कर्मणो हवनादेर्न स्वर्गफलत्वसाधने हेतुरि[तुत्वमि]त्यर्थः ।४।१।५१।

प्रीतेरात्माश्रयत्वादप्रतिषेधः ।४।१।५२।

देहाद्यनित्यमात्मानं मनसि कृत्य समाधत्ते—"प्रीते···षेधः"। वैयधिकरण्यं न प्रीतेः। मुख्यस्य फलस्य यागयत्नस्य चात्माश्रयत्वादित्यर्थः ।४।१।५२।

न पुत्रस्त्रीपशुपरिच्छेदहिरण्यान्नादिफलनिर्देशात् ।४।१।५३।

शङ्कते—"न, पुत्र···निर्देशात्"। एषामपि व्यधिकरणानां फलत्वात् फलस्य साधनसामानाधिकरण्याद् भागासिद्धमित्यर्थः ।४।१।५३।

तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः ।४।१।५४।

समाधत्ते—'तत्सम्बन्धात्·····दुपचारः"। पुत्रादिसम्बन्धाद्धि सुखादिकं फलमुत्पद्यत इति फलहेतौ पुत्रादौ फलवदुपचारः। यथा सुखादौ फलप्रयोगस्तथा तत्रापि प्राणहेतुषु अन्नेषु प्राणा इतिवत्। तथा च निरुपाधिना[1] विषयत्वात् दुःखाभावसुखे एव फले। ते च साधनसमानाधिकरणे एवेति न भागासिद्धिः ।४।१।५४।

[दुःखपरीक्षाप्रकरणम् ।४।१।३।]

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः ।४।१।५५।

अथोद्देशलक्षणक्रमानुरोधाद् दुःखपरीक्षाप्रकरणम्। तत्र यद्यपि दुःखे तद्धेयत्वे वा सर्वजनसिद्धे न संशयः। तथापि "बाधनालक्षणं दुःखम्" [१।१।२०।] इत्युक्तम्, तत्सम्यगसम्यग्वेति संशयः। प्रयोजनं तु लक्षणस्य सम्यक्त्वसिद्धिः। अत्र मुख्यदुःखस्य लक्ष्यत्वे शास्त्रवैयर्थ्यं तद्बाधनारूपत्वस्य लोकत एव सिद्धेः। एकविंशतेस्तत्त्वे बाधनास्वरूपत्वमिन्द्रियादावव्याप्तम्। अथ तद्धीविषयत्वं, साध्यस्योपसर्गा[सम्पादनात्]। न चेदात्मन्यतिव्याप्तिः, अतश्चेन्द्रियादावव्याप्तमित्याक्षिप्तपूर्वपक्षकं सिद्धान्तसूत्रम्—"विविध·····जन्मोत्पत्तिः"। जायते इति **जन्म** शरीरेन्द्रियादीनि, तेषामुत्पत्तिः **दुःखमेव** दुःखतया भावनीयेत्यर्थः। कुतः? **विविधबाधनायोगात्** विविधा बाधना हीना मध्यमा उत्कृष्टा क्रमेण मानुषतिर्यक्नारकिणां तथायोगात्। गौणमुख्यसाधारणस्य तु दुःखस्य लक्षणमात्मापवर्गान्यप्रमेयत्वम्। मुख्यस्य तु दुःखत्वजातिरेव। दुःखभावनाप्रयोजनं हानबुद्धिद्वारा तृष्णाविच्छेदादिक्रमेणापवर्ग इति भावः ।४।१।५५।

---

१. निरुपाधिनी इति घ मातृकापाठः।

[न] सुखस्याप्यन्तरालनिष्पत्तेः ।४।१।५६।

अथ सुखादिषु दुःखत्वोपदेशो [दुःख]भावनापरः कथम् ? सुखप्रत्याख्यानपर एव कस्मान्न भवतीत्यत आह—"सुखस्या······निष्पत्तेः" । निष्पद्यते खलु बाधनान्तराले सुखमिति तत् प्रत्याख्यानं बाधितमित्यर्थः ।४।१।५६।

बाधनाऽनिवृत्तेर्वेदयतः पर्येषणदोषादप्रतिषेधः ।४।१।५७।

इतश्च दुःखभावनोपदेशो न सुखस्य प्रत्याख्यानमित्याह—"बाधना···प्रतिषेधः" । अप्रतिषेधः सुखस्येति शेषः । वेदयतः इदं मे सुखसाधनमिति जानतो यत् पर्येषणं सुखार्थं प्रवृत्तिस्तद्दोषात् बहुतरप्रतिबन्धाद्युपप्लवात् बाधनाया दुःखस्यानिवृत्ति[त्ते]रुत्पादयतोऽतो दुःखभावनोपदेशोऽयं न तु सुखस्योत्पत्त्यर्थमुपजीव्यस्य प्रत्याख्यानमित्यर्थः ।४।१।५७।

दुःखविकल्पे सुखाभिमानाच्च ।४।१।५८।

ननु दुःखभावनोपदेशो व्यर्थः अय[इम]मेव हि विचार्य प्रेक्षावान् निवत्स्र्यतीत्यत आह—"दुःख···मानाच्च" । दुःखविकल्पे दुःखहेतुपरदारगमनादौ रागिणां स्वारसिकात् सुखाभिमानात् तत्र प्रवृत्तिर्मा भूदित्येतदर्थोऽयमारम्भ इत्यर्थः । यद्यपि रागिणो न निवर्तन्ते तथापि विवेकिनं प्रत्ययमुपदेशः ।४।१।५८।

[अपवर्गपरीक्षाप्रकरणम् ।१०।१४।]

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः ।४।१।५९।

अथ क्रमप्राप्तापवर्गपरीक्षाप्रकरणम् । "तदत्यन्तविमोक्षोऽपवर्ग इति [१।१।२१।] लक्षणवाक्यं सम्यङ् न वेति संशयः । प्रयोजनं त्वपवर्गसिद्धिः । पूर्वपक्षसूत्रम्—"ऋण···भावः" । अप्रत्यक्षे ह्यपवर्गेऽनुमानादि मानम् । तच्चानुष्ठानकालासम्भवेन प्रतिहतमित्यपवर्गाभावे लक्षणमाश्रयासिद्धम् । तथा हि श्रूयते—"जायमानो ह वै ब्राह्मणस्त्रिभि ऋणैर्ऋणवान् जायते । ब्रह्मचर्येण ऋषिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः" [इति] । मुच्यत इति शेषः । "मृत्युना ह वे" ति श्रुतिः । तथा च जन्मन आरभ्य मरणपर्यन्तं ब्रह्मचर्यप्रजायज्ञरूपवानेव पुरुषो भवति । न चैवंरूपवतैव मोक्षानुष्ठानम् ।

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोहेन मोक्षमिच्छन् व्रजत्यधः ॥[१]

---

१. ४।१।५९ तात्पर्यटीकात उद्धृतमिह ।

इत्यादिवाक्येनापाकृतस्य मोक्षानुष्ठानविधानात् । एवं रागद्वेषात्मकक्लेशानुविद्ध एव पुरुषः सदा धर्माधर्मान्यतरजनकप्रयत्नरूपप्रवृत्तिमानेव सदेत्यनुष्ठानाभावाच्च मोक्षाभाव इत्यर्थः ।४।१।५९।

प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः ।४।१।६०।

फलानुबन्धं समाधत्ते—"प्रधान···पपत्तेः ।" अयं तावदर्थवादो विध्येकवाक्यतया प्रवृत्तः । विधिश्च न जातमात्रमुद्दिश्य किन्त्वधिकारिणम् । न हि "यावज्जीवमग्निहोत्रं जुहुयात्", "अहरहः स्वाध्यायमधीयीत", "अपत्यमुत्पादये" दिति विधिभिः कुमारा अधिक्रियन्ते । साङ्गप्रधानोपसंहारसमर्थस्यैवाधिकारात् । अविद्वत्तादिना चाशक्तानां तदभावात् । तथा च तदेकवाक्यतापन्नोऽर्थवादो तस्यैव तदकरणे निन्दामाह । किञ्च "पत्न्यवेक्षितमाज्यं भवति" "पत्न्य त[स्त]द्गायन्ति क्षौमे वसानानि"-त्यादिश्रुतिभिर्यज्ञविधीनां गृहस्थपरतैव पर्यवस्यति । एवं प्रजाविधीनामप्यूर्द्ध्वरेतसां तत्रानधिकारात् । ब्रह्मचर्यविधयस्तु यद्यप्यसमावृत्तपरास्तथापि ब्रह्म वेदस्तस्य चरणमध्ययनं ब्रह्मचर्यम् । तच्च पञ्चयज्ञाभ्यन्तरे प्रात्यहिकत्वेन गृहस्थस्यैव विहितम् । एवं श्रौतं जायमानपदं गृहस्थे गौणम् । गुणश्चापूर्वसम्बन्धः, अपूर्वं च जरायुवहिर्भावः पत्नी च । एवमृणपदमपि गौणमेव न तु मुख्यम्,[1] तथा प्रत्यर्पणाद्यभावात् । गुणश्चावश्यापाकरणीयम् । स्वायत्ते शब्दप्रयोगे किमित्यवाचकेनोपन्यास इत्यत आह **निन्दाप्रशंसोपपत्तेः** । अनपाकरणे निन्दामपाकरणे प्रशंसां कर्तुम् । तदनेन परिणयात् ऋणाननुबन्धो दर्शितः । नापि गार्हस्थ्यावस्था सकलऋणानुबन्धा । अन्यथा "मृत्युना ह वे"त्यनेनैव कर्मणो मरणान्तत्वे दर्शिते "जरया ह वे"ति जरान्तरं नादर्शयिष्यतीत्यतोऽवसीयते । सत्यार्थत्वे कर्मणां मरणन्तत्वमसति तु जरान्तत्वम् ।४।१।६०।

समारोपणादात्मन्यप्रतिषेधः ।४।१।६१।

आर्थत्व एव कर्मणां मरणान्तत्वमित्यत्र युक्त्यन्तरमाह—"समा···षेधः" । अपवर्गस्य ऋणाद्यनुबन्धेन प्रतिषेधो न, आत्मन्य[ग्नि] समारोपणात् । समारोप एव श्रूयते हि "प्राजापत्यामिष्टिं निरूप्य तस्यां सार्ववेदसङ्गत्या आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेदिति" । तथा च नाग्निहोत्रादीनां मरणान्ततेति ।४।१।६१।

पात्रचयान्तानुपपत्तेश्च फलाभावः ।४।१।६२।

युक्त्यन्तरमाह—"पात्र···भावः" । अविशेषेण फलस्य कर्तृप्रयोजकत्वाभावः । कुतः, पात्रचयान्तानुपपत्तेः । न ह्यगृहस्थानां प्रमीतानामन्त्येष्टौ यथोद्देशं प्रत्यङ्गमिन्धनपात्राणि निधीयन्ते । यदीह कर्मणां मरणान्त एव स्यात्तदा गृहस्थानामपि पात्रचयान्ततैव स्यादित्यर्थः ।४।१।६२।

---

१. न तु मुख्यमिति घ मातृकायां नास्ति ।

सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः ।४।१।६३।

क्लेशानुबन्धं दूषयति—'सुषुप्तस्य……दपवर्गः" । यथा सुषुप्तस्य स्वप्नज्ञान-विरहदशायां क्लेशाभावस्तथा क्लेशशून्यापवर्गोऽपि स्यात् । जीवन्मुक्ततादशायामपि क्लेशो न स्यादित्यर्थः ।४।१।६३।

न प्रवृत्तिः प्रतिसन्धाय हीनक्लेशस्य ।४।१।६४।

प्रवृत्त्यनुबन्धं समाधत्ते—"न, प्रवृत्तिः…क्लेशस्य" । रागादिशून्यस्य पुरुषस्य प्रवृत्तिः क्रिया धर्माधर्मोत्पत्तिर्येन भवतीत्यर्थः ।४।१।६४।

न, क्लेशसन्ततेः स्वाभाविकत्वात् ।४।१।६५।

शङ्कते—"न, क्लेश…कत्वात्" । क्लेशसन्ततेर्विच्छेदो न, कुतः ? क्लेशसन्ततेः **स्वाभाविकत्वात्** अनादित्वेनोच्छेत्तुमशक्यत्वादित्यर्थः ।४।१।६५।

प्रागुत्पत्तेरभावानित्यत्ववत् स्वाभाविकेऽप्यनित्यत्वम् ।४।१।६६।

सिद्धान्त्येकदेश्याह—"प्रागुत्पत्ते…नित्यत्वम्" । यथा प्रागुत्पत्तेरभावः प्राग-भावोऽनादिरथ च विनाशी एवं क्लेशसन्ततिरपीति ।४।१।६६।

अणुश्यामतानित्यत्ववद्वा ।४।१।६७।

दृष्टान्तान्तरं स एवाह—"अणु…वद्वा" । यथाऽनादिरपि अणुश्यामता निवर्तते तथा क्लेशसन्ततिरपीति । तथा चानादित्वमनैकान्तिकत्वमित्यर्थः ।
केचित्तु भिन्नवक्तृकं सूत्रद्वयमिति । तन्न वादिभेदे वाक्यार्थानुपपत्तेर्मनोभावाच्च [?] [र्मानाभावाच्च] ।४।१।६७।

न सङ्कल्पनिमित्तत्वाच्च रागादीनाम् ।४।१।६८।

नित्यता हि भावत्वे सति[त्य] विनाशिता । न चेयं प्रागभावे, न चाणुश्या-मताप्यकार्येत्युभयमुपेक्ष्य परमसिद्धान्त्याह—'न, सङ्कल्प…रागादीनाम्" । कर्म-निमित्तत्वादितरेतरनिमित्तत्वाच्चेत्यनुक्तसमुच्चयार्थश्चकारः । सङ्कल्पो मिथ्याज्ञानं **तन्निमित्तका** रागद्वेषमोहा इति तत्त्वज्ञानेन मिथ्याज्ञाननिवृत्तावनादयोऽपि रागादयः कारणोच्छेदान्निवर्त्स्यन्तीत्यनुच्छेद्यत्वेऽनादित्वमप्रयोजकमित्यर्थः । एवञ्च ऋणशब्देन प्रवृत्त्यनुबन्धे निरस्ते शब्दानुमानाभ्यामपवर्गसिद्धौ क लक्षणस्याश्रयासिद्धिरिति । ४।१।६८।

उमापतिसगर्भेण श्रीविश्वधरसूनुना ।
श्रीकेशवेन व्याख्यातं चतुर्थप्रथमाह्निकम् ॥

इति प्रथमोऽध्यायः ।

चतुर्थोऽध्यायः ।

द्वितीयाह्निकम् ।

[तत्त्वज्ञानोत्पत्तिप्रकरणम् ।३।१।]

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः ।४।२।१।

तदेवं प्रमाणप्रमेयसंशयाः साक्षात्, प्रयोजनादयस्तु "यत्र संशय" [२।१।७।] इत्यतिदेशादपि षोडशापि पदार्थाः परीक्षिताः। सम्प्रत्यवसरसङ्गत्या तत्तत्त्वज्ञान-परीक्षा। तथा हि अपवर्गसाक्षाद्धेतुत्वेन प्रथमं तत्त्वज्ञानपरीक्षाप्राप्तौ निरूप्यतया प्रमेयपरीक्षाबुभुत्सिततमत्वेन तया प्रतिबन्धादथ तत्पर्याप्तौ प्रतिबन्धकजिज्ञासा-पगमात्। तत्र किं लक्षणं, कथमुत्पद्यते, किं विषयं, कथं विवर्द्धते, कथं प्रतिपाल्यते चेत्यपेक्षायां षट् प्रकरणानि। तेष्वपि प्रथमं निमित्तार्थत्वं संज्ञाविषयाणां रूपादीनां दोषनिमित्तताप्रदर्शनद्वारा वा विषयकथनेन तदुत्पत्तेर्लक्षणस्य विषयस्य प्रदर्शनायादौ तत्त्वज्ञानोत्पत्तिप्रकरणम्।

नन्वात्मादीनां तत्त्वज्ञानं साक्षादुपयोगि प्रमाणदीनां तु तदङ्गतयेत्युक्तं [वार्तिके १।१।१।]। तदयुक्तम्। षोडशानामेव पदार्थानां तत्त्वज्ञानमपवर्गहेतुः, यस्य कस्यापि वा? आद्येऽपि प्रातिस्विकरूपेण सामान्यरूपेण वा? नाद्यः, तेषामानन्त्ये-नाशक्यज्ञानत्वात्। नान्त्यः, प्राणिमात्रस्य वस्तुत्वादिना तत्सम्भवात्। अत एव नान्त्यः, तत्त्वज्ञानाविषये हि मिथ्याधीसत्त्वे संसारतादवस्थ्याच्चेत्यादि पूर्वपक्षकं सिद्धान्तसूत्रम्—"दोष···निवृत्तिः"। आत्मभ्रमविषयीकृताः शरीरादय एव दोष-निमित्तानीति तेषामेव तत्त्वज्ञानादात्मभेदाध्यवसायादहङ्कारस्य देहादिष्वात्मभ्रमस्य सवासनस्य संसारबीजस्य निवृत्तिरिति। तदनुकूलतया प्रमाणादितत्त्वधीरिति। तथा च शरीरादित्वेन प्रमेयाणां तदनुकूलानां च प्रमाणादीनां प्रातिस्विकेन रूपेण तत्त्व-धीरपवर्गायेति न यथोक्तविकल्पावकाशः। एवं च स्वभेदेन शरीरादीन्यध्यवस्यन् तेषु······प्रत्युत दुःखानुबद्धान्येतानीति भावयन् द्वितीयसूत्रोक्त [१।१।२] क्रमेणाप-वृज्यत इति भावः ।४।२।१।

दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृताः ।४।२।२।

ननु प्रयतमानस्यापि मनश्चा० न्या[श्चाञ्चल्या]न्न समाधिरतः प्रयत्नानुपूर्वी-कथनाय सूत्रम्—"दोष···कृताः"। **सङ्कल्पकृताः** मिथ्याज्ञानविषयीकृताः **रूपादयः** रञ्जनीयमोहनीयकोपनीयविषयाः **दोषनिमित्तं** रागादिहेतवः सुन्दरीयमिति हि मिथ्याध्यवस्यन् रज्यति, शत्रुरयमिति द्वेष्टि। अतः प्रथमं रूपादय एव हेयतया भाव्याः। ततो देहादय आत्मभिन्नतया हेयत्वेन भाव्या इति क्रमेण निश्चलसमाधिरित्यर्थः। ४।२।२।

तन्निमित्तं त्ववयव्यभिमानः ।४।२।३।

ननु मृगाक्षीयमित्यादेस्तत्त्वज्ञानान्मिथ्याज्ञाननिवृत्तावपि रागादितादवस्थ्यमित्यत आह—"तन्निमित्तं……मानः" । तु यतः अवयव्यभिमानः उपादेयत्वेनावयविज्ञानम् । तन्निमित्तं रागादिजनकं सुदतीयमित्यादि निमित्तसंज्ञां मृगाक्षीयमित्याद्यर्थ-[नु] व्यञ्जनसंज्ञां चोपासीनस्य रागादिर्वर्द्धते । [1]द्रवत्कनकेत्यादि हि मूढ़ावत्यन्तः प्रायः [मूढा भावयन्तः प्राहुः] । इयं च शुभसंज्ञा मज्जा [2]मस्थ्नामित्याद्यशुभसंज्ञाभावनेन निवर्त्यते । तथा च संसाररूपबलवदनिष्टसाधनत्वेनानुपादेयायामेव योषिति मृगाक्षीत्याद्युपादेयत्वज्ञानं भ्रम एवेति न दोष इत्यर्थः ।

तथा च प्रथमसूत्रेण तमनः शरीरादिभेदाध्यवसायस्तत्त्वज्ञानमिति स्वरूपमुक्तम् । द्वितीयेनोत्पत्तिप्रकार उक्तः । तृतीयेन शरीरदयस्तद्विषयाः संसारहेतव इति । त एव तत्त्वधीविषया मोक्षहेतव इति वदता तद्विषय उक्त इत्यवधेयम् ।४।२।३।

[अवयविप्रकरणं प्रासङ्गिकम् १२।२।]

विद्याविद्याद्वैविध्यात् संशयः ।४।२।४।

तन्निमित्तं त्ववयव्यभिमानः [४।२।३।] इति सूत्रेण स्मारितमवयविनं सौगता न सहन्ते इति प्रासङ्गिकमवयविप्रकरणम् । यद्यपि द्वितीये[3] अवयवी व्यवस्थापित एव तथापि स्वयुक्तिदार्ढ्येन सौत्रान्तिकवैभाषिकयोराभ्या[4]मवयविनि निराकृते परमाणुर्निराकरिष्यामीति अयत्नादेव विज्ञान[ना]द्वैतसिद्धिरित्यभिमानाद् योगाचारस्य च प्रत्यवस्थानम् । तत्र विचारानुकूलसंशयप्रदर्शनाय सूत्रम्—"विद्या·· संशयः" उपलब्धिर्विद्या, अनुपलब्धिरविद्या, तयोर्द्वैविध्यं विद्यमानाविद्यमानविषयता । तथा

१—द्रवत्कनकनिर्मलद्युतिरनङ्गलीलैकभू-
मंहेभकटविभ्रमस्तनभरालसाङ्गी यदि ।
प्रिया न परिरभ्यते तुलितसिद्धसञ्जीवनी
सहेमहि कुतोऽन्यथा विषमबाणबाणव्यथाम् ॥
मदनसरितमेनां गाहमानो जनोऽयम्
जघनपुलिननाभीमण्डलावर्तरम्याम् ।
मुखनलिनसनाथामुल्लसद्भ्रूलतोर्मिं
चिरविरहहुताशायासभुज्झां चकार" ॥ तात्पर्यटीका ४।२।३।

२—विवेकिनस्त्वशुभसंज्ञां भावयन्तः प्राहुः ।
मज्जामस्थ्नामथ प्लीहां यकृतां शकृतामपि ।
पूर्णाः स्नायुशिरास्यूताः स्त्रियश्चर्मप्रसेविकाः ॥ ता० टी० ४।२।३

३. द्रष्टव्यम् न्यायसूत्रम् ।२।१।३२-३६ ।

४, निमित्तानुव्यञ्जनसंज्ञाभ्यामित्यभिप्रायः ।

हि सदुपलभ्यते यथा तडागतोयम् । असदुपलभ्यते यथा मरुमरीचिकायामुदकम् । सन्नोपलभ्यते यथा निखातनिध्यादि । असन्नोपलभ्यते यथाश्वशृङ्गम् । तदेवमुपलभ्यमानेऽनुपलभ्यमाने च सत्त्वासत्त्वसंशयः ।

यद्वा विद्या तत्त्वधीः, अविद्या भ्रमः, एवंरूपं तद्द्वैविध्यम् । तस्मात् धियां द्वैरूप्यं दृष्टमिति धीत्वादवयविधीरपि विद्याऽविद्या वेति संशयः ।४।२।४।

तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ।४।२।५।

अत्र संशयात् पूर्वपक्षो विपरीतावधारणाद्वा ? आद्य आह—"तद···त्वात्" । द्वितीयाध्यायोक्तहेतुना प्रकर्षेण साधितत्वाद् विशेषादर्शनादवयविनि न सन्देह इत्यर्थः ।४।२।५।

वृत्त्यनुपपत्तेरपि [तर्हि न] संशयः ।४।२।६।

द्वितीयमाश्रित्य पूर्वपक्ष्याह —"वृत्त्य···संशयः" । अपिरवधारणे वृत्त्यनुपपत्तेः वृत्तिव्यतिरेकावधारणादेवासंशयः । तथा हि अवयवी अवयवेषु कात्स्न्र्येन वर्तते एकदेशेन वा ? नाद्यः, परिमाणवैषम्यात् । अन्त्येऽपि तेनैवान्येन वा ? नाद्यः, स्ववृत्तिविरोधात् । नान्त्योऽवयवस्यावयवान्तरावृत्तित्वात् ।४।२।६।

पृथक् चावयवेभ्योऽवृत्तेः ।४।२।७।

न कात्स्न्र्यैकदेशाभ्यां किन्तु स्वरूपेणावयवी वर्तत इत्याशङ्क्य पूर्वपक्ष्याह—"पृथक्···ऽवृत्तेः" । च समुच्चये । अवयव्यभाव इति वर्तते । अवयवेष्वपि पृथगपि [अवयवेभ्यः पृथक्] अवयव्यभावः । कुतः ? अवृत्तेः [अवृत्तित्वप्रसङ्गात्] न हि अवयवीह वृत्तिर्भवति नित्यत्वप्रसङ्गादित्यर्थः ।४।२।७।

न चावयव्यवयवाः ।४।२।८।

न हि अत्यन्तभेदे गवाश्वयोरिव, नाप्यत्यन्ताभेदे घटस्येव धर्मिधर्मभाव इत्यवयवभिन्नाभिन्नं तद्धर्ममात्रमवयवीति वृत्तिरेव न, क्व विकल्पः ? इति वादिनं पूर्वपक्ष्याह—"न चा···यवाः" । अवयवाश्च नावयवी अभेदे मत्वर्थीयार्थासंभवात् । न च भेदाभेदो विरोधादित्यर्थः ।४।२।८।

एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ।४।२।९।

सिद्धान्त्याह—"एकस्मिन्·· रप्रश्नः" । अनेकस्याशेषता कात्स्न्र्ये । नानाभूतानां किञ्चित्त्वमेकदेशित्वमेतच्च देशनियतम् । न चावयवी भिन्न एकत्वादत एकस्मिन्नवयविनि भेदाभावाद् भेदशब्दप्रयोगः कात्स्न्र्यैकदेशविकल्परूपानुपपन्नस्ततश्च वृत्तित्वं ···नो युक्तो [वृत्तित्वं न युक्तम्] अवयव्यसिद्धावाश्रयासिद्धिश्चेत्यर्थः ।४।२।९।

अवयवान्तरभावेऽप्यवृत्तेरहेतुः ।४।२।१०।

इतश्च वृत्तिविकल्पो न युक्त इत्याह—"अवयवा··रहेतुः" । अवयवी एकदेशेन स्वावयवेन वर्तत [इति] साध्येऽवयवान्तराभावादित्यहेतुः । कुतः ? **अवयवान्तरभावेऽप्यवृत्तेः** । अवयवान्तरसम्भवेऽपि तस्यैव परं वृत्तिरायाति न तु तदवच्छेदेनावयविनोऽपि नागृहीतविशेषणन्यायात्[१] ।

ननु कात्स्न्यैंकदेशाभ्यां मा वर्ततां, कथं पुनर्वर्तेत इति चेत् स्वरूपेणैव । तन्तुषु पट इत्यनुभवात् । अन्यथा गोत्वेऽपि का गतिः ।४।२।१०।

केशसमूहे तैमिरिकोपलब्धिवत् तदुपलब्धिः ।४।२।११।

"सर्वाग्रहणमवयव्यसिद्धेः" [२।१।३४] इति यदवयविसाधनमुक्तम् । तत्र पूर्वपक्ष्याह—"केशसमूहे···तदुपलब्धिः" । यथा तैमिरिकं प्रति प्रत्येकमयोग्या अपि केशाः समूहितास्तैरुपलभ्यन्ते । तथा परमाणवोऽपि समूहिता एव गृह्येरन्निति न सर्वाग्रहणमित्यर्थः ।४।२।११।

स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः ।४।२।१२।

सिद्धान्त्याह—"स्वविषया···प्रवृत्तिः" । स्वविषयानतिक्रमेण प्रवर्तमानस्येन्द्रियस्य पटुमन्दभावात् विषयग्रहणस्य पटुमन्दभावः, न तु स्वविषये प्रवृत्ति[रिन्द्रियस्य निराक्रियते] ।४।२।१२।

अवयवावयविप्रसङ्गश्चैवमा प्रलयात् ।४।२।१३।

अपि च योऽयमवयवेषु अवयविनो वृत्तिविकल्पानुपपत्त्याऽभाव आपाद्यते, स प्रलयाद्वा निवर्तते परमाणुतो वा ? अनिवृत्तो वा ? आद्ये दूषयति—"अवयवा······प्रलयात्" । यथा वृत्तिविकल्पाद् [ल्पो] घटादौ तथा तदवयवपरम्परायामपीति एवं रूपोऽवयवावयविप्रसङ्गश्च मन्यतापां [?] [तदभावात् प्रलये] व्यवतिष्ठते । तथा च दर्शनविषयस्याप्यभावे विकल्पः कमालम्ब्य । जायेत एवं परमाणुपर्यवसानेऽपि । तेषामतीन्द्रियत्वेन दर्शनानारोहात् । तथा चोपजीव्यव्याकोपव्याहतो विकल्प इत्यर्थः ।४।२।१३।

न प्रलयोऽणुसद्भावात् ।४।२।१४।

प्रलयश्च नेत्याह—"न प्रलयो···भावात्" । तेषां नित्यत्वादिति भावः ।४।२।१४।

१—नागृहीतविशेषणा बुद्धिः विशेष्ये प्रवर्तते इति न्यायस्वरूपम् ।

परं वा त्रुटेः ।४।२।१५।

अन्त्यं दूषयति—"परं वा त्रुटेः"। वाकारो यथाकृतविकल्पस्फोरणाय। त्रुटेः त्रसरेणोः परसूद्‌र्ध्वमपि चेदवयवा अनन्तास्तदा तस्य दृश्यमानस्तौल्याधिकस्तौल्यप्रसङ्गः। प्रत्यक्षावयवत्वप्रसङ्गश्चेत्यर्थः। तथा च सिद्धोऽवयवीति ।४।२।१५।

[निरवयवपरीक्षाप्रकरणम् ।८।३।]

आकाशव्यतिभेदात्तदनुपपत्तिः ।४।२।१६।

अथोपोद्‌घातिकं प्रासङ्गिकं वा निरवयवप्रकरणम्। तत्र मूर्तत्वं निरवयववृत्ति न वेति विप्रतिपत्तौ योगाचार आह—"आकाश···नुपपत्तिः"। तस्य निरवयवस्य [परमा]णोरनुपपत्तिः। कुतः ? आकाशव्यतिभेदात् आकाशेनान्तःसम्बन्धात्। यद्धि अन्तराकाशसंबद्धं तत्सावयवमानन्त्यं [मनन्तं] च यथा घटादीत्यर्थः ।४।२।१६।

आकाशासर्वगतत्वं वा ।४।२।१७।

परमाणोरन्तराकाशमेव नेति यदि ब्रूयात् तत्राह—"आकाशा···वा"। यदि परमाणोरन्तर्नाकाशं तदा तदसर्वगतं प्राप्तं सेयमुभयतः पाशा रज्जुरित्यर्थः। न चाणोरन्तरेण नास्ति···व्याघातादिति भावः ।४।२।१७।

अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः ।४।२।१८।

सिद्धान्त्याह—"अन्तर्बहिश्च···तदभावः"। अन्तरिति बहिरिति च कार्यद्रव्य[स्य] कारणान्तरवचनम्। पिहितो हि अवयवोऽन्तःपिधायको बहिरित्यतोऽकार्ये अणौ तदभावः अन्तरभावः। तथा च व्यतिभेदः स्वरूपासिद्धः ।४।२।१८।

शब्दसंयोगविभवाच्च सर्वगतम् ।४।२।१९।

आकाशासर्वगतत्वं वेति [४।२।१७] दूषयति—"शब्द··गतम्"। सर्वे शब्दा आकाशे विभवन्ति जायन्ते सर्वमूर्तसंयोगश्च। तस्मादाकाशं सर्वगतम्।······४।२।१९।

अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः ।४।२।२०।

नन्वेवं मूर्तानां व्यूहनावष्टम्भने स्यातां नावादिनेव जलादेः। न चैवं, तस्मान्न सर्वगतमत आह—"अव्यूह···धर्माः"। सावयवेन हि अन्यत् स्वसंयोगि विपरीताकारं प्रतिबन्धगतिकञ्च क्रियते। आकाशं च न सावयवम्। अतोऽव्यूहाविष्टम्भौ व्योम्नि सिद्धौ। ताभ्यां च विभुत्वम्। अतोऽव्यूहादौ सावयवत्वाभावो हेतुर्न सर्वगतत्वाभाव इत्यर्थः ।४।२।२०।

मूर्तिमतां च संस्थानोपपत्तेरवयवसद्भावः ।४।२।२१।

पूर्वपक्ष्याह—"मूर्तिमतां···सद्भावः" । चस्त्वर्थः सिद्धान्तवारणे । मूर्तिमच्चापि परिमाणं, संस्थानं त्रिकोणत्वादि । तेन द्व्यर्थकावयवाः [परमाणवः] सावयवाः मूर्तिमत्त्वात् संस्थानवत्त्वाच्च घटवदिति पुनः सावयवत्वमणोरागतमित्यर्थः ।४।२।२१।

संयोगोपपत्तेश्च ।४।२।२२।

युक्त्यन्तरमाह—'संयोगोपपत्तेश्च" । अवयवसद्भाव इत्यनुषज्यते । मध्ये सन्नणुः पूर्वापराभ्यां संयुज्यमानस्तयोर्व्यवधायकः । व्यवधायकत्वं चावयविधर्म इत्यर्थः । ।४।२।२२।

अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः ।४।२।२३।

सिद्धान्त्याह्--"अनवस्था···षेधः" । पूर्वोक्तयुक्त्या विश्रामः स्वीकार्य एव । तथा च तत्रैव सर्वे हेतवो व्यभिचारिणः । अस्वीकारे अनवस्थाकारित्वात् । न च सा प्रामाणिकीत्याह—**अनवस्थानुपपत्तेश्चेति** ।४।२।२३।

[बाह्यार्थभङ्गनिराकरणप्रकरणम् ।१२।४।]

बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिः ।४।२।२४।

प्रसङ्गे बाह्यार्थापह्नवनिराकरणप्रकरणम् । तत्र वस्तुत्वं ज्ञानत्वव्याप्यं न वेति विप्रतिपत्तौ **योगाचार** आह–"बुद्ध्या···नुपलब्धिः" । तुः प्रकारान्तरव्यवच्छेदे-भवतीति ताव[द्वस्तु]विवेचनादुन्मेषति बाह्यसिद्धिरास्थेया । बुद्धिश्च न बाह्य-मुन्मेषति । सन् घट इति ज्ञानमित्यर्थव्यवसायेन घटतद्विशेषयोरुन्मेषात् इति शब्दार्थस्वरसात् । एवं च त्वदभिमतस्य भावानां ज्ञानभेदलक्षणस्य याथार्थ्यस्यानु-पलब्धिः । यथा **तन्त्वपकर्षणे** तन्तुपरीहारे पटो नोपलभ्यत इति न पटस्तन्त्वतिरिक्तः तथा ज्ञानेऽपि । एवं तन्त्वादिरपि तावत् यावदर्थः । अणुरपि यदि दिगादिभिन्नः स्यात् ततो भेदेन गृह्येत । न चैवमित्यणोरप्यभावे स्वमात्रमर्थमूर्तयो धिय आकारम। बाह्यत्वेनोन्मिषन्त्या भ्रान्तय इत्यर्थः ।४।२।२४।

व्याहतत्वादहेतुः ।४।२।२५।

सिद्धान्त्याह—"व्याहतत्वादहेतुः" । बुद्ध्या विवेचनं बाह्याभावेऽहेतुः व्याहतत्वात् । नहि तन्त्वभावे पटो विविच्येत इति प्रसङ्गो घटते । तथा चावधिसत्त्वे च न विवेचनाद् बाह्याभावः ।४।२।२५।

तदाश्रयत्वादपृथग् ग्रहणम् ४।२।२६।

यदि पटस्तन्तुभिन्नः स्यात् तदा ततो विविच्येत । न चैवमित्यत्रान्यथासिद्धिमाह—"तदाश्रय·········ग्रहणम्" । पटस्यापृथग्ग्रहणेन तावद् विलक्षणबोध्याभावो बीजम् । नापि देशभेदाभावः पटस्य तन्तुदेशत्वात् तन्तूनां चांशुदेशत्वात् । तन्तुरूपदेशान्यदेशेऽनुपलम्भरूपपृथक्ग्रहणं चैतत् । तत्रोत्तरं तदाश्रयत्वादिति । इदमपृथग् ग्रहणं तदाश्रिततयाऽन्यथासिद्धम् । नाभेदं गमयितुमलमित्यर्थः ४।२।२६।

प्रमाणतश्चार्थप्रतिपत्तेः ।४।२।२७।

बाह्ये युक्त्यन्तरमाह—"प्रमाण······पत्तेः" । चः समुच्चये । न सर्वबाह्याभावः । प्रमाणतोऽर्थप्रतिपत्तेः । अन्यथा ज्ञानमपि···प्येत विशेषादित्यर्थः ।४।२।२७।

प्रमाणानुपपत्त्युपपत्तिभ्याम् ।४।२।२८।

व्याघातान्तरमाह—"प्रमाणा······पत्तिभ्याम्" । सर्वाभावसाधने व्याघात इति शेषः । यदि प्रमाणमस्ति क्व सर्वाभावः । तस्यैव सत्त्वात् । अथ नास्ति तदा नतरां, साधनाभावादित्युभयथापि व्याघात इत्यर्थः ।४।२।२८।

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ।४।२।२९

ननु सतापि प्रमाणं न संवृतिसिद्धेन साध्यत एवेति देशयति—"स्वप्न···भिमानः" । यथा स्वप्ने प्रमेयाभिमानो न सदर्थविषयस्तथा प्रमाणप्रमेयधीरसन्मात्रविषयैवेत्यर्थः ।४।२।२९।

मायागन्धर्वनगरमृगतृष्णिकावद् वा ।४।२।३०

अत्र स्वप्नत्वमेवोपाधिरिति चेत् तत्राह—"माया···वद् वा" ।

हेत्वभावादसिद्धिः ।४।२।३१

सिद्धान्ती दूषयति—"हेत्व···सिद्धिः" । सर्वबुद्ध्ययथार्थत्वस्यासिद्धिः । हेत्वादिबुद्धीनामप्ययथार्थत्वेन हेत्वभावात् । यद्वा जाग्रद्धि तत्प्रमाणादिधीरपि समीचीनैव । कस्मात् ? नेत्यत्र हेत्वभावत् । यद्वा दृष्टान्तीभूतस्य स्वप्नस्यासिद्धिर्हेत्वभावात् । सर्वबुद्ध्ययथार्थत्वे स्वप्नग्राहकधियोऽप्ययथार्थत्वादित्यर्थः ।४।२।३१।

स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः ।४।२।३२।

स्वप्नस्मृत्यादिवज्जनकानुभवापेक्षित्वेन तत्प्रत्याख्यायकत्वं च न युक्तमित्याह —"स्मृति······मानः" । स्मृतिवत् सङ्कल्पवच्चेत्यर्थः ।४।२।३२।

मिथ्योपलब्धेर्विनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे ।४।२।३३।

नेदं रजतमित्यादिबाधादस्तु विषयाभाव इति चेत् तत्राह—"मिथ्योपलब्धेः ......प्रतिबोधे" । तत्त्वज्ञानात् मिथ्योपलब्धेस्तदुन्मिषितं धीः शिष्यस्य [?] विनाशो बाधो वा भवति न तु तदुन्मिषितस्य धर्मिणोऽपि स्वप्नविषयभ्रमवदित्यर्थः ।४।२।३३।

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् ।४।२।३४।

यस्तु **माध्यमिको** मिथ्याधीदृष्टान्तेन तत्त्वधियामप्यसदर्थतां प्रसाध्य बाह्यापह्नवं कृत्वा तेनैव दृष्टान्तेन विज्ञानापह्नवं कृत्वा विचारासहं जगदाह । तं प्रत्याह—"बुद्धेश्चैवं .....लम्भात्" । एवमर्थवतो बुद्धेरपि निमित्तमिन्द्रियादिसद्भावः स्वरूपं चोपलभ्यते । अतो न तदपह्नवः शङ्क्य इत्यर्थः ।४।२।३४।

तत्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ।४।२।३५।

बुद्धौ च नैकरूपतैवेत्याह—'तत्त्व.....पत्तिः" । तत्त्वं पुरोवर्ति **प्रधान**मारोप्यमेते मिथ्याबुद्धौ कारणे । न तु तत्त्वबुद्धौ । तत्रारोप्यस्याभावात् । तथा चानयोः कारणयोर्भेदात् मिथ्याबुद्धेस्तत्त्वबुद्धितो भेद इति युक्तं बुद्धिद्वैविध्यमित्यर्थः ।

यद्वा मिथ्याबुद्धेस्तत्त्वप्रधानभेदात् कारिप्रकारावच्छेदेन द्वैविध्यं सदसदर्थविषयत्वमिति न मिथ्याधीदृष्टान्तेन तत्त्वधियोऽपि केवलासदर्थविषयत्वं साध्यमित्यर्थः ।४।२।३५।

[तत्त्वज्ञानविवृद्धिप्रकरणम् ।१२।५।]

समाधिविशेषाभ्यासात् ।४।२।३६।

तदेवं प्रासङ्गिकं बाह्यार्थप्रकरणं समर्थितमात्मा च । इह तत्त्वज्ञानोत्पत्तिप्रकरणे दोषनिमित्तानां तत्वज्ञानादहङ्कारनिवृत्ति [४।२।१।] रित्युक्तम् । न चैतावता कृतकृत्यता । तस्य साक्षात्कारिदृढभ्रमिसवासनमोहोन्मूलनासमर्थत्वात् । अतस्तत्त्वच्छेदक्षमसाक्षात्कारितत्त्वज्ञानपर्यन्तं मीक्तं तत्त्वज्ञानं विमर्शनीयमिति । प्रकृततत्त्वसाक्षात्कारोत्पत्त्युपपादकं निर्वाहकत्वसङ्गत्या तत्त्वज्ञानविवृद्धिप्रकरणम् । तत्त्वज्ञानविवृद्धौ हेतुमाह—"समाधि.....भ्यासात्" । सम्यगाधीयते धार्यते इति **समाधिः** प्रणिधानादिजन्यो मनसः स्थिर आत्मसंयोगः । अयं स्वापेऽपि सुकर इत्यतो **विशेषपदम्** । तद्विशेषस्तत्वबुभुत्सासाध्यस्तादृक् संयोगस्तस्याभ्यास एकाग्रतया प्रणिधानपौनःपुन्यम् । ततश्चिरनिरन्तरादरसेवितात् सवासनमोहोन्मूलनक्षमस्तत्त्वसाक्षात्कार उत्पद्यत इत्यर्थः ।४।२।३६।

नार्थविशेषप्राबल्यात् ।४।२।३७।

आक्षिपति—"नार्थ... ..ल्यात्" । चित्तैकाग्रतानुपपत्तेर्न समाधिसिद्धिः ।

कुतः ? **अर्थविशेषाणां** [स्रक्चन्दनवनितादीनाम्] [घन] गर्जादीनां **प्राबल्या-**दौत्कण्ठ्यात् मनोविक्षेपः स्यादित्यर्थः ।४।२।३७।

क्षुदादिभिः प्रवर्तनाच्च ।४।२।३८।

हेत्वन्तरमाह—"क्षुदा ···नाच्च" । चकारः प्रतिज्ञानुकर्षणार्थः । क्षुत्पिपासादिभि [रुपहतस्याप्य] रन्नादावप्रवृत्तिः स्यादित्यर्थः ।४।२।३८।

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः ।४।२।३९।

सिद्धान्त्याह—"पूर्वकृतः···तदुत्पत्तिः" । **पूर्वकृतः** समाधिस्तस्य **फलं** संस्कारस्तस्यानुबन्धो दार्ढ्यं तस्मात् । सतामपि द्वन्द्वानामकिञ्चित्करतया **तदुत्पत्तिः** समाधिसिद्धिरित्यर्थः ।४।२।३९।

अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः ।४।२।४०।

अन्यथापि प्रत्यनीकपरीहारमाह—"अरण्य···पदेशः" । एषु योगाभ्यासः कर्तव्य इत्युपदेशो यतोऽतः न गीतादयो विषया व्यासेधका इत्यर्थः ।४।२।४०।

अपवर्गेऽप्येवं प्रसङ्गः ।४।२।४१।

तटस्थः पूर्वपक्षिणमाक्षिपति—"अप···प्रसङ्गः" । यद्यर्थप्राबल्यादेव ज्ञानं तदापवर्गेऽपि प्रसज्येत इत्यर्थः ।४।२।४१।

न निष्पन्नावश्यम्भावात् ।४।२।४२।

सिद्धान्ती समाधत्ते—"न··भावात्" । निष्पन्ने सति शरीरादौ सहकारिग्रामे ज्ञानस्यावश्यम्भावो, मोक्षे च न शरीरादीति न ज्ञानमित्यर्थः ।४।२।४२।

तदभावोऽपवर्गे ।४।२।४३।

नन्वन्यशरीरादित एवमुक्तस्य ज्ञानमस्तु । आन्तर्भावे गौरवादत आह—"तदभावोऽपवर्गे" । **अपवर्गे तदभावः** स्वकर्मोपार्जितशरीराभावः । न च गौरवम्, अन्यशरीरस्यान्योपकारकत्वेऽतिप्रसङ्गादित्यर्थः ।४।२।४३।

तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः ।४।२।४४

तत्किं समाधिरेव तत्साधनम् ? अतस्तत्परिकरं दर्शयति—"तदर्थं··· विध्युपायैः" । **तदर्थं** तत्त्वसाक्षात्कारार्थम् । सत्त्व तद्धि [?] द्वारा कर्मणोऽपवर्गे [?] **यमनियमाभ्यामात्मसंस्कारः** आत्मशोधनं कर्तव्यम् । **यमो** निधिवर्जनम् । **नियमः** शौच सन्तोषतपःस्वाध्यायेश्वरप्रणिधानादिः । **योगात्** योगशास्त्रात् **पातञ्जलादेरवगते** यत् आत्मसंस्कारः कर्तव्यः । **अध्यात्मविधयश्च** तपः प्राणायामप्रत्याहारध्यानधारणैकान्ता-

वस्थानाहारनियमनैरन्तर्यानुष्ठानविषयप्रसंख्यानरूपा इत्यर्थः । तदर्थमपवर्गार्थमिति केचित्[1] । [तस्यापवर्गस्याधिगमाये] ति भाष्यादिदर्शनात् ।४।२।४४।

ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवाद ।४।२।४५।

नन्वेतेषामुपायानामनुष्ठाने साक्षात्कारोत्पत्तावान्वीक्षिक्या अनवसर इत्यत आह—"ज्ञान···संवादः" । तदर्थमित्यनुषज्यते । ज्ञायते अनेनेति ज्ञानं शास्त्रं तद्-ग्रहणमध्ययनादि तस्याभ्यासः पौनःपुन्यम् । तद्विद्यास्तदभियुक्तास्तैश्च सह संवादः स्वानुभूतदार्ढ्यार्थं कर्तव्य इत्यर्थः ।४।२।४५।

तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोऽर्थिभिरनसूयिभिरभ्युपेयात् ।४।२।४६।

संवादमेव विशदयति—"तं शिष्य···रभ्युपेयात्" । सब्रह्मचारी सहाध्यायी । शिष्यो गुरुकल्पः । श्रेयोऽर्थी मोक्षमाणः । तस्यापि मुमुक्षया प्राक्तनः संस्कारोऽनु-मीयते । एभिः सह तमात्मनो देहादिभेदमभ्युपेयात् अभिमुखमुपेत्य दोषवादकथया जानीयादित्यर्थः ।४।२।४६।

प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ।४।२।४७।

ननु वादेऽपि स्वपक्षस्थापनाकार्कश्येन गुर्वादीनां द्वेषान्न ते तत्त्वमुपदिशेयुरत आह—"प्रतिपक्ष···मर्थित्वे" । तमभ्युपेयादिति वर्तते । अर्थित्वे [तत्त्व] बुभुत्सावत्वे सति प्रयोजनार्थमनुद्रुत [?] दार्ढ्यार्थं प्रतिपक्षहीनं यथा स्यादेवं तमभ्युपेत्य········ भूय तं स्वपक्षं गुर्वादिकृताद् विचारान्निर्णयेत् । तथा च बुभुत्सां प्रकाशयन् अहं कुर्वन् स्वपक्षमनवस्थापयन्····················द्विषन् विनयादिना गुर्वादीन् प्रसादयन् तेभ्यस्तत्त्वमवधारयेदित्यर्थः ।४।२।४७।

[तत्त्वज्ञानपरिपालनप्रकरणम् ।२।६।]

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ।४।२।४८।

यदेवं तत्त्वज्ञानोत्पत्तिक्रमतद्वृद्धिकथनेन नैरन्तर्ये[ण] य उपाया निरन्तरा-भ्यासाभियोगातिशयादयो दर्शिताः । यावत् संशयाद्यपाकरणाय च वादो दर्शित इति यद्यपि सर्वँ सुस्थम् । तथापि त्रयीबहिःकृतैरहंमानिभिः प्रावादुकैरधिक्षिप्ते तत्त्वे द्रागेव सर्वमिदं विघटिष्यतीति निष्फल एव तावान् प्रयासराशिरतः प्रकृतेन तत्त्वज्ञानोत्पत्ति-प्रकरणेन चाव्यवहितेन निर्वाहकत्वसङ्गत्या तत्परिपालनप्रकरणम् । लब्धं हि परिपालितं वर्द्धते । तत्र परिपालनोपायमाह—"तत्त्वा···वरणवत्" ।४।२।४८।

---

१. विश्वनाथपादाः । तद्वृत्तिपंक्तिरेवं दृश्यते ।

ताभ्यां विगृह्य कथनम् ।४।२।४६।

ननु तत्वबुभुत्सा वादे…कलं च कथितमेवेति किं जल्पवितण्डाभ्यामत आह—"ताभ्यां…कथनम्" । ताभ्यां जल्पवितण्डाभ्यां पाखण्डैः सह विगृह्य तान् विग्रहे विजित्य साधुभ्यस्तत्त्वकथनं कर्तव्यम् विद्यापरिपालनायेत्यर्थः ।४।२।४९।

द्वौ वाहाः श्रुतयो वाणास्त्रित्रिवेदाः शरास्त्रयः ।
वेदा रामा हरा वेदा दिशश्च प्रथमाह्निके ॥
त्रिः सूर्या वसवः सूर्याः सूर्या युग्मं द्वितीयके ।
आद्येऽनुकीर्तनं दोषत्रैराश्यं प्रेत्यभावकम् ॥
शून्येश्वरावुपादानमकस्मात् सर्वनाश्यता ।
सर्वानित्यत्वपार्थक्याभावाः संख्याफलक्रमाः ॥
मोक्षो द्वितीये दोषोऽर्थोऽवयवी तद्विपर्ययः ।
वाह्यार्थो ज्ञानवृद्धिश्च ज्ञानरक्षा त्वनुक्रमात् ॥
उमापतिसगर्भस्य श्रीविश्वधरजन्मनः ।
श्रीमत्केशवमिश्रस्य कृतिर्विजयते तराम् ॥

इति महामहोपाध्यायवेदान्तव्यासश्रीकेशवमिश्रकृते
गौतमीयसूत्रप्रकाशे चतुर्थोऽध्यायः । सूत्राणि ११७।
ल० सं० ४४१ श्रावणवदिसप्तमीशनौ ।

इति चतुर्थोऽध्यायः

———

पञ्चमोऽध्यायः ।

प्रथमाह्निकम् ।

नमः कुवलयापीडमर्दनाय मुरद्विषे ।
स्कन्धारोपिततद्धस्तसबलाकघनत्विषे ॥
सुखेनाध्यापयन् काश्यां न्यायवेदान्तदर्शने ।
श्रीकेशवकविश्चक्रे न्यायसूत्रप्रकाशनम् ॥

[सत्प्रतिपक्षदेशनाभासप्रकरणम् ।३।१।]

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः ।५।१।१।

अथ प्रथमाध्यायोपान्त्यसूत्राभ्यां जातिनिग्रहस्थानसामान्यलक्षणानन्तरं तद्विशेषलक्षणेषु कर्तुमर्हेषु शिष्याणामन्तरङ्गतयाऽत्यन्तबुभुत्सितप्रमेयपरीक्षा तदुपोद्घातादिसङ्गतप्रमाणादिपरीक्षाजिज्ञासया प्रतिवन्धाज्जातिनिग्रहस्थानविशेषजिज्ञासा नाभूत् । प्रतिवन्धकबुभुत्सिततमप्रमेयपरीक्षाजिज्ञासाया अविरोधिविषयसिद्ध्या निग्रहस्थानवहुत्व"मिति [१।२।२०।] सूत्रेषु बहुषु तद्विशेषलक्षणेषु अवसरतः कानि तानीति विशिष्य जिज्ञासायां तद्विशेषलक्षणाय पञ्चमोऽध्याय आरभ्यते । अवसरश्च प्रतिवन्धकजिज्ञासाविषयप्रमाणादिपरीक्षासिद्धिः । तज्ज्ञानात् प्रतिबन्धकजिज्ञासाध्वंसद्वारा विशेषलक्षणानुकूलजिज्ञासया विशेषलक्षणाभिधानम् । स्वविषयसिद्धेर्ज्ञाताया एवेच्छाविच्छेदकत्वात् । अध्यायार्थस्तु जात्यादिपरीक्षेति वृद्धाः । "जातीनां सप्रपञ्चाना[1]"मित्याद्यध्यायान्तवार्तिकात् तद्विशेषलक्षणमित्याचार्याः । वस्तुतस्तु अनन्यपरोपदिष्टरूपवत् कथकाशक्तिलिङ्गविशेषलक्षणं पञ्चमाध्यायार्थः । प्रथमे छलपरीक्षोपोद्घातेन तद्विशेषलक्षणकरणात् । कथकाशक्तिलिङ्गरूपनिग्रहस्थानविशेषनिरनुयोज्यानुयोगविशेषत्वाज् जातेरिति तदर्थमुद्दिष्टरूपवदिति । येन हि रूपेण प्रथमसूत्रे उद्देशस्तेन विशेषलक्षणस्य विवक्षितत्वात् । तच्च जातिविशेषलक्षणं निग्रहस्थानविशेषलक्षणमिति द्वयम् । तदिह जातिविशेषलक्षणं थमाह्निकार्थः ।

१—जातीनां सप्रपञ्चानां निग्रहस्थानलक्षणम् ।
शास्त्रस्य चोपसंहारः पञ्चमे परिकीर्तितः ॥ इति वार्तिकम् ।

जातित्वं च स्वासाधकताप्रयोजकरूपवत्तापरासाधकतासाधकत्वम् । स्वव्याघातकत्वमप्येतदेव । जात्युत्तरं हि येनैव रूपेण स्थापनां व्याहन्ति तेनैव स्वात्मानमपीति । सप्तदश चात्र प्रकरणानि भवन्ति । तानि यथास्थानं वक्ष्यन्ते । तत्राद्यं विभागसूत्रेण सह त्रिभिः सूत्रैः सपक्षसाधर्म्यविपक्षवैधर्म्यमात्रान्यतरगमकत्वप्रयोजकपुरस्कारेण सत्प्रतिपक्षदेशनाभासप्रकरणम् ।

तत्र प्रागुक्तजातिसामान्यलक्षणानन्तरं कियत्यस्ता असङ्कीर्णोपाधिमत्य इति जिज्ञासायां विशेषलक्षणावतारानुकूलजिज्ञासाप्रयोजकविभागोद्देशसूत्रम्—"साधर्म्य···कार्यसमः" । लाघवाय द्वन्द्वः समासः सर्वपदार्थप्रधान इति दूषकतायां परस्परानपेक्षत्वं सूचितम् । लक्षणसूत्रोपस्थितलक्ष्यानुसारेण विग्रहः । समशब्दः प्रत्येकमभिसंबद्ध्यते । समशब्दार्थश्च वादिनोस्तुल्यजात्युत्तरस्य स्थापनादूषकत्ववत [त्] स्वस्यापि दूषकत्वादिति जातीनां साधारणं दुष्टत्वबीजं स्वव्याघातकत्वं सूचितम् । यद्वा स्थापनायाः समीकरणाभिप्रायस्य जातिप्रयोगकरणत्वात् साम्यापादननियतबुद्धिपूर्वप्रयोगत्वं जातीनां व्यञ्जितम् । अन्यथा सदुत्तरापरिस्फूर्तौ अहमेवापकृष्टः स्यामित्यभिप्रेत्य तत्प्रयोगात् । एतेनोक्तिसंभवोऽपि दर्शितः । असाधारणं तु दुष्टताबीजं प्रत्युत्तरसूत्रे सूत्रकार एव वक्ष्यति ।

ननु चान्वर्थसंज्ञानिरुक्तेरेव तत्तद्विशेषलक्षणसिद्धौ तदर्थकसूत्रवैयर्थ्यम् ? साधर्म्यरूपं [पः] स्वव्याघातग्रहः साधर्म्यसम इत्यादेः सर्वत्र सुलभत्वादिति चेत्, न । साधर्म्यादीनां साधारण्येन तत्तद्विशेषोपस्थित्यर्थे स्वस्थानकारणप्रतिसन्धानार्थं च पृथक् विभागलक्षणकरणात् ।५।१।१।

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ ।५।१।२।

तत्र सर्वत्र प्रत्यवस्थानप्रकारे सर्वत्र साधर्म्यवैधर्म्योपस्थितेरावश्यकत्वात् तद्विशेषज्ञाने च तत्सामान्यज्ञानस्योपजीव्यत्वात् तत्रापि तद्व्यतिरेकगर्भत्वात् वैधर्म्यस्य पश्चाद् भावे तयोर्लक्षणाय सूत्रम्—"साधर्म्य··वैधर्म्यसमौ" । प्रतिषेधाविति शेषः । निरनुयोज्यानुयोगविशेषतया जातेः प्रतिषेधरूपत्वात् । साधर्म्येण वैधर्म्येण वोपसंहारे स्थापनायां सत्यां साधर्म्येण वैधर्म्येण च तस्य हेतोः धर्मस्य साध्यस्य, कर्मधारये तस्य स्थापनासंबन्धिनः साध्यस्य विपर्ययो व्यतिरेकस्तस्य उपपत्तिरवगतिस्तस्याः । इयं च षष्ठी संबन्धत्वेन तात्पर्यमभिधत्ते । टीकायामपि कृते पदपूरणे षष्ठे[ष्ठयेव] द्योत्यते ।

यद्वा उपसंहारे इत्येव विषयनिर्देशः । साधर्म्यवैधर्म्याभ्यामिति यथाक्रममग्रेतनेन सम्बन्ध इति नावृत्त्यपेक्षेति । तादर्थ्यमात्रेण प्रत्यवस्थानात् सिद्धिपर्यन्तस्याविवक्षणात् । सम्प्रदायसिद्धं सत्प्रतिपक्षदेशनाभासत्वमनयोः सूचितम् । प्रागुक्तप्रकरणार्थविच्छेदकैकरूपमादाय लक्ष्यपदे समासः । अस्य सत्प्रकरणसमे गतत्वेऽपि जातिसामान्यलक्षणादेव तन्निस्तारः । तस्मात् साधर्म्यमात्रप्रयुक्तगमकत्वपुरस्कारेण

साधर्म्येण सत्प्रतिपक्षतया प्रत्यवस्थानं साधर्म्यसमः। तद्वैधर्म्यप्रयुक्ततद्व्यतिरेक-गमकत्वपुरस्कारेण वैधर्म्येण सत्प्रतिपक्षतया प्रत्यवस्थानं वैधर्म्यसम इति लक्षणद्वयं द्रष्टव्यम्। स्वप्रयोजकविपक्षान्वयिधर्मवत्त्वदर्शनं कारणमाद्यायाः। स्वप्रयोजकमपक्ष-व्यतिरेकिधर्मवत्वदर्शनं कारणमन्त्यायाः। यद्यपि प्रयोजकधर्मदर्शनादपि जाति-प्रयोजकं भवति। तथा[पि] च तस्य प्रयोजकपुरस्कारादप्रयोजककोटिप्रवेश एव विवक्षितः। तदयं पर्यवसितार्थः। साधर्म्येण वैधर्म्येण वोपसंहारो भवतु, साधर्म्येण प्रत्यवस्थानं साधर्म्यसमः। यथा अनित्यः शब्दः कृतकत्वाद् घटवदिति स्थापनायाम्, यद्यनित्यघटसाधर्म्यादनित्यः, तर्हि नित्येनाप्याकाशेन साधर्म्यममूर्तत्वमस्तीति नित्यः प्राप्तः। एतस्मिन्नेव हेतावाकाशवैधर्म्यादित्युक्ते, यदि नित्याकाशवैधर्म्यादनित्यस्तर्हि साधर्म्यमप्याकाशेनास्त्यमूर्तत्वमतो नित्यः प्राप्तः। अथ मन्यसे सत्यप्यस्मिन् साधर्म्ये न नित्यः, न तर्हि वक्तव्यमनित्यघटसाधर्म्यम्। नित्याकाशवैधर्म्याच्चानित्य इति।

एवं साधर्म्येण वैधर्म्येण वोपसंहारे वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमः। तथा च तस्मिन्नेव हेतावाकाशवैधर्म्यादित्युक्ते यदि नित्याकाशवैधर्म्यादनित्यः, तर्हि अनित्येनापि घटेनास्य वैधर्म्यममूर्तत्वमतो नित्यः प्राप्तः। तथा च तस्मिन्नेव हेतौ घटसाधर्म्या-दित्युक्ते यद्यनित्यघटसाधर्म्यादनित्यः तर्हि वैधर्म्यमप्यस्यास्ति अमूर्तत्वमतोऽनित्यः प्राप्तः। अथ मन्यसे, तदप्रयोजकमिदमप्येवमस्त्विति पूर्ववत् तदनयोः साधकसारूप्य-बाधकवैरूप्ययोर्दर्शनं द्वा८ स्थापनाहेतुर्दूष्यः। सत्प्रतिपक्षत्वमारोप्यं वादिमध्यस्थयोः तद्भ्रान्तिः फलम्। कारणमुक्तम्। अबुद्धिपूर्वकप्रयोगे प्रमादो, बुद्धिपूर्वके प्रतिभाक्षयो, मयि वदति कः शक्त इति स्वप्रौढिचिख्यापयिषा वा अवसरः। दुष्टत्वमूलं तु साधारणम् ......दाञ्च योगे वक्ष्यमाणः। असाधारणमत्र युक्ताङ्गहीनत्वम्। साधने युक्तस्याङ्गस्य व्याप्ते......युक्ताङ्गाधिकत्वम्। साधर्म्यमात्रस्यायुक्तस्याङ्गत्वोपगमात्।

केचित्तु मनान्तरेणापि प्रवर्तते। यथा यद्यनुमानेनापि साध्यमायाति तदा प्रत्यक्षेणोपमानेन वा साध्याभाव ....भावादित्याहुः।५।१।२।

गोत्वाद् गोसिद्धिवत् तत्सिद्धिः ।५।१।३।

युक्ताङ्गहीनत्वप्रदर्शनार्थमनयोः प्रत्युत्तरसूत्रम्—"गोत्वाद्...तत्सिद्धिः"। **गोसिद्धिः** गोव्यवहारसिद्धिः। यद्वा **गोत्वात्** सास्नादिमत्वात्। अतो न साध्या-वैशिष्ट्यम्। गोत्वात्..............देरतत्सिद्धिः। न तु तदनियतात् साधर्म्यमात्राद् वैधर्म्यमात्राद्वा..........दुक्तोपसाधर्म्यादिना साधर्म्याद्यन्तरप्रतिघातसम्भवात् इति स्वाव्याघातकत्वं साधारणं [दूषकता] बीजम्।५।१।३।

[उत्कर्षसमादिजातिषट्कप्रकरणम् ।३।२।]

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्ष-वर्ण्यावर्ण्यविकल्पसाध्यसमाः ।५।१।४।

विकल्पानां साधर्म्यादिनिरूप्यत्वात् साध्यदृष्टान्तधर्मविकल्पप्रभवजातिषट्क-

प्रकरणम् । तत् शिक्षणाय सूत्रम् —"साध्यदृष्टान्तयो···साध्यसमाः" । प्रकरणावच्छेद-कैकरूपलाभाय सर्वपदार्थप्रधानो द्वन्द्वः ।··············अत्र धर्मविकल्पादित्यनेन पञ्चलक्षणानि । उभयसाध्यत्वादिति षष्ठमिति प्राञ्चः ।········· विशेषमाश्रित्य साध्यदृष्टान्तधर्मविकल्पानां तत्तज्जातिलक्षणत्वम् । धर्मविकल्पो धर्मवैचित्र्यम् ।

तथा च यत्र उत्कर्षं प्रसञ्जयति स उत्कर्षसमः । यथा तत्रैवानुमाने यदि घट-साधर्म्यादनित्यं तदा तत् स्यादेव रूपादि[मद]पि, [यदि च न रूपादिमत् तदा अनित्यमपि] न स्यादविशेषादिति सर्वत्र योज्यम् ।

साध्ये धर्माभावं दृष्टान्तात् प्रसञ्जयतोऽपकर्षसमः । यथा तत्रैव शब्दोऽरूप इति, घटोऽप्येवं प्रसक्तः । यद्वा घटो नामूर्त इति शब्दोऽपि तथा न स्यात् ।

वर्ण्यश्च ख्यापनीयः साध्य इति यावत् । तथा च यदि यथा घटस्तथा शब्द इति, प्राप्तस्तर्हि यथा शब्दस्तथा घट इति । तथा च शब्दवत् घटोऽपि समर्थहेतुमत्तया साध्यवत्तया च ख्यापनीयः स्यात् ।

एवं यथा घटो न ख्यापनीयस्तथा शब्दोऽपि न स्यादित्यवर्ण्यसमः ।

साधनधर्मयुक्ते दृष्टान्ते धर्मविकल्पात् विकल्पसमः । यथा कृतकत्वे सति शब्दो विभागजः । न घटो यथा [?] । तथा नित्यानित्यविकल्पोऽपि स्यादिति ।

दृष्टान्तादौ साध्यत्वापादनं साध्यसमः । तथाहि पक्षहेतुदृष्टान्ता हि सिद्धा एव भवन्ति । साध्यं तु असिद्धमेवेति वस्तुगतिः । तथा च यदि कृतकत्वादनित्यत्वं साधयसि तदा पक्षहेतुदृष्टान्तानपि साधयेति वर्ण्यसमे साध्यत्वमात्रासञ्जनमिह तु प्रयोगविषयत्वमेव त्रयाणामिति विशेषः ।५।१।४।

किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ।५।१।५।

आसां दुष्टत्वमूलप्रतिपादनपरं सूत्रम्—"किञ्चित्··· ·····दप्रतिषेधः" । किञ्चित्साधर्म्यात् केनचित्साधर्म्यात् नियतात् न तु तन्मात्रात् । उपसंह्रियते पक्षे साध्य[म्] इत्युपसंहारः सिषाधयिषितो धर्मस्तस्य सिद्धिर्ज्ञानं यतोऽतः । वैधर्म्याद-नियतान्न प्रतिषेध उत्कर्षसमादिरूप इत्यर्थः ।

अत्रैवं प्रत्युत्तरक्रमः । भवदेवं यदि कृतकत्वं सहचारमात्रेणानित्यतां साधयतीति वदामि । किन्तु व्याप्यत्वात् साधयतीति ब्रूमः । तत्र नैते प्रसङ्गा भवन्तीति उन्नेयमिदं जातिषट्के ।५।१।५।

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ।५।१।६।

वर्ण्यावर्ण्यसाध्यसमेषु व्याघातान्तरमपि सूत्रयति—"साध्या·····न्तोपपत्तेः" । दृष्टान्तस्योपपत्तेः साध्यसाधनवत्त्वादिना सिद्धेः । पक्षे साध्यस्यातिदेशो ज्ञापनं यतोऽतः प्रतिषेधो न युक्त इत्यर्थः । अप्रतिषेधानुकर्षणार्थश्चकारः ।

इहैवं जातिवादी प्रष्टव्यः, किं भवान् वास्तवीं पक्षसपक्षलिङ्गानां स्थितिमा-स्थाय एवं प्रत्यवतिष्ठते, व्यावहारिकीं वा ? उभयथा अतिदेशनिमित्तं दृष्टान्तः, अति-

देशविषयश्च साध्यम् । सिद्धेन चातिदेशा भवन्त्यसिद्धस्येति न्यायात् । कुतश्चित् मानात् सिद्ध एव दृष्टान्तोऽसिद्धं च साध्यमिति तयोः स्थितिः । एवं सति दृष्टान्तेऽप्यसिद्धार्थत्वादीनामङ्गत्वमिच्छतो व्याघातः । तेषां यथोक्तस्थितिविरोधित्वात् । तथा च सिद्धस्य वर्ण्यत्वापादनेऽसिद्धस्य चावर्ण्यत्वापादने मानान्तरसिद्धस्य तत्प्रयोगसिद्धत्वापादने च व्याघातः ।५।१।६।

[प्राप्त्यप्राप्तिसमजातिद्वयप्रकरणम् ।२।३।]

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याऽविशिष्टत्वादप्राप्त्या-साधकत्वाच्च प्राप्त्यप्राप्तिसमौ ।५।१।७।

साध्यसमलक्षणज्ञानस्य सम्बन्धविषयत्वेन सम्बन्धविशेषणकप्राप्तिसमज्ञाने हेतुत्वं प्राप्तिज्ञानस्य चाप्राप्तिबुद्धाविति सङ्गत्या प्राप्त्यप्राप्तिविकल्पोपक्रमजातिद्वय-प्रकरणमारभते—"प्राप्य साध्यं······प्राप्तिसमौ" । प्रतिषेधाविति शेषः । अप्राप्त्या वेत्यनन्तरं साधकत्व इति सप्तम्यन्तमध्याहार्यम् । लक्षणं तु साध्यप्राप्तिबलेनाविशेषा-पादनात् साधकदोषाभिधानं प्राप्तिसमः । साध्याप्राप्तिबलेनातिप्रसङ्गात् साधकदोषाभि-धानमप्राप्तिसमः । सिद्धिरुत्पत्तिर्ज्ञप्तिश्च तद्विषयः । साध्यं कार्यं ज्ञाप्यं च । प्राप्तिः प्रत्यासत्तिः । एवं च प्रवर्तते कार्येणाप्राप्तं न जनकमतिप्रसङ्गादिति । तेन प्राप्तं कारणम् । सच्च प्राप्य तेनासदिति कारणवत् कार्यस्यापि सत्त्वाविशेषान्न कार्यकारण-भावः । एवमप्राप्य ज्ञापनेऽतिप्रसङ्गात् प्राप्य ज्ञापनं वाच्यम् । न च लिङ्गज्ञानस्य लिङ्गिना संयोगादिः [देः] प्राप्तिरिति विषयित्वरूपा सा वाच्या । तथा च लिङ्गज्ञान एव लिङ्गिनः स्फुरणे ज्ञातत्वाविशेषात् न तयोर्ज्ञाप्यज्ञापकभावः । एते एव विपर्ययेणाप्राप्तसमे । तथा हि कारणं ज्ञापकं वा न प्राप्य तथाऽविशेषादित्यप्राप्य तथेति वाच्यम् । तच्च न, अतिप्रसङ्गात् । नहि अप्राप्तोऽग्निर्दहति दीपो ज्ञापयति । एवं भूतले घटः प्रसक्तः प्रतिषिध्यते । प्रसक्तिश्च प्राप्तिरेव । तथा चाविशेषात् भूतलवत् सोऽपि विधेय एवेति न युक्तस्तत्प्रतिषेधः । अन्यथाऽप्राप्तप्रतिषेधेऽतिप्रसङ्ग इति ।५।१।७।

घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारादप्रतिषेधः ।५।१।८।

अत्र प्रत्युत्तरसूत्रम्—"घटादि······प्रतिषेधः" । इहैवं वाच्यम् । साधनानां परस्परेण प्राप्तावपि नाभेदो नाविशेषो वा । मृत्प्राप्तैर्दण्डादिभिर्घटादिनिष्पत्तिदर्शनात् । फलेन च प्राप्तिरिष्यत एव न, घटादीनामप्राप्तानामेव निष्पत्तिदर्शनात् । ज्ञप्तिपक्षेऽपि लिङ्गस्य धर्मिणा संयोगः साध्येन व्याप्तिः प्राप्तिरस्त्येव । आदिपदादभावबुद्ध्यादि अधिकरणप्रतियोगिनोर्ज्ञानरूपप्रत्यासत्तेः । तथापि कारणं कर्मणा साक्षात् प्रत्यासन्नमेव फलं जनयति इत्यत आह—अभिचारात् पीडने व्यभिचारात् । तत्र हि पीडनीयस्याभिचारेण कर्मणा साक्षात् सम्बन्धः । भावेऽपि उद्देश्यतामात्रेण कार्य-दर्शनात् ।५।१।८।

[प्रसङ्गप्रतिदृष्टान्तसमजातिद्वयप्रकरणम् ।३।४।]

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्ग प्रतिदृष्टान्तसमौ ।५।१।९।

अप्राप्तिसमज्ञानस्याभावविषयतया तद्विशेषप्रसङ्गसमधीहेतुत्वं तद्बुद्धेश्च सम्बन्धविषयतया साध्यसाधनघटितप्रतिदृष्टान्तसमधीहेतुरूपया सङ्गत्या सूत्रम्— "दृष्टान्तस्य……दृष्टान्तसमौ" । प्रकरणार्थस्तु व्यवस्थितिनिरूप्यजातिलक्षणम् । व्यवस्थितिः प्रसिद्धत्वम् [इति] पूर्ववन्नातिप्रसङ्गः । दृष्टान्तपदमजहत्स्वार्थलक्षणया सिद्धपरम् । कारणं कृतिज्ञप्त्योः कारकं ज्ञापकम् । तदयमर्थः, दृष्टान्तस्य कृतिज्ञप्त्योर्व्यवस्थितस्य कारणं व्यवस्थापकम् । तस्यानपदेशादनिर्देशात् प्रत्यवस्थानं प्रसङ्गसमः ।

नन्वेतत् सदुत्तरमेव, असिद्ध्युद्भावकत्वादिति चेत् न । तत्कालप्रमाणव्यवस्थितमेव साध्यव्यवस्थापकमित्यभिधानेन तदभि···वस्थापक [तदनवस्थापादक] प्रसङ्गेन स्वव्याघातकमुत्तरं प्रसङ्गसम इति लक्षणम् । स [सा] चैवं प्रवर्तते । कृतौ तावत् कारणेऽपि किं कारणम् ? ज्ञप्तौ च प्रमाणेऽपि किं प्रमाणम् ? दृष्टान्तेऽपि को दृष्टान्त इति । किं पुनरेतदुत्थानबीजम् ? एवं प्रश्नपरम्पराया निर्दोषत्वे क्वापि कथापर्यवसानं न स्यादिति तत्फलापर्यवसानापत्तेः कथारम्भानुपपत्तिः ।

ज्ञप्तावनिश्चितस्यानिश्चायकत्वारोपः । । घटसत्तां हि व्यवहरता घटप्रमाणसद्भावो वाच्यः । एवं मानेऽपि मानान्तरमित्यनवस्था, मूलासिद्धिर्वा ।

कृतौ तु कारणेऽपि कारणमन्यथा सदातनत्वापत्तेः । प्रथम[प्रयत्न] विलोपो वा ।

प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रतिदृष्टान्तसमः । अत्र प्रथमार्थे पञ्चमी । अस्य केवलदृष्टान्तबलप्रवृत्तत्वात् प्रकरणसमादितो भेदः । तथा च प्रतिदृष्टान्तमात्रमवलम्ब्य बाधप्रतिरोधान्यतराभिधानं प्रतिदृष्टान्तसम इति लक्षणम् । एवं च प्रवर्तते यदि घटदृष्टान्तबलेनानित्यः शब्दः अथाकाशदृष्टान्तबलेन नित्यः किन्न स्यादिति प्रतिरोधपक्षे । बाधकपक्षे तु घटदृष्टान्तबलेन नानित्यः शब्दः आकाशदृष्टान्तबलेन नित्यस्यैव सिद्धेरिति । तदस्य हेतोर्गमनेऽप्रधानत्वेनालिङ्गताभिमानो द्वारम् । दूष्यं दृष्टान्तो न हेतुः । तस्य लिङ्गत्वाभिमानात् । बाधप्रतिरोधौ चारोप्यौ तदाभासा चयेम् ।५।१।९।

प्रदीपोपादानप्रसङ्गविनिवृत्तिवत्तद्विनिवृत्तिः ।५।१।१०।

तत्र प्रसङ्गसमदोषचर्चासूत्रम्—"प्रदीपो·· विनिवृत्तिः" । इहैवं प्रत्युत्तरक्रमः, व्यवस्थितमेव व्यवस्थापकमिति । किमिदं युक्तिसिद्धं लोकसिद्धं वा ? नाद्यः, युक्त्यैव व्यभिचारात् । द्वितीयं किं व्यवस्थापकं प्रामाणिकं वा ? नाद्यः, प्रदीपे व्यभिचारात् । तस्याज्ञातस्यापि ज्ञापकत्वात् । द्वितीये त्विष्टापत्तिः । एवं कृतावपि विजातीयापेक्षापरम्परायामविच्छेदमात्रं न किञ्चिद् बाधते । अथ सजातीयापेक्षानियम आपाद्यते तर्हि उक्तमेवोत्तरम् । नहि प्रदीपः प्रदीपान्तरादेवोत्पद्यते । ५।१।१०।

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ।५।१।११।

प्रतिदृष्टान्तसमे तु प्रत्युत्तरसूत्रम्—"प्रतिदृष्टान्त...दृष्टान्तः" । इहैवं प्रत्युत्तरक्रमः, प्रतिदृष्टान्तस्याधिकरणत्वमभिप्रेत्य । तेन दृष्टान्तबाध आपाद्यते न वा ? नाद्यः, साध्यज्ञापकं साधनमवधीर्य वादिविवक्षितधर्मवत्त्वमात्रेण दृष्टान्तयोर्विशेषाभावात् । नेति पक्षे, तुल्यबलस्याबाधकत्वात् । बाधकत्वे वा दृष्टान्तेनैव प्रतिदृष्टान्तबाधादप्रवृत्तिरिति व्याघातः । तदिदमाह प्रतिदृष्टान्तहेतुत्वे साधकत्वेऽभ्युपगम्यमाने दृष्टान्तो नाहेतुः नासाधक इत्यर्थः । चकारार्थस्तु त्वद्दृष्टान्तेऽपि प्रतिदृष्टान्त सत्त्वाद् व्याघात इति । ५।१।११।

[अनुत्पत्तिसमप्रकरणम् ।२।५।]

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ।५।१।१२।

अभावोपरक्तानुत्पत्तिसमज्ञाने अभावविषयप्रतिदृष्टान्तज्ञानस्य हेतुत्वादनन्तरमनुत्पत्तिसमसूत्रम् —"प्रागुत्पत्तेः...समः" । उत्पत्तेः प्राक् कारणस्य हेतोरभावात् प्रत्यवस्थानमनुत्पत्तिसम इत्यर्थः ।

अत्र ध्वंससाधारणन्याय[येन] प्रागुत्पत्तेरित्यस्य असदवस्थायामित्यर्थः कर्तव्यः । उदाहरणम्, शब्दोऽनित्यः उत्पत्तिधर्मकत्वादित्युक्ते यावच्छब्दो नोत्पद्यते तद्दशायामपि तस्य शब्दशब्दवाच्यतया पक्षत्वादुत्पत्तिधर्मकत्वस्य हेतोरसिद्धेराश्रयभागासिद्धी । विस्तरस्तु तर्कताण्डवे । ५।१।१२।

तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ।५।१।१३।

दोषान्तरसूत्रम्—"तथाभावा...प्रतिषेधः" । उत्पन्नस्य कार्यस्य तथाभावः शब्दादिभावः, तस्य च पक्षत्वम् । तत्र च कारणस्य हेतोरुपपत्तिः [सत्त्वं यतोऽतः, न कारण] प्रतिषेध इत्यर्थः । शब्दो हि पक्षः, न चानुत्पत्तिदशायां शब्दः । तथा च यदा शब्दस्तदा हेतुरस्त्येवेति । ५।१।१३ ।

[संशयसमप्रकरणम् ।२।६।]

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः ।५।१।१४।

संशयस्य विरोधिनिरूप्यत्वात् विरोधस्य चाभावा......विषयानुत्पत्तिसमस्य हेतुत्वेन तदनन्तरं संशयसमप्रकरणाय सूत्रम्—"सामान्य...संशयसमः ।"...... [सामान्यं] नित्यानित्यसाधारणो धर्मः संशयहेतुरस्तीति संशय एव किं न स्यात् ? कस्तयोः साधारणो हेतुरित्यपेक्षायामैन्द्रियकत्वमुदाहृतम् । कथमिदं साधारणमित्यपेक्षायां **सामान्यदृष्टान्तयोरिति सूत्रकृतैवोक्तम्** । मदृष्टान्तोऽत्र दूष्यान्वयिहेतोरिति । अत्रानित्यत्वानुमानवदन्यत्रापि प्रत्यवस्थानात् संशयेन स्वकारणमात्राक्षेपे

नित्यानित्येति । सपा[?]···[साधर्म्यपदं] सपक्षपरम् । तेन संशयसामग्र्यैकदेशमात्रात् संशयप्रसञ्जनं संशयसम इति लक्षणम् । अत एव धर्मिज्ञानमात्रादपि संशयप्रसञ्जने भवतीयं जातिः । उत्थानबीजं तु यथा निर्णयकारणमस्तीति निर्णयः स्यात्, तथा संशयहेतुरस्तीति तेनापि भवितव्यम् । सत्यपि वा कारणे कार्यानुत्पत्तौ निर्णयोऽपि न स्यादित्यादि ।५।१।१४।

साधर्म्यात् संशये न संशयो, वैधर्म्यादुभयथा वा संशयेऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः ।५।१।१५।

अत्र दुष्टत्वसूत्रम्—"साधर्म्यात्···प्रतिषेधः" । साधर्म्यसंशये अभ्युपगम्यमानेऽपि सति वैधर्म्ये निर्णायिके न संशयः विशेषादर्शनात् । ननु सहितानामेव तेषां संशयजनकत्वात् । उभयथा निर्णायिके सत्यसति चेत् संशयः । तदा अत्यन्तसंशयप्रसङ्गः संशयप्रवाहानिवृत्तिः । तथा च निर्णीतेऽपि संशयापत्तिः । अस्त्वेवमिति चेत् अत्रोपतिष्ठते नित्यत्वेति । नित्यं सदा सामान्यस्य संशयजनकत्वानभ्युपगमात् अन्ततः कारणतानिर्णयात् । अन्यथा बहुधा व्याघातः लोकविरोधश्च स्यादिति ।५।१।१५।

[प्रकरणसमप्रकरणम् ।२।७।]

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः ।५।१।१६।

बाधस्य विपरीतक्रमत्वे······स्य प्रतियोगिनिरूप्यत्वात् तस्य संशयोपस्थित्या सूत्रम्—"उभय···प्रकरणसमः" । साधर्म्यादित्युपलक्षणम् वैधर्म्यादित्यपि द्रष्टव्यम् । सिद्धिकारणमात्रेऽपि······प्रक्रिया साध्यं प्रक्रियमाणत्वात् सिद्धेः निर्णयात् । उभयोः साधनप्रतिसाधनयोः साधर्म्यं तुल्यता नैकस्याप्यधिकरणत्वम् । तेनाधिकरणत्वानभ्युपगतेन हेतोर्बाधाभिधानं प्रकरणसमः ।··· सिद्धिर्महत्त्वाद् बाध एव किं न स्यादित्यभिमानो जातिवादिनः । सा चतुर्विधा, प्रत्यक्षादिभिः प्रत्यवस्थानात् । उदाहरणं कार्यत्वादनित्य इत्युक्ते प्रत्यक्षान्नित्यस्यैव सिद्धेः विशेषाभावादिति ।५।१।१६।

प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः ।५।१।१७।

दुष्टत्वमूलसूत्रम्—"प्रतिपक्षात्···पक्षोपपत्तेः" । उभयसाधर्म्यादिति [प्रक्रिया सिद्धि] ब्रुवता प्रतिपक्षात् साधनात् स्थापनायामनधिकरणादपि प्रक्रियामाणार्थस्य सिद्धि [रुक्ता] भवति । तथा च प्रतिषेधस्य बाधरूपस्यानुपपत्तिः । प्रतिपक्षादनधिकरणात् स्थापनारूपादुपपत्तेः साध्यसिद्धेः बाधेऽधिकरणत्वस्याङ्गस्य मुक्तस्य[?] त्यागाद् भङ्गः ।५।१।१७।

[अहेतुसमप्रकरणम् ।३।८।]

त्रैकाल्यासिद्धेर्हेतोरहेतुसमः ।५।१।१८।

······सत्त्वेनाभावनिरूप्यत्वात् अहेतुसमस्यापि तत्त्वेन सङ्गत्या सूत्रम्—"त्रैकाल्या···रहेतुसमः" । हेतोर्हेतुत्वाभिमतस्य ज्ञापकस्य [च] कालत्रयसम्बन्ध-

स्त्रैकाल्यं तस्य हेतुत्वप्रयोजकस्यासिद्धिः व्यतिरेकनिश्चियात् प्रत्यवस्थानमहेतुसमः। अत एव कृतिज्ञप्तिसाधारणं जातिविषयम्। तथा हि घटादिपूर्वं दण्डादिस्वीकारे साधनत्वानुपपत्तिः। तस्य साध्योपहितसाधनरूपत्वात्। साध्यस्योपधायकस्याभावेऽनुपपत्तिः। दण्डादिपूर्वं घटादिस्वीकारे साध्यत्वानुपपत्तिः। साधनघटितमूर्तित्वात् साध्यस्य। सहभावे च तयोः साध्येतरविषाणयोरिव साध्यसाधनभावानुपपत्तिः। साध्यसाधनयोर्मिथो विशेषणत्वमित्यभिमानात्। तथा [च] ज्ञापकस्य धूमादेः साध्यज्ञानात् पूर्वं साध्यज्ञापकत्वज्ञाने साध्यघटितमूर्तितत्साधनत्वमजानता दुर्ज्ञानत्वम्। साध्यस्यैव पूर्वं ज्ञाने तत्प्रतिसाधनमनन्तर्भाव्य दुर्ज्ञेयत्वम्। सहभावे च ज्ञाप्यज्ञापकभावानुपपत्तिरित्युक्तिसम्भवस्य तुल्यत्वात्। यथा चानुपपत्तिसमादितो भेदस्तथा वक्ष्यते। हेतुत्वाभिमतस्य समयबन्धमात्रेण हेतुत्वविरोधापादनमहेतुसम इति लक्षणम्।५।१।१८।

न, हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः।५।१।१९।

अत्र प्रत्युत्तरसूत्रम्—"न हेतुतः···सिद्धिः"। ज्ञप्तिपक्षे हेतोर्ज्ञापकात् त्रैकालिकात् **साध्यस्य** ज्ञाप्यस्य **सिद्धेः** ज्ञप्तेर्दर्शनस्य सार्वलौकिकत्वात् न त्रैकाल्यासिद्धिरूपप्रतिषेध इत्यर्थः। अन्यथा कथकत्वविरोधः। कृतिपक्षे न त्रैकाल्यासिद्धिः। हेतुतः पूर्वकालयुक्तात् **साध्यस्य** कार्यस्योत्तरकालयुक्तस्य सिद्धेः उत्पतेः सार्वलौकिकत्वात्। अन्यथा स एव व्याघात इत्यर्थः। साध्यसाधनयोश्च न मिथो विशेषणत्वम्। किन्तु उपलक्षणत्वम्। सम्बन्धिनोः समकालतानियमो नास्ति। ज्ञानज्ञेययोरन्यथापि स्वीकारात्।५।१।१९।

प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याभावः।५।१।२०।

एवमनभ्युपगमे तवापि व्याघात इत्याह—"प्रतिषेधा···भावः"। चकारः प्रत्युत्तरसमुच्चयार्थः। एवं कार्यकारणभावाभावे प्रतिषेध एवासम्भवी [वः] कुतस्तेनान्यप्रतिषेध इत्यर्थः।५।१।२०।

[अर्थापत्तिसमप्रकरणम्।२।६।]

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः।५।१।२१।

अर्थापत्तेरनुपपत्तिविषयत्वेनाभावनिरूप्यत्वात् तन्निरूप्याहेतुसमानन्तरमर्थापत्तिसमप्रकरणमाह—"अर्थापत्ति······पत्तिसमः"। अर्थापत्तितस्तदाभासात् अ[स्व]व्याघातकत्वात् **प्रतिपक्षसिद्धेः** प्रत्यनीकसिद्धेर्यः प्रतिषेधः सोऽर्थापत्तिसम इत्यर्थः। अर्थापत्त्याभासेन अ[स्व]व्याघातकमुत्तरमर्थापत्तिसम इति लक्षणम्। उत्थानबीजं विशेषणविशेष्यभावोऽयोगव्यवच्छेदेनैव भवतीत्यभिमानः। स चायं बहुप्रकारः।

१, अभाव इत्यस्य स्थाने अप्रतिषेध इति प्रथितः पाठः

तथा हि शब्दोऽनित्य इत्युक्ते अर्थादापद्यते नान्योऽनित्यः। तथा च साध्यविकलो दृष्टान्तः। विशेषविधेः शेषनिषेधविषयत्वमिति व्युत्पत्तिरित्यभिमानात्। अनित्य-साधर्म्यादनित्य इत्युक्ते प्रत्यक्षान्नित्य इति। एवं साधनवद् दूषणेऽप्युन्नेयमिति ।५।१।२१।

अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चा-र्थापत्तेः ।५।१।२२।

अत्र प्रत्युत्तरसूत्रम्—"अनुक्त······चार्थापत्तेः"। किमनुक्तमात्रमर्थादापद्यते उक्तोपपादकमनुक्तं वा? आद्ये अनुक्तस्यानुक्तमात्रस्यापत्तिर्यदि तदा पक्षहानेः त्वत्पक्ष-हानेरुपपत्तिः। कुतः? अनुक्तत्वात् अनुक्तं यतः। तथा च स्वव्याघातः, स्वोक्ति-व्यापनात्। नान्त्यः, अनैकान्तिकत्वमुक्तरूपाया अर्थापत्तेर्यतः। प्रकृतोक्तस्यानुक्तेना-व्यापनात् अव्यापकस्य चानुपपादकत्वात्। चकारेणानुक्तबाधादयः समुच्चीयन्ते ।५।१।२२।

[अविशेषसमप्रकरणम् ।२।१०।]

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेर-विशेषसमः ।५।१।२३।

अर्थापत्तेरनुपपत्तिनिरूप्यत्वेनाभावनिरूप्यत्वमविशेषस्याभावनिरूप्यत्वमित्येक-निरूप्यत्वसंगत्या सूत्रम्—"एक धर्मो······रविशेषसमः"। एकः साध्यदृष्टान्त[योर] भिन्नः साधनधर्मस्तस्योपपत्तेः संबन्धात् अविशेषः साध्यधर्मवत्तालक्षणस्तस्मिन्निति जातिवाद्यभिप्रायवर्णनम्, जात्युत्थानवीजप्रदर्शनाय। लक्षणपरत्वे व्यर्थत्वात्। व्यति-रेकिणा स्थापनायामव्याप्तेश्च प्रत्यवस्थानप्रकारमाह—**सर्वाविशेषप्रसङ्गात्**। **सर्वेत्य** सङ्कोचापादकवत् समुदायपरम्। **अविशेषस्तादात्म्यमेकधर्मवत्त्वमेकजातीयधर्मवत्त्वं** वा। तत् किं साधनधर्मोपपत्तेरेव? नेत्याह—**सद्भावोपपत्तेः** सतो भावः **सद्भावः**, तद्धर्ममात्रं **तदुपपत्तेः**स्तत्संबन्धात्। स एवोपपत्तिर्युक्तिर्वा। ततः प्रमेयत्वद्रव्यत्वादि-प्रत्यवस्थानं लभ्यते। सर्वत्र तादृशधर्माक्रान्ते यथोक्तेऽविशेषप्रसञ्जनात् प्रतिषेधो-ऽविशेषसम इत्यर्थः। एवञ्च प्रवर्तते यदि कृतकत्वलक्षणैकधर्मोपपत्तेः शब्द-घटयोरनित्यत्वलक्षणोऽविशेषो हन्त सत्त्वाद्येकधर्मोपपत्तेस्त्रैलोक्यास्यैवाविशेषः स्यात्। सर्वदूषणाभासा चेयमित्युन्नेयम् ।५।२।२३।

[1]क्वचित्तद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभावः ।५।१।२४।

अत्र दोषमूलत्वप्रतिपादनार्थं सूत्रम्—"क्वचित्······षेधाभावः"। **क्वचिदा-**पादकत्वाभिमते सत्त्वादौ जातिवाद्यभिमते साधने **तद्धर्मस्य** आपाद्यव्याप्यत्व-

---

१. क्वचित्तद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः प्रतिषेधाभावः इति प्रथितः पाठः।

स्यानुपपत्तेरसिद्धेः । क्वचिच्च कृतकत्वादौ तद्धर्मोपपत्तेरनित्यव्याप्यत्वोपपत्तेः । यद्वा क्वचित्साहचर्यमात्रेण तद्धर्मापादनेऽनुपपत्तेः प्रमाणविरोधात् क्वचित्तद्धर्मस्य-व्याप्तिः, अनेन साधकत्वोपपत्तेः प्रतिषेधो नोपपद्यत इत्यर्थः । यद्वा क्वचित् त्वं काल्या-विशेषादौ तद्धर्मानुपपत्तेः सत्त्वादिसाधनव्यापकत्वानुपपत्तेः क्वचिदनित्यादौ कृतकत्व-व्यापकत्वोपपत्तेः प्रतिषेधस्य यथोक्तस्याभावः । तदयं प्रत्युत्तरक्रमः, कस्तेऽभिसन्धिः । सत्ववत् कृतकत्वमसाधनमिति वा कृतकत्ववत् सत्वमपि साधकमस्त्विति वा । उभयमपि मन्दम् । दृष्टान्तमात्रस्यासाधकत्वात् व्याप्तेरभावात् । अन्यथा यथा रासभो न दूषणं तथा त्वद्दृष्टान्तोऽपीति प्रत्यवस्थानस्य सुलभत्वादिति ।५।१।२४।

[उपपत्तिसमप्रकरणम् ।२।११।]

उभयकारणोपपत्तेरुपपत्तिसमः ।५।१।२५

अविशेषोपपत्तिसमयोरनुपपत्तिगर्भत्वात् तदानन्तर्यसङ्गत्या सूत्रम्—"उभय···पत्तिसमः" । उभयोः पक्षप्रतिपक्षयोः कारणं प्रमाणं तस्योपपत्तेरुपपादनात् प्रत्यवस्थानमित्यनुषज्यते । तथा च स्वपक्षसाधनसिद्धिप्राधान्येन परसाधनदूषणमुप-पत्तिसम इत्यर्थः । पक्षोपादानं विषयप्रदर्शनाय । तेन स्थापनायां कृतायामिति लभ्यते। साम्यप्रदर्शनेनोत्थानबीजप्रदर्शनाय च । तदियमेवं प्रवर्तते शब्दोऽनित्यः कार्यत्वादित्युक्ते यद्यनित्यपक्षे प्रमाणमस्तीत्यनित्यो न त्वनित्यपक्षेऽपि किञ्चित्प्रमाणं भविष्यति संदिग्धत्वात् त्वत्पक्षवत् त्वन्मतपक्षान्यतरवत्त्वात् । संशयविप्रतिपत्तिविषय-त्वात् शङ्का पिशाची चात्रान्तर्भवतीति दिक् । महाविद्याऽप्यत्रैवेति एके । अयमेवा-कृतिगण इति वृद्धाः । अनुपलब्धिसमा तथेति अन्ये ।५।१।२५।

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः ।५।१।२६।

अत्र दोषचिन्तासूत्रम्—"उपपत्ति······प्रतिषेधः" । वाद्यभिमतस्योपपत्तौ यत्कारणं प्रमाणं [प्रतिवादिना] तस्याभ्यनुज्ञानात् अयं प्रतिषेधो न युज्यते, विरोधात् । अभ्यनुज्ञाप्रतिषेधयोरेकत्रासम्भवात् । तथा च व्याघातः [प्रतिषेधे] अभ्यनुज्ञाने वा ? यथा त्वत्पक्षे प्रमाणं तथा मत्पक्षेऽपीति तदुत्थानं न स्यादिति ।५।१।२६।

[उपलब्धिसमप्रकरणम् ।२।१२।]

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः ।५।१।२७।

उपपत्तिसमे कारणं निरूपकमिह तु तदभावस्तस्य च प्रतियोगिनिरूप्यत्व-सङ्गत्या सूत्रम्—"निर्दिष्ट·····दुपलब्धिसमः" । वादिना निर्दिष्टस्योपलम्भस्य कारणस्य हेतोः, कारकस्य, ज्ञापकस्य वा व्यापारिणस्तद्व्यापारस्य वा अभावेऽपि साध्यस्य कार्यस्य ज्ञाप्यस्य वोपलम्भादुत्पत्तेरुपलब्धेर्वा प्रत्यवस्थानमुपलब्धिसम इत्यर्थः । एवं च प्रवर्तते पर्वतो वह्निमान् धूमादित्यत्र किं पर्वत एवाग्निमान् उताग्नि-मानेव पर्वतः ? नाद्यो दृष्टान्तासिद्ध्यापत्तेः । नान्त्यो, वह्निं विनापि पर्वतसत्त्वात् ।

कृतिपक्षे तृणं वह्निना नान्ययोगव्यवच्छेदेन संबद्ध्यते। अन्यस्मादपि तदभावात्। नाप्ययोगव्यवच्छेदेन, तृणं विना कदाचिदग्न्युपलब्धेः। नाप्यत्यन्तायोगव्यच्छेदेन स्वकारणसाधारण्यात्। सेयं त्रिधा व्यवच्छेदत्रयेण सुखेन प्रवृत्तेः। आचार्यास्तु पञ्चधेत्याहुरित्यन्यत्र[1] विस्तरः। यद्यपि सूत्रेऽवधारणं न श्रूयते तथाप्यस्याभावेऽप्येतदुपलभ्यत इति दूषणं दूष्यस्यावधारणामेतां सूचयति। यदि हि [वह्नि] स्तापयिता नियमेनोपक्रमेत तदेव नैवमेव द्वि वहेऽप्युपलम्भादिति ? प्रत्यवस्थानं संवद्ध्यते।५।१।२७।

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः।५।१।२८

अत्र प्रत्युत्तरसूत्रम्—"कारणा……प्रतिषेधः"। कारणान्तरादपि प्रयोजकान्तरादपि तद्धर्मस्य व्यवच्छेद्यत्वाभिमतस्य साध्यादेरुपपत्तेरुपपन्नत्वात् तथैव दर्शनादित्यर्थः। नहि सर्वत्र कृतौ ज्ञप्तौ वा व्यवच्छेदो वाक्यार्थः पदार्थो वा। दूषणवाक्यस्याप्येतदवधारणदोषेणानुत्थानापातात्। किन्तु धूमो लिङ्गं तृणं कारणमित्येतावदेवेति दिक्।५।१।२८।

[अनुपलब्धिसमप्रकरणम्।३।१३।]

तदनुपलब्धेरनुपलम्भादभावासिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः ५।१।२९।

अनुपलब्धेः प्रतियोग्युपलब्धिनिरूप्यत्वादुपलब्धिसमानन्तरमनुपलब्धिसमलक्षणमिति सङ्गत्या सूत्रम्—"तदनु…लब्धिसमः"। तदित्यनुपलब्धिग्राह्याभावप्रतियोगिपरामर्शः। तेन घटाद्यनुपलब्धिर्यद्युपलभ्यते तदा विरोधः। उपलभ्यत्वमुपलब्धिकर्मता। न च स्वाभावस्य विरोधिनः कर्मत्वम्। अन्यत्र तथा दर्शनादिति, तदनुपलब्धिर्वाच्या। तथा चानुपलब्धेरेवानुपलम्भादभावापत्तिः। अन्यथा ततोऽन्यस्याप्यभावो न सिद्ध्येत्। एवञ्च तस्यानुपलब्धेर्विपरीतस्य घटाद्युपलम्भस्योपपत्ते र्घटादिसद्भाव एव प्राप्त इत्यर्थः। एवं विषयिणि सर्वत्र। सा चैवं प्रवर्तते। उपलब्धं लिङ्गादिसिद्ध्यङ्गम्। उपलब्धिश्चोपलब्धिरूपेण यत्र वर्तते तदुपलब्धमित्यविवादम्। तदिदमात्मन्यपि ताद्रूप्येण वर्तते न वा ? वर्तते चेद्विषयवदियमप्युपलब्धा स्यात्। तथा च नोपलब्धिरुपलब्धत्वात् तद्वदेव। नेति पक्षे स्वात्मनि स्वरूपेणावृत्तेर्न्नात्माद्युपलब्धिरिति कथं तद्वृत्तेर्हेत्वाद्युपलब्धं स्यात्। अर्थे तद्रूपतायाः स्वात्मनि तद्रूपताव्याप्तत्वात्।

एवमनुपलब्धिः स्वात्मनि ताद्रूप्येण वर्तते न वा ? वर्तते चेत् विषयवदनुपलब्धा स्यात्। तथा च तद्वदेव तदभावः स्यात्। स चोपलब्धिरूप इति विपरीतापत्तिः। नेति पक्षे स्वात्मनि स्वरूपेणावृत्तेर्न्न स्यादेवेति। अतोऽपि विपरीतापत्तिः। एवमिच्छानिच्छाकृतिद्वेषाः कामादयश्च।

१—बोधसिद्धौ इत्यत्र खद्योतटीकावलोकनेन ज्ञायते।

केचितु अविषयिण्यप्येषा प्रवर्तते। यथा पर्वतोऽग्निमान् धूमादित्यत्र पर्वतः स्वात्मनि पर्वतरूपवान्नवा ? आद्ये आत्माश्रयः ? अन्त्ये, नासौ पर्वतः। नहि आत्मन्य-पर्वतः पर्वतो विरोधादित्याश्रयासिद्धिः। एवं साध्याप्रसिद्धिहेत्वाद्यसिद्ध्यादयो वाच्या इत्याहुः। तद्विशेषे संदिग्धे न्यायः प्रवर्तते तत्र सन्देहस्यात्मनिवृत्तौ सन्दिग्धः सन्देहः कथमन्यं व्यवच्छिन्द्यात्। अवृत्तौ सन्देहो न स्यादेवेति, न्यायविषयालाभः। एवं भ्रमप्रमयोरपीति। स्ववृत्तित्वास्ववृत्तित्वखण्डनेनात्मनि तद्गतरूपवैकल्यानुप पत्त्या स्वव्याघातकमुत्तारमनुपलब्धिसम इति लक्षणम् इयं द्विनाम्नी अनुपलब्धिसमा विषयिधर्मसमा च ।५।१।२९।

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ।५।१।३०।

दुष्टत्वमूलसूत्रं तु—"अनुप···रहेतुः"। नानुपलब्धे स्वविषयता स्ववृत्तिता वा उपेयते। किन्तु तदात्मकत्वमात्रम्। तथा चानुपलब्धिरेव न स्यादित्ययुक्तः प्रति-षेधः। उपलम्भात्मकत्वादुपलब्धेरित्याद्युपलक्षणीयमिति न प्रत्युत्तरमिति सूत्रन्यूनत्व-मिति दिक् ।५।१।३०।

ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मम् ।५।१।३१।

तथाप्यनुपलब्ध्यादेरनुपलम्भाद्यात्मकत्वं न स्ववृत्तिता, न स्वविषयता वेत्येतदेव कथमवधार्यत इत्यत आह—"ज्ञान···दध्यात्मम्"। विकल्पो विशेषः। इदमेतदात्मकमिदं नैतदात्मकमित्यादिधीविशेषाणां भावोऽभावश्च तयोः संवेदन मध्यात्मं मानसप्रत्यक्षसिद्धम्। नात्र मानान्तरापेक्षा। चकाराद् घटादेः यथासम्भवं भावाभावसंवेदनादित्यर्थः ।५।१।३१।

[अनित्यसमप्रकरणम् ।३।१४।]

साधर्म्यात् तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः ।५।१।३२।

अनुपलब्धिसमानित्यसमयोरभावनिरूप्यतयैकरूपसङ्गत्या सूत्रम्—"साधर्म्यात् ···दनित्यसमः"। अत्र सौत्रसाधर्म्यानित्यत्वपदे आपाद्यापादकधर्ममात्रोपलक्षण परे। अन्यथा वैधर्म्येण साध्यान्तरे चैतादृशप्रत्यवस्थाने जात्यन्यरत्वापतेः। सर्व पदं चात्र विपक्षपरम्। तथा च वाद्युक्तप्रयोजकसाम्यमात्रेण विपक्षाभिमतस्य साध्यवत्त्वप्रसञ्जनमनित्यसम इति लक्षणम्। एवं च प्रवर्तते शब्दोऽनित्यः कृत-कत्वादित्युक्ते यदि घटसाधर्म्यादनित्यः, तत एव प्रमेयत्वाद्व्योमाद्यप्यनित्यं स्यात्। तथा यद्याकाशवैधर्म्यादनित्यः शब्दः, त्रैलोक्यं तर्हि तथाऽनित्यं स्यात्। एवं यदि महानससाधर्म्यादग्निमान् एवं ततस्त्रैलोक्यमग्निमद्भवेदिति। न च पक्षे साध्यं सिद्धमेवेति वाच्यम् युक्त्यसम्भवे प्रतिकूलतर्के च तात्पर्यात्। अत्र विपक्षमात्रे सपक्षत्वापादनमित्यविशेषसमातो भेदः ।५।१।३२।

साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्यात् ।५।१।३३।

दुष्टत्वमूलचिन्तासूत्रम्—'साधर्म्याद···साधर्म्यात् ।" साधर्म्यात् स्थापनायां प्रयोजकात् साध्यासिद्धिश्चेत्, तर्हि त्वदुक्तस्य प्रतिषेधस्य जातिरूपस्यासिद्धिस्तवापि स्यात् । कुतः ? प्रतिषेध्यसाधर्म्यात् । प्रतिषेध्येन स्थापनाहेतुना त्वदभिमतासाधकत्वेन प्रतिज्ञाद्यवयवयोगित्वरूपसाधर्म्यात् । तदिदं युक्त्याङ्गहीनत्वम्, व्याप्तेरनपेक्षणात् ।५।१।३३।

दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात् तस्य चोभयथाभावान्नाविशेषः ।५।१।३४।

तदङ्गत्वप्रतिपादनार्थमाह—"दृष्टान्ते···विशेषः" । दृष्टान्ते निश्चितव्याप्तिकस्य धर्मस्य हेतुत्वं तस्य चोभयथाभावः क्वचिदनुवृत्ता क्वचिद्व्यावृत्तता च । तथा च यदन्वयेन व्यतिरेकेण वा नियतं तद्गमकम् न तु त्वदुक्तरूपं व्यभिचारादिति नाविशेष इत्यर्थः । यद्वा उभयथाभावो व्याप्तत्वाव्याप्तत्वाभ्याम् ; तथा च व्याप्तमेकं नाव्याप्तं त्वदुक्तमित्यर्थः । ननु नित्यानित्यसमयोर्विभागोद्देशातिक्रमः किमर्थः ? तत्र वर्ण्यावर्ण्यवदनयोर्मिथो विपर्ययात्मकत्वभ्रमनिरासार्थं इत्येके । क्रमभावित्वाद्वाचां न्यायादेव क्रमो न तु प्रमाणादिवत्क्रमे बीजान्तरमस्तीति बोधनार्थं इत्यपरे । ननु भाष्य एव व्युत्क्रमो सूत्र इति किन्न स्यात् ? न स्यात्, सौत्राविपर्यास इति सानातन्याद्यभिधान मिति दिक् ।५।१।३४।

[नित्यसमप्रकरणम् ।२।१५।]

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः ।५।१।३५।

धर्मस्य तदतद्रूपता विकल्पे धर्मोपलब्धेः कारणत्वात् । तस्याश्च पूर्वभावित्वसङ्गत्या सूत्रम्—"नित्य···नित्यसमः" । अनित्ये शब्दादौ नित्यं सर्वदा अनित्यभावो अनित्यत्वं यतोऽतः शब्दादावनित्ये नित्यत्वोपपत्तिः सिद्धिः । जातिसमवायभिन्न धर्मनित्यत्वे धर्मिणोऽपि नित्यत्वात् । ततः प्रत्यवस्थानं नित्यसम इति वाक्यार्थः ।

वस्तुतस्तु अनित्ये अनित्यताभिमते इत्यत्र धर्मिमात्रं विवक्षितम् । नित्यत्वोपपत्तेरिति प्रसङ्गरूपतया तत्साध्यानिष्टमात्रोपदर्शनपरमिति स्वीकृतविरुद्धोपपत्तिर्विवक्षिता । तेन नित्यत्वानित्यत्वभिन्नत्वाभिन्नत्वकार्यत्वाकार्यत्वाश्रितत्वानाश्रितत्वक्षणिकत्वाक्षणिकत्वसत्त्वासत्त्वादयस्तद्विशेषा घटत्वाघटत्वादयस्तद्विशेषाः सन्दिग्धत्वासन्दिग्धत्वादयः सर्वे विकल्पाः संगृह्यन्ते । तदियमेते प्रवर्तते । शब्दोऽनित्यः कृतकत्वादित्युक्ते नित्यत्वयोगादनित्यः शब्दस्तदनित्यत्वमनित्यं नित्यं वा ? नाद्यः, तत्राशाब्दस्य नित्यतापत्तेः । नान्त्यः, धर्मनित्यतया धर्मिणोऽपि शब्दस्य नित्यतापत्तेः । धर्मिनिरपेक्षस्य धर्मस्यानवस्था । नित्यत्वमपि नित्यमनित्यं वा ? आद्येऽपि नित्यत्वान्तरयोगात्तत एव वा ? आद्येऽनुगतधीहेत्वनुगतधर्मातिक्रमे प्रथममपि नित्य-

त्वं स्यान्नेतरः आश्रयापत्तेः। नान्त्यः, उक्तोत्तरत्वादित्वाद्युन्नेयम्। बौद्धचार्वाक-वेदान्तिनां चात्रैव निर्भरः।५।१।३५।

प्रतिषेध्ये नित्यमनित्यभावादनित्येऽनित्यत्वोपपत्तेः प्रतिषेधाभावः।५।१।३६।

अत्र प्रत्युत्तरसूत्रम्—"प्रतिषेध्ये······षेधाभावः"। अनित्यतया त्वया प्रतिषेध्ये शब्दे नित्यं सर्वदा अनित्यभावान्नित्यः शब्दः प्रतिषेधस्तस्याभावः। नह्यनित्यत्वं सर्वदा नित्यत्वेऽर्थेऽपि सम्भवति। अथ सर्वदैवानित्यत्वं सिद्धं ततो हेत्वसिद्धिरित्यक्षरार्थः। तात्पर्यं तु स्वोक्तिव्यापकतया यथायथं स्वव्याघाते[तः] अनित्यत्वं च नानित्यम्। गुणादावनित्यधर्मेणास्पदे तदभावापत्तेः। न च धर्मनित्यत्वे धर्मिणो नित्यत्वम्, तयोर्भेदात्। जातिमति घटादौ व्यभिचाराच्च।५।१।३६।

[कार्यसमप्रकरणम्।२।१६।]

प्रयत्नकार्यानेकत्वात् कार्यसमः।५।१।३७।

पूर्वापरजात्योर्विकल्पे समर्थनैककार्यत्वात् सङ्गतिः। वस्तुतो वक्तव्यजात्य-न्तराभावे वक्तुश्च वक्तव्यतैव सङ्गतिः। सूत्रम्—"प्रयत्न···कार्यसमः"। अनित्यः शब्दः प्रयत्नानन्तरीयकत्वादित्युक्ते प्रयत्नकार्या उत्पत्तिरभिव्यक्तिर्वेति न ज्ञायते। उत्पत्तिरिति व्यभिचारदेशनाभासेयम्। सानातनिस्तु प्रयत्नकार्यानेकत्वादित्यनेन दृष्टान्तानेकत्वमुक्तम्। तथा च साध्यत्वेनैव हेतुना दृष्टान्तान्तरेणानिष्टापादनं कार्यसमः। यथा प्रयत्नानन्तरप्रदर्शनात् शब्दस्यानित्यत्वं साध्यते तत एवाभि-व्यक्तिरपि किन्न साध्यते? सापि प्रयत्नकार्या यत इति प्रसङ्ग इति। जयन्तास्तु पूर्वं जातिबहिर्भूता जातिः कार्यसमा। सूत्रं तु प्रयत्नकार्यस्य जातिरूपप्रत्यवस्थानस्य पूर्वजातिभिन्नस्यानेकत्वात् नाना प्रकारत्वात् प्रत्यवस्थानं कार्यसम इति योज्यमतः पूर्वजात्यन्यत्वमेव लक्षणमित्याहुः।५।१।३७।

कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः।५।१।३८।

अत्र प्रत्युत्तरसूत्रम्—"कार्यान्यत्वे···णोपपत्तेः"। कार्यान्यत्वेऽभिव्यक्तिलक्षणे प्रयत्नस्याहेतुत्वम्। कुतः? यत्रानुपलब्धिकारणस्यावरणादेरुपपत्तिर्भवति तत्र तथा। न चात्र शब्दस्यानुपलब्धिकारणं किञ्चिदस्ति येनाभिव्यक्तौ शब्दस्य प्रयत्नहेतुत्वं कल्प्येत। अन्यथा घटाद्युत्पत्तावप्येवं स्यात्।

यथा मिथो न साङ्कर्यं पार्थक्ये न च दोषता।
अनाधिक्यं च तत्सर्वं दर्शितं तर्कताण्डवे॥५।१।३८।

[षट्पक्षीरूपकथाभासप्रकरणम्।३।१७।]

प्रतिषेधेऽपि समानो दोषः।५।१।३९।

एवं गोत्वाद् गोसिद्धिवत्तत्सिद्धिरित्यादिप्रत्युत्तरसूत्रप्रणयनात् परेण जातौ प्रयुक्तायां सदुत्तरेणैवोद्धारः कर्तव्यः। तथा च कथाफलं व्यवतिष्ठते। अन्यथा च

तन्नेति प्रदर्शनार्थं कथाभासप्रकरणम्। असदुत्तरनिरूप्यत्वात् सङ्गतिः। तत्र षट्पक्षीरूपकथाभासावतारणार्थं सूत्रम्—'प्रतिषेधे···दोषः"। सदुत्तरमेव कर्तव्यमिति निर्व्यूढम्। यदि पुनर्वाद्यपि जातिवादिनं प्रत्याभासेन प्रत्यवतिष्ठते तदेदमिति शिष्यहिताय सूत्रकारः षट्पक्षीमाहेति। सूत्रार्थस्तु शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादित्यत्र जातिवादी प्रयत्नकार्याभिव्यक्तिर्भवतीत्यनैकान्तिकदेशनाभासां कार्यसमामाह। तत्र पुनर्वाद्यपि जातिसमामाह प्रयत्नानन्तरोपलब्धेरनैकान्तादिति। योऽयं दोषः स प्रतिषेधेऽपि नित्यत्वसाधके त्वत्पक्षेऽपि समानः। नित्यत्वपक्षेऽपि प्रयत्नानन्तरोपलब्धेरनैकान्तिकत्वात्। उत्पत्तेरपि संभवात्। साम्यमात्रापादनतया च जातित्वयुक्तिविशेषादेव हि जातयो भवन्तीति। अथवा प्रतिषेधेऽपि प्रतिषेधहेतोरप्यनैकान्तित्वादित्यत्र समानोऽनैकान्तिकलक्षणो दोष। नहि साऽप्यैकान्तिकः। एवं हि तथा स्याद् यदि सर्वमेव प्रतिषेध्येत। न वा किमपि। न चैवं स्वसत्ताया अनिषेधात् स्थापनाया निषेधाच्चेति शब्दसाम्येन वाक्छलमाह यद्वा तवापि पक्षे समानो दोष इति। दोषवत्साम्यार्थं कथञ्चिद्दोषमाहेति। प्रकरणार्थस्तु वादिप्रतिवाद्युभयोष्वज्ञत्वप्रतिपत्तिफलकथात्वम्, तच्च षट्पक्षीवत् त्रिचतुःपञ्चपक्षीष्वपि अस्तीति तासामपि प्रकरणान्तर्भावः षट्त्वकीर्तनं तु सम्भवप्रदर्शनार्थम् सप्तपक्ष्यादिवारणार्थञ्चेति ।५।१।३९।

सर्वत्रैवम् ।५।१।४०।

न केवलं कार्यसमायामेवैवं षट्पक्षी किन्त्वन्यत्रापीति शिष्यान् शिक्षयति सूत्रकारः—"सर्वत्रैवम्"। कश्चित्तु तृतीयकक्षायामेव नेदृक् प्रत्यवस्थानं किन्तु कक्षान्तरेऽपीति सूत्रार्थ इत्याह। यद्यपीदं सूत्रं शेषे कर्तुमर्हति तथापि विपक्ष्यादिसूचनार्थमर्द्ध [र्थं मध्य] एवोक्तम् ।५।१।४०।

प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद् दोषः ।५।१।४१।

चतुर्थं पक्षमाह—"प्रतिषेध·· ···दोषः"। प्रतिषेधो द्वितीयः पक्षस्तद्विप्रतिषेधः तृतीयः [पक्षः] तस्मिन् प्रतिषेधे दोषस्तुल्यः। सजातीयतया यथा कार्यसमे कार्यसम एव। तन्नामकतया वा यथाऽनैकान्तिकशब्दसाम्येन छलं, दोषरूपतयैव वा तुल्य इति पूर्ववदित्यर्थः ।५।१।४१।

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा ।५।१।४२।

पञ्चमपक्षमाह—"प्रतिषेधं·····मतानुज्ञा"। प्रतिषेधे द्वितीयं पक्षं सदोषं स्वीकृत्य तद्विप्रतिषेधे तृतीये पक्षे तुल्यस्य दोषस्य प्रसङ्गः। स्वतःकृतोऽयं मतानुज्ञेत्यर्थः। ।५।१।४२।

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात् समानो दोषः ।५।१।४३।

षष्ठं पक्षमाह जातिवादी—"स्वपक्ष ······दोषः" । **स्वपक्षः** स्थापनावादिन आद्यः पक्षः । **तल्लक्षणो** द्वितीयः पक्षो जात्युत्तरम् । स्वपक्षसमुत्थत्वेन स्वपक्षलक्षणीयत्वात् तस्यापेक्षा उपेक्षा अनुद्धारः । तदनन्तरमुपपत्तेः प्रतिषेधेऽपि समानो दोष इत्यस्यानित्यतो**पसंहारे** प्रतिपादनविषये यो दूषणरूपो **हेतुर्**मया चतुर्थकक्षास्थेन **निर्दिष्ट** उक्तः । तत्र दोषमनुक्त्वा त्वया पञ्चमकक्षास्थेन यो मतानुज्ञारूप उक्तो दोषः । स तवापि समानः । मतानुज्ञात्वं कुतः ? **परपक्षदोषाभ्युपगमात्** । तृतीयकक्षायां चतुर्थकक्षास्थेन मया यो दोष उक्तस्त्वया तदभ्युपगमादिति सूत्रार्थः ।५।१।४३।

उमापतिसगर्भेण श्रीविश्वधरजन्मना ।
श्रीकेशवेन व्याख्यातं पञ्चमप्रथमाह्निकम् ॥

इति प्रथमाह्निकम् ।

इति महामहोपाध्यायवेदान्तव्यासतर्काचार्यश्रीकेशवमिश्रकृते
गौतमीयसूत्र प्रकाशे पञ्चमस्याद्यमाह्निकम् ।४३।

पञ्चमोऽध्यायः

द्वितीयाह्निकम्

[प्रतिज्ञाहेत्वन्यतराश्रितनिग्रहस्थानपञ्चकविशेषलक्षणप्रकरणम् ६।१।]

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ।५।२।१।

अथ जातिविशेषलक्षणानन्तरं निग्रहस्थानविशेषलक्षणम् । यद्यपि छलजाती अपि निग्रहस्थानविशेष एव, निरनुयोज्यानुयोगप्रभेदत्वात् । तथापि निग्रहस्थानत्व-साक्षाद्व्याप्यविशेषलक्षणमाह्निकार्थः । तद्भिन्नत्वेन वा विशेषणीयम् । सप्त चेह प्रकरणानि । तत्र विभागसूत्रेण सह षड्भिः सूत्रैः प्रतिज्ञाहेत्वन्यतराविषयबुद्ध्या विषयनिग्रहस्थानपञ्चकविशेषलक्षणमाद्यप्रकरणार्थः । अन्यानि यथास्थानं वक्ष्यन्ते । तत्र कथकोद्देश्यकथाफलप्रयोजककथाहेतुयथार्थज्ञानविरहलिङ्गत्वं निग्रहस्थानत्वमिति सामान्यलक्षणं हृदि निधाय परस्परासङ्कीर्णाः निग्रहस्थानत्वव्याप्याः कत्युपाधय इति जिज्ञासायां विभागोद्देशसूत्रम्—"प्रतिज्ञाहानिः···निग्रहस्थानानि" । स्वकार्ये परस्परनैरपेक्ष्यसूचनाय वक्ष्यमाणप्रातिस्विकवैलक्षण्यसूचनाय चासमासः । जातौ च समपदावृत्तिगौरवादन्वर्थसंज्ञालाभाय च समासः । चस्त्वर्थः । तेन स्वयमुपन्यासे कथाबाह्यानामबाह्यानां वापस्मारोन्मादादिदशापन्नानां झटिति संवलनेन तिरो-हितावसराणामनधिकृतोद्भावितानां च व्यवच्छेदः । अनुक्तदृष्टान्ताभासादिसमुच्च-यार्थश्चकार इत्यन्ये ।५।२।१।

प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ।५।२।२।

लक्षणसूत्रम्—"प्रतिदृष्टान्त···प्रतिज्ञाहानिः" । अत्र प्रतिज्ञाशब्देनाजहत्स्वार्थ-लक्षणया निर्वाह्य निर्देश उपलक्ष्यते । तेन कथायां यद्यथा निर्दिश्यते तत्तथा निर्वाह-यितुमुचितमिति साध्यहानिवद् दृष्टान्तहानिरपि लभ्यते । एवं च लक्ष्यपदनिरुक्त्यैव लक्षणसिद्धौ शेषं प्रपञ्चः । अक्षरार्थः, दृष्टश्चासावन्ते निगमने व्यवस्थित इति **दृष्टान्तः** । **स्वश्चासौ दृष्टान्तश्चेति** स्वकीयः पक्ष इति यावत् । **प्रतिदृष्टान्तः** पर पक्ष इति यावत् । तथा च परपक्षस्यायं धर्मस्तं स्वपक्षेऽनुजानातीति । यथा शब्दो-ऽनित्य ऐन्द्रियकत्वादित्युक्ते सामान्येन प्रत्यवस्थाने, यदि सामान्यमैन्द्रियकं नित्यं शब्दोऽप्येवं भवत्विति प्रतिज्ञाहानिः । सा चेयं पञ्चधा पक्षसाध्यहेतुदृष्टन्ततद्विशेषण-भेदात् । यदि तु दूषणानां हेतुत्वेनाप्रयोगस्तदा तद्धानिः पृथगेव । क्रमेणोदाहरणम् ।

वाङ्मनसी अनित्ये कार्यत्वादित्युक्ते भागासिद्धया च प्रत्युक्ते अस्तु वागेवानित्येति। शब्दोऽनित्य ऐन्द्रियकत्वादित्युक्ते जात्यानैकान्तिके, अस्तु तर्हि शब्दोऽपि नित्य इति। अत्रैवास्तु तर्हि कृतकत्वादनित्य इति। शब्दोऽनित्य प्रत्यक्षगुणत्वाद् द्वयणुकवदित्युक्ते साधनवैकल्ये, अस्तु तर्हि रूपं दृष्टान्त इति। विशेषणानां हानौ, यथा विवादाध्यासितं क्षित्यादीत्यत्र वैयर्थ्ये, अस्तु तर्हि क्षित्यादीत्येवेति। बुद्धिमत्कर्तृपूर्वकत्वादित्यत्र अस्तु तर्हि कर्तृपूर्वकमिति। प्रयत्नकार्यत्वादिति हेतौ अस्तु तर्हि कार्यत्वादित्येवेति। यथा षट्द्रव्यमिति दृष्टान्ते अस्तु घट एवेति। एवं दृष्टान्ते साध्यसाधनतदुभयविशेषणहान्यापीयमिति दिक् ।५।२।२।

प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तरम् ।५।२।३।

प्रतिज्ञाहानिनिरूप्यत्वसङ्गत्या सूत्रम्—"प्रतिज्ञाता......प्रतिज्ञान्तरम्"। प्रतिज्ञातार्थे दूषिते तत्प्रतिचिकीर्षया विशेषणान्तरप्रक्षेपेण पुनर्वचनं प्रतिज्ञान्तरम्। तथाहि विकल्पो विशेषस्तस्य स्वज्ञानद्वारा निर्देशे हेतुत्वं, ज्ञानमेव वा विकल्पः। ल्यब्लोपे वा पञ्चमी। धर्मविशेषं प्रक्षिप्येत्यर्थात्। तदर्थस्य प्रतिज्ञातार्थस्य निर्देऽशोभिधानम् पूर्वदोषोद्धाराय साध्यसिद्ध्यर्थं वा। तेन परोक्तदूषणोद्धाराय पूर्वानुक्तविशेषणवतः पूर्वोक्तसाधनीयांशस्य प्रतिपादनम् प्रतिज्ञान्तरमिति लक्षणनिष्कर्षः। तदेतत् पक्षान्तरसाध्यान्तरतदुभयविशेषणोक्तिभेदाच्चतुर्विधम्। क्रमेणोदाहरणम्। वर्णा नित्याः श्रावणत्वादित्यत्र ध्वनिभिरनैकान्ते सध्वनयो वर्णा नित्या इति। वह्निमान् सुरभिधूमादित्यत्र वैयर्थ्ये, साग्नि[?]कृष्णागुरुप्रभवाग्निमानिति। शब्दोऽनित्यः कार्यत्वादित्यत्र ध्वनिभिर्भागसिद्धसाधने वर्णात्मकः शब्द इति। क्षित्यादिकं कर्तृपूर्वकमित्यत्र सिद्धसाधने अदृष्टद्वारककृतिपूर्वकमिति। इदं प्रतिज्ञामाश्रित्य। हेतौ पुनर्वचनं हेत्वन्तरं वक्ष्यते। अशक्तिविशेषोन्नायकतया चानयोर्भेदः ।५।२।३।

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ।५।२।४।

पूर्ववत्सङ्गतिः। सूत्रम्—"प्रतिज्ञा · विरोधः"। प्रतिज्ञाहेत्वोरिति पदं विरोधप्रतियोगिद्वयपरम्। तेनोक्तव्याघातो विरोध इति लक्षणम्। उदाहरणम्, अजा गर्भिणीत्यादि। विरुद्धबाधयोर्हेत्वाभासयोर्गतमिति चेत्, न। हेत्वाभासो वस्तुगतिमनुरुध्य अयन्तु अभ्युपगममात्रमिति विशेषात्। ननु यावज्जीवमहं मौनीत्यत्र का गतिः? अत्रापि अहं मौनीत्यनेनोच्चारयितृत्वाभ्युपगमात् अनभ्युपगमे वा स्वयमेवाप्रतिभादस्वीकारात्। स चायमनेकविधः प्रतिज्ञापदयोः प्रतिज्ञाहेत्वोः प्रतिज्ञोदाहरणयोः प्रतिज्ञानिगमनयोः। हेतुपदयोः हेतुदृष्टान्तयोः दृष्टान्तपदयोः प्रतिज्ञातर्कयोः। एवं दूषणेऽपि ।५।२।४।

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः ।५।२।५।

पूर्ववत्सङ्गतिः। सूत्रम्—"पक्ष......सन्न्यासः"। अत्र पक्षप्रतिज्ञापदयोरुक्तनिर्वाह्योपलक्षणत्वम्। तेन हेत्वादिसन्न्यासोपग्रहः। प्रतिषेधपदेन दोषपरिजिहीर्षामूलत्वं लभ्यते। **अपनयनम**पलापः, वाद्यादिनिश्चितेऽपि व्यतिरेकज्ञानानुकूलो व्यापारः।

ननु सन्न्यासं सन्न्यासान्तरेण परिहरतः किमुत्तरम् ? सन्न्यासान्तरमेवेति गृहाण । अनवस्थाप्रसङ्गस्तवापि तुल्यः । सोऽयं पञ्चविधः प्रतिपादनापलापात् । यथा क एवमाहेति प्रकारापलापाद्वा । यथा परपक्षोऽयं मयोक्त इति स्ववचने परकर्तृकत्वसञ्चाराद्वा । यथा त्वयैवेदमुक्तमिति परोक्ते स्वकर्तृकत्वसञ्चारात्, यथा परोक्तमेव मयेदमुक्तमिति । पञ्चमस्तु यथाऽनुक्त एव मयेदमुक्तमिति । पञ्चविधोऽप्ययं विशेषणादिसंक्रमाद् बहुप्रकार इति दिक् ।५।२।५।

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ५।२।६।

हेतुसन्न्यासस्य पूर्वेण संग्रहादस्य तु हेतुनिरूप्यत्वसङ्गत्या सूत्रम्—"अविशेषोक्ते ·····हेत्वन्तरम्" । अत्र हेतुपदं वाक्यगतसाधकभागपरम् । विशेषमिच्छत इतीच्छाजन्यं वचनपर्यन्तमभिप्रेतम् । तेनोक्तस्य साधकस्य स्वावसरेऽनुक्तोपरञ्जकवत्तयाभिधानं हेत्वन्तरमिति लक्षणम् । उपरञ्जकत्वं च विशेषणविशेष्यसाधारणम् । तदिदं चतुर्विधम्, हेतुविशेषणात् उदाहरणप्रयोजकभागविशेषणात् उपनयनविशेषणात् दूषणविशेषणाच्च । इदं चानैकान्तिकादिहेतुत्वेन न प्रयुज्यत इत्यभिप्रेत्य गोवृषन्यायाद्वा । तत्राद्यं, यथा शब्दोऽनित्य अस्मदादिबाह्यकरणप्रत्यक्षत्वादित्युक्ते अनैकान्तिके सामान्यवत्त्वे सतीति विशेषणात् । द्वितीयं, यथा तत्रैव समस्ते हेतौ तच्छून्योदाहरणे प्रयोजकभागन्यूनतया······ सतीति विशेषणात् । तृतीयं, यथा तत्रैव हेतावुपनये तद्भागादानेन व्याप्येत्यस्यासिद्धौ तद्विशिष्टकरणात् । चतुर्थं, यथा हेतौ प्रयुक्तेऽसाधकोऽयं सपक्षसत्वात् प्रमेयत्ववदिति प्रत्युक्ते स्वव्याघातकत्वेन जात्युत्तरतया परिहृतौ विपक्षगतत्वे सतीति विशेषणादिति । एवं दोषान्तरेऽपीति ।५।२।६।

[निग्रहस्थानचतुष्कलक्षणप्रकरणम् ।४।२।]

प्रकृतादर्थादप्रतिसंबद्धार्थमर्थान्तरम् ।५।२।७।

सम्प्रति प्रकृतोपयोगिवाक्यार्थप्रतिपत्तिफलशून्यनिग्रहस्थानचतुष्कलक्षणप्रकरणम् । पूर्वापेक्षया हेतुहेतुमद्भावोऽवान्तरसङ्गतिः । अस्य प्रकृतोपयोगव्यतिरेकज्ञापकतया तद्व्युत्पादकपूर्वापेक्षत्वात् सूत्रम्—"प्रकृता······मर्थान्तरम्" । पञ्चमी चात्रान्यदिति पदाध्याहारात् लक्ष्यपदावृत्त्या वा पञ्चमी । अन्यत्वादिति सूत्रादत्रान्तरपदस्यान्यपर्यायित्वादिति । ल्यप्लोपे वा पञ्चमी । प्रकृतमर्थमनपेक्ष्येत्यर्थः । ल्यबर्थे पञ्चमी शक्तैवेति दिक् । अत्र वचनं विशेष्यम् अप्रतिसंबन्धोऽननुरूपसंबन्धो अर्थो यस्येति बहुव्रीहौ वचनस्यान्यपदार्थस्यान्यार्थपदसमन्विततयोपस्थितिः । तथा च प्रकृतादन्याभिधानमर्थान्तरम् । तच्चतुर्विधम् । स्वमतरूपपरमतरूपोभयरूपानुभयरूपभेदात् क्रमेण यथा शब्दोऽनित्य इति सदसत्प्रयोगे गुणश्च शब्दः स चाकाशस्य तदेवोपलब्धिभेदाच्छ्रोत्रम् तेन चायं गृह्यते समवायादित्यादि । तथैवोपक्रम्य शब्दो द्रव्यसंयोगग्राह्योऽनित्यश्चेत्यादि तथैवोपक्रम्य अनुमानगम्यमस्यानित्यत्वम् । अनुमानञ्च प्रमाणं तच्च चतुर्विधम् षड्विधञ्च किञ्चित्सत्तामात्रेण गमयति किञ्चिच्च ज्ञातं सदित्यादि । तथैवोपक्रम्य

हेतुरयम्। हेतुश्च हिनोतेर्धातोस्तुनिप्रत्यये कृते कृदन्तं पदम्। पदं च चतुर्विधं नामाख्यातोपसर्गनिपातभेदादित्यादि स्वदोषे सत्यसति वा ज्ञाते तत्तिरोधित्सया झटिति समाधानमपश्यत एतदुक्तिसम्भवः। न्यूनादिसंभेदेऽप्युच्यमानग्राह्यतयैतदेवोद्भाव्यमिति संक्षेपः ।५।२।७।

वर्णक्रमनिर्देशवन्निरर्थकम् ।५।२।८।

अर्थनिरूप्यत्वसंगत्या सूत्रम्—"वर्ण······निरर्थकम्"। वतिरत्नावाचकत्वात्मकसादृश्ये। तेनावाचकपदप्रयोगो निरर्थकमिति सूत्रार्थः। यद्वा उभयवादिगृहीत इति पदान्यपदप्रयोगो निरर्थकम्। अतो न वाच्यविकल्पावकाशः। व्याकरणादेः साधारणसङ्केतग्राहकतया तत्सङ्केतमतेरेव कथायामधिकारात्। शक्तिपदस्थाने वृत्तिपदं वा। वादिनोरेकदेशीयत्वे भाषायामपि न दोषः। परप्रतिपत्तेर्ज्ञातत्वात्। त्रिधा चास्यप्रयोगसंभवः। सभाक्षोभेण प्रमादात्। यथाऽत्यन्तप्रसिद्धलिङ्गवचनविभक्तीनामन्यथा प्रयोगात्। तथा वाचकत्वाभिमानात्। यथा वैयाकरणरूपमात्रवेद्यतया मन्दप्रसिद्धीनां कृत्तद्धितसमासाख्यातानां प्रयोगात् क्वचिदभ्यासात्। यथा संस्कृतमुपक्रम्यापभ्रंशवचनात्। नन्वर्थप्रतीतेरविशेषात् कथमपभ्रंशलिङ्गादिविपर्यासानां दोषत्वम्। मैवं यत्र कथातः पूर्वं वाचकैरेव वक्तव्यमिति समयः क्रियते। तत्र तमतिक्रम्य वदतः कथं न निग्रहः ।५।२।८।

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ।५।२।९।

निरर्थकवचनस्यार्थनिरूप्यत्वादस्य च सार्थकत्वेन पूर्वव्यावृत्तेः सङ्गत्या सूत्रम्—"परिषत् · मविज्ञातार्थम्"। वादिना त्रिरभिहितमपि परिषत्प्रतिवादिभ्यामर्थवत्त्वेनाविज्ञातं वचनमविज्ञातार्थम्। **त्रिरिति** यावता परिषदोऽभिधानाकाङ्क्षा निवर्तते तावत्परम्। **प्रतिवादिनेति** प्रतिवादिबोधे परिषन्नावगच्छतीत्यसम्भावितमेवेत्येतन्मात्रपरम्। तेनाविकलावहितपरिषत्प्रकृतार्थान्वयबोधानुकूलार्थोपस्थित्यजनकवाचकपदप्रयोगोऽविज्ञातार्थ[म्]इति लक्षणम्। अर्थाश्रावणे [वधारणे] अयं दूषयिष्यतीति भयात् अस्य च ज्ञानं पतिष्यतीति व्यामोहात् सभाक्षोभाद्वाऽस्योक्तिसम्भवः। तच्च त्रिविधम्, स्वकीयतन्त्रमात्रसिद्धम् दुर्बोधयोगमनापेक्षरूढिकम् पदप्रविवेकोपायप्रकरणाद्यपायादापादितसंशयाश्लिष्टपदप्रयोगं च।

तत्राद्यं यथा, पञ्चस्कन्धाः, द्वादशायतनानि चतुरार्यसत्यादि **बौद्धानाम्**। अर्थपीलुभावादि **वैशेषिकाणाम्**। द्वितीयं यथा, पर्वतोऽग्निमान् धूमवत्त्वात् महानसवदिति वक्तव्ये कश्यपतनयाधृतिहेतुरयं त्रिनयनतनययानसमाननामधेयवान् तत्केतनवत्त्वात् बिसिनीवदित्यादि। तृतीयं यथा, श्वेतो धावतीति। तत्राद्यं सर्वमज्ञानशौटीर्यादुभयानुमत्या क्वचिदुपादीयेतापि। शेषद्वन्द्वं [द्वयं]त्वनादेयमेवेति दिक्।

ननु परिषदपि जडा भवेदिति कथमेवमिति चेत्, न। लोकप्रसिद्धं सुबोधयोगं प्रकरणाद्यापन्नं [विषयवद्] द्रुतोच्चरितं हि पदजातं बोधकम्। तद्विपरीतमुपाददानो

निग्राह्य एव। ननु त्रिरिति कथम् ? इत्थम्, परिषदोऽनवधानादप्यबोधे कथमन्यापराधेनान्यनिग्रह इति द्वितीयम्। तत्रापि मन्दप्रसिद्धीनि योग्यतादिविधुराणि पदानि कथं बोधयन्त्विति तदवधारणाय तृतीयमभिधानमिति दिक्। तथैव वा सम्प्रदायादित्यन्ये ।५।२।९।

पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम् ।५।२।१०।

अर्थनिरूप्याविज्ञातार्थनिरूपणानन्तरमर्थव्यतिरेकनिरूप्यापार्थकलक्षणमिति "सङ्गत्या सूत्रम्—"पौर्वापर्या…मपार्थकम्"। पौर्वापर्यं विशेषणविशेष्यभावः। पदार्थानां परस्परमन्वयतः तज्ज्ञानयोः कार्यकारणभावेन पौर्वापर्यादर्थेऽपि तत्त्वमुपचर्यते। तस्य तेन वा **अयोगो**ऽनन्वयः। स चाकाङ्क्षादिविरहस्तस्मात्। **अप्रतिसंबद्धार्थम**नन्वितार्थं पदजातं वाक्यजातं वा अपार्थकमिति सूत्रार्थः।

वस्तुतः पौर्वापर्यायोगादिति विशेषो न विवक्षितः। अनाकाङ्क्षितत्वात्। अनन्वितार्थत्वेनैव सर्वसंग्रहात्। लक्षणं तु यत्काले यत्रैकवाक्यताप्रयोजकरूपाभावस्तत्काले तदपार्थकमिति। तद् द्वेधा पदापार्थकं वाक्यार्थापार्थकं च। तदपि प्रत्येकं त्रिधा अनाकाङ्क्षतया अयोग्यतया अनासत्त्या च। आद्यं मुख्यं सदैवान्वयबोधाभावात्। यथा कुण्डमजाजिनं पललपिण्डः गौर इत्यादि। द्वितीयम् अग्निरनुष्ण इत्यादि। तृतीयं गच्छति पयसाऽश्वेन भुक्त्वा नगरं चैत्र इत्यादि। वाक्यापार्थकं यथा दश दाडिमानि षडपूपा…… ………… मृद्धस्तेन सिञ्चेत्ययोग्यतातः। चैत्रमैत्राभ्यां गिरिर्भुक्तमग्निमामिति। अत्र सभाक्षोभादबोधात् परस्याज्ञानमुद्भावयिष्यामीति व्यामोहाद्वा अस्योक्तिसम्भवः। विरुद्धसङ्करेऽपि तस्योपजीव्यत्वात् पार्थक्यम्। ५।२।१०।

[निग्रहस्थानत्रिकलक्षणप्रकरणम् ।३।३।]

अवयवविपर्यासोऽप्राप्तकालम् ।५।२।११

अथ सिद्धान्तनिरूप्यनिग्रहस्थानत्रिकलक्षणप्रकरणम्। तत्रापि कथञ्चिदनन्वयादपार्थकाद् भेदयितुं तदवान्तरसूत्रम्—"अवयव…कालम्"। **अत्रावयव**शब्दः समस्तकथाभागपरः प्रकरणादसङ्कोचाच्च। **विपर्यासो** व्युत्क्रमः। तथा च कथायां कथाप्रयोजकीभूतसमयविषयाभिधानक्रमव्युत्क्रमोऽप्राप्तकालमिति लक्षणम्। सभ्याकाङ्क्षितक्रमविपर्यासो वा। सङ्करेऽप्यस्योपजीव्यत्वात् पार्थक्यम्। तदिदं चतुर्विधम्, पादपादांशावयवतदंशविपर्यासभेदात्। तथा हि वादिना हेतुप्रयोगः कर्तव्यः। ततः कण्टकोद्धारश्च कर्तव्य इति कथायाः प्रथमः पादः। ततः प्रतिवादिना तस्योपालम्भो दूषणदानात्मा द्वितीयः पादः। ततस्तेन स्वपक्षे हेतुप्रयोगं पश्चादुपालम्भं करोति तदा पादविपर्यासः। वादी च यदि प्रथमं कण्टकोद्धारं पश्चाद् हेतुप्रयोगं करोति तदा पादांशविपर्यासः। अवयवविपर्यासस्तु प्रसिद्ध एव। तदंशविपर्यासो यथा सकर्तृकं विवादाध्यासितमिति। विपर्यासेऽन्वयबोधेऽपि शास्त्रोक्तक्रमस्यैव बोधकत्वाभ्युपगमेनास्यावश्यं निग्रहत्वादिति ।५।२।११।

हीनमन्यतमेनाप्यवयवेन न्यूनम् ।५।२।१२।

पूर्वस्यैवास्याप्यवयवनिरूप्यत्वसङ्गत्या सूत्रम्—"हीन···न्यूनम्"। अत्र सूत्रेऽपि शब्दो वर्णमात्रास्वनन्यूनत्वस्यानुक्तस्य समुच्चयार्थः। कथाभागान्तरसंग्रहार्थं इत्यन्ये। सामग्र्यधीनस्य कार्यस्यैकदेशादनिष्पत्तेः। ननु न्यूनपदयोरेकं विशेष्यम्। तच्च प्रकरणाद् वचनमेव।

ननु न्यूनाधिकावयवाङ्गीकर्त्रोः कथा विलीयेत। न्यूनत्वेनैव निग्रहात्। न्यूनत्वमददानः पर्यनुयोज्य अ[उ]पेक्षेत। न्यूनत्वभयात् पञ्चावयवं कुर्वाणोऽसाधनाङ्गवचनेन निगृह्येत। तदङ्गत्वाङ्गीकारे विरोधापसिद्धान्ताभ्यां निगृह्येत। तथा चावयवान्तरानङ्गता बौद्धैः स्थाप्या नैयायिकादीनां चाङ्गतेति पुरुषायुषपर्यवसानमिति चेत्, मैवम्। स्वसिद्धान्ते वक्तव्यत्वाभ्युपगतकथाभागानभिधानस्य न्यूनत्वेन विवक्षितत्वात्। तमपल्लवादिकमादाय [?] अविवक्षित एवेति दिक् ।५।२।१२।

हेतूदाहरणाधिकमधिकम् ।५।२।१३।

पूर्ववत् सङ्गत्या सूत्रम्—"हेतु···मधिकम्"। अत्र हेतूदाहरणत्वं न विवक्षितम्। अन्यथा सङ्कोचापत्तेः। तेनार्थवादाधिकदूषणाधिकयोरपि संग्रहः। पदद्वयोपादानं तु अवयवान्तरेऽधिकं सङ्कीर्णं नास्तीति ख्यापनार्थम्। तच्च यथा तथोक्तमन्यत्र। सूत्रे व्यवहर्तव्यमित्यध्याहारान्न साध्याविशेषः। तथा चापुनरुक्तकृतकर्तव्यताभिधानमधिकमिति लक्षणम्। तदिदं द्वेधा। स्वशब्देन विशेषतः, आदिशब्देन सामान्यतः। परिषदाद्यनाकाङ्क्षितवचनत्वेनास्य निग्रहस्थानता। तदाकाङ्क्षायां क्रियत एव हेतुद्वयादि। स्फुटो दृढश्चायमर्थो भवत्विति व्यामोहादस्योक्तिसम्भवः। यस्य यावानवयवः स्वशास्त्रोक्तस्तस्य तदधिकरणेऽधिकम्। प्रतिज्ञाधिकमपि क्वचित्। यथा वायुः प्रत्यक्षो द्रव्यत्वादित्युक्ते, कालादिना च व्यभिचार उद्भाविते, व्यभिचारनिर्वाहार्थं काल आकाशो वा न प्रत्यक्षो नीरूपद्रव्यत्वादित्यत्र प्रतिज्ञाधिकं भवत्येव। एकत्रैव तत्सिद्धावनैकान्तिकनिर्वाहात्। धूमादालोकाच्चेति हेत्वधिकम्। चत्वरवन्महानसवच्चेति दृष्टान्ताधिकम्। एवं दूषणाधिकादावपीति दिक् ।५।२।१३।

[पुनरुक्तनिग्रहस्थानप्रकरणम् ।२।४।]

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ।५।२।१४।

अधिकस्येव पुनरुक्तस्यापि उक्तिनिरूप्यत्वात् तदनन्तरं पुनरुक्तलक्षणप्रकरणम्। सूत्रम्—"शब्दार्थयोः···नुवादात्"। **पुनरुक्तमिति** लक्ष्यनिर्देशः। **पुनर्वचनमिति** लक्षणम्। **शब्दार्थयोरिति** शब्दपुनरुक्तमर्थपुनरुक्तं वेति विभागस्फोरणाय। तत्राद्यमेकार्थपरस्यैकस्यैव शब्दस्य तत्पर्यायस्य वा पुनरभिधानम्। यथा शब्दोऽनित्योऽनित्य इति। यथा वा शब्दो अनित्य इत्युक्त्वा निरोधधर्मकोध्वनिरिति अनुवादातिव्याप्तिवारणायाह **अन्यत्रानुवादादिति** ।५।२।१४।

अर्थादापन्नस्य स्वशब्देन पुनर्वचनम् ।५।२।१५।

प्रतिपादितस्य तत्प्रतिपादनानधिकप्रयोजनकं प्रतिपादनं पुनरुक्तमिति सामान्यलक्षणं हृदि निधायार्थपुनरुक्तलक्षणसूत्रम्—"अर्थादा…वचनम्" । पुनरुक्तमिति प्रकृतम् । नात्र **पुनः शब्द** उक्तेर्व्यावृत्तिमाह किन्तु प्रतिपत्तेः । तथा च प्रतिपन्नस्योक्त्या पुनः प्रतिपादनमर्थपुनरुक्तमित्यर्थः । यद्यपि **वचनशब्दो**ऽस्त्येवेति कुतो नोक्त्यावृत्तिः । तथाप्युच्यते अनेनेति व्युत्पत्त्या वागनुकूलं ज्ञानमेव वचनं प्रकृते । **अर्थादापन्नस्य** अर्थगत्या प्रतीतस्येत्यर्थः । तच्चानेकधा पूर्वपदाक्षिप्तोक्तिर्यथा अग्निनोष्णेन युक्तः पर्वत इति । उत्तरपदाक्षिप्तोक्तिर्यथोष्णेनाग्निनेति वाक्येऽपि । विध्याक्षिप्तनिषेधोक्तिर्यथा बहिरस्तीत्युक्त्वा गृहे नास्तीति । निषेधाक्षिप्तविध्युक्तिर्यथा विपरीतमिदमेव ।५।२।१५।

[निग्रहस्थानचतुष्कलक्षणप्रकरणम् ४।५।]

विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् ।५।२।१६।

अथ वचननिरूप्यत्वात् तदुत्तरविरोधिनिग्रहस्थानचतुष्कलक्षणप्रकरणम् । सूत्रम्——"विज्ञातस्य……मननुभाषणम्" । **परिषदेति** स्थेयमात्रोपलक्षणम् तेन तदेकदेशाववुद्धाननुभाषणे एकस्थेयककथाऽननुभाषणयोः संग्रहः । विज्ञातस्य वाक्यार्थस्य परिषदेति कर्तृनिर्देशात् प्रतिवादिनोज्ञानमविवक्षितमिति दर्शितम् **त्रिरिति** यावताभिधानेन प्रतिवाद्युच्चारणयोग्यता स्वाबोधानाविष्करणं तावद्वारमभिहितस्येत्येतत्परं तदाविष्कारे त्वज्ञानम् । अभिधानं च स्थेयेन वादिना वा । अप्रत्युच्चारणमप्रतिपादनम् । तदयमर्थः, वादिनोक्तस्य परिषदाऽवबुद्धस्य पुनर्वादिना परिषदा वाऽनूदितस्य योग्येन सुस्थेनानवबोधमाविष्कुर्वता कथामविच्छिन्दता अप्रत्युच्चारणमननुभाषणम् । अत्रावबुद्धस्येत्यनेनाविज्ञातार्थस्यानवबोधमित्यनेनाज्ञानस्य कथामित्यनेन विक्षेपस्य व्युदासः । प्रत्युच्चारणहेतुः मनः पाटवं योग्यता स्वास्थ्यञ्च तादृशरोगाद्यभावः । तथा चानुवादयोग्यकाले तद्विरोधी व्यापारो अननुभाषणमिति लक्षणम् । तेन स्तम्भस्य एकदेशाधिकप्रत्युच्चारणयोग्यसंग्रहः । शरीरेन्द्रियावस्थाविशेषस्याद्ये समीचीनप्रत्युच्चारणविरोधिव्यापारस्य तत्रापि सत्त्वात् । तदेतत्पञ्चधा तदित्यादि सर्वनाम्नार्थ [नु] वादेन वा, एकदेशानुवादेन वा विपरीतानुवादेन वा, केवलदूषणोक्त्या वा, स्तम्भेन वेति दिक् ।५।२।१६।

अविज्ञातं चाज्ञानम् ।५।२।१७।

ज्ञानाभावनिरूप्यत्वसङ्गत्या सूत्रम्—"अविज्ञातं चाज्ञानम्" । **अविज्ञातमिति** भावे क्तः । अविज्ञातं यस्य तस्य ज्ञानमिति न साध्यावैशिष्ट्यम् । परिषदा विज्ञातस्येत्याद्यनुकर्षणार्थश्**चकारः** । तेन परिषद्बुद्ध्यनूदितमपि वादिवाक्यं प्रतिवादी न जानाति तदाऽज्ञानम् । तथा च कथायां प्रकृतविषये स्वज्ञानाविष्करणमज्ञानमिति लक्षणम् । आविष्करणं च न जानामि किमनेनोक्तमित्यभिधानादेः, भ्रान्तोऽहमस्मिन्, विषये विपरीतं मे ज्ञानमित्यादेर्वा इति ।५।२।१७।

उत्तरस्याप्रतिपत्तिरप्रतिभा ।५।२।१८।

पूर्ववत्सङ्गत्या[सूत्रम्]—"उत्तरस्या·····प्रतिभा"। अत्राप्रतिपत्तिपदेन तदुन्नायकः कथकव्यापारोऽभिधीयते। तथा चोत्तरावसरे तद्विषयाज्ञानोन्नायकः कथकव्यापारोऽप्रतिभेति लक्षणम्। ···अनुवादानन्तरमेतदवसरः। तदा चावहितायां परिषदि वादिनि च श्रोतुकामे प्रत्युत्तरमददानः सर्वथा प्रतिवादी निगृह्यते। सूत्रे चोत्तरग्रहणमविवक्षितम्। तत एव प्रथमकक्षायामपि सेति वृद्धाः। ५।२।१८।

कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः ।५।२।१९।

अप्रतिभावद् विक्षेपस्यापि कथानिरूप्यत्वात् ततो[ऽनन्तरं विक्षेपलक्षण] सूत्रम्—"कार्य···विक्षेपः"। व्याजेन कथाविच्छेदानुकूलो व्यापारः विक्षेप इत्यर्थः। कथावसरे [कार्यव्यासङ्गात् कार्यव्यासङ्गमुद्भाव्येत्यर्थः। कथायाः विच्छेदो भङ्गः विक्षेप इत्यक्षरार्थः। यद्यपि कालान्तरे उत्तरं दास्यामीति वचनेन वादिनः सर्वथानभिज्ञता न सूचिता पुनरवसरेऽपेक्षितस्योत्तरस्य सम्भाव्यमानत्वात्। तथापि कालान्तरे सतोऽसतो वा उत्तरस्य वचनेऽपि कथान्तरमेव तत् स्यात्। पूर्वा तु कथा कार्यव्यासक्त्या उत्तरादानादेव विच्छिन्ना। कथाविच्छेदस्य चैकतरनिग्रहमूलकत्वादित्यर्थः।] ५।२।१९।

[मतानुज्ञादिनिग्रहस्थानलक्षणप्रकरणम् ।३।६]

स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा ।५।२।२०।

अथ कथानिरूप्यकाभ्युपगमनिरूप्यसङ्गत्या दोषनिरूप्यमतानुज्ञादिनिग्रहस्थानत्रिकलक्षणप्रकरणम्। सूत्रम्—"स्वपक्षे···मतानुज्ञा"। स्वपक्षे परेण दत्तस्य दोषस्यानुद्धारादनुमेयादभ्युपगमादिष्टापत्तेः परपक्षे दोषप्रसङ्गो मतानुज्ञेत्यर्थः। उदाहरणम्, भवाँश्चौरः पुरुषत्वादित्युक्ते भवानपि चौरस्तत एवेत्युत्तरम्। अत्र हि परोक्तं स्वदोषमनुद्धृत्याभ्युपगम्य च परस्य प्रसञ्जयति। अनभ्युपगमे हि कथं पुरुषत्वं हेतुमुपाददीत। यथा चासङ्करजात्यनन्तर्भावौ तथा प्रपञ्चितं तर्कताण्डवे।

जयन्तस्तु प्रसङ्गाभासमात्रं मतानुज्ञा। तेनात्माश्रयान्योन्याश्रयचक्रकानवस्थाभासानां शिथिलमूलविपर्ययापर्यवसितेष्टापादनमिथोविरुद्धार्थानाञ्च तर्काभासानां संग्रहः। नहि तेषामन्यत्रान्तर्भाव इत्याह। ५।२।२०।

निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् ।५।२।२१।

मतानुज्ञाया उद्भावननिरूप्यत्वात् तदनन्तरमनुद्भावननिरूप्यनिग्रहस्थानमिति सङ्गत्या सूत्रम्—"निग्रह···पेक्षणम्"। निग्रहस्थानप्राप्तस्य पतितनिग्रहस्थानस्य अनिग्रहः अवश्योद्भाव्यनिग्रहस्थानानुद्भावनं तदित्यर्थः। तथा च निग्रहस्थानोद्भावनावसरत्वेनाभ्युपेते काले पतितोद्भावनार्हे तदनुद्भावनं पर्यनुयोज्योपेक्षणमिति लक्षणम्। निग्रहस्थानान्तरप्राप्ताविदम्। तेन पर्यनुयोज्योपेक्षणरूपनिग्रहस्थानप्राप्तौ तदुपेक्षणस्य वादिनोद्भावनानर्हत्वात् न निग्रहस्थानत्वम्। अन्यथैकस्यास्मिन्नापतिते सभ्यैकोद्भाव्यस्यापरेणाप्यनुद्भावने तस्यापि तदापत्तौ तस्यापि पूर्ववदुपेक्षणेऽन्यतरादिनिग्रहस्थानत्वमशक्यावधारणं स्यादिति दिक्। अत्र चानुक्तो-

च्यमानोक्तग्राह्याणामाभासानाञ्च चतुर्णामपि वर्गाणां पातेऽनुक्तग्राह्यादिकमेव प्राथमिकत्वात् प्राप्तोद्भावनावसरम्। अतस्तस्यैवानुद्भावने पर्यनुयोज्योपेक्षणमिति ध्येयम्। वादे च वादिभूयस्त्वे च वादिनाप्युद्भाव्यम्। दोषान्तरन्तु न मध्यस्थोद्भाव्यमिति दिक्।५।२।२१।

अनिग्रहस्थाने निग्रहस्थानानुयोगो निरनुयोज्यानुयोगः २।२।२२

अनिग्रहस्थाने अनापतितनिग्रहस्थाने वादिनि निग्रहस्थानाभियोगो दोषत्वेन तदुद्भावनम्। यद्वा पर्युदासनञा निग्रहथानभिन्ने विषये निग्रहस्थानत्वेनोद्भावनं निरनुयोज्यानुयोग इत्यर्थः।

वस्तुतस्तु अनुयोगानर्हस्यानुयोगो निरनुयोज्यानुयोगः। सोऽयं चतुर्द्धा आभासानवसरग्रहणछलजातिभेदात्। आद्योऽपि द्वेधा अनिग्रहे निग्रहाभियोगो वा निग्रहे निग्रहान्तराभियोगो वा। आद्यो यथा अनेककल्पसम्भवे अनिष्टकल्पत्यागे प्रतिज्ञाहानिरित्यादि। द्वितीयो यथा प्रतिज्ञाहान्यादौ प्रतिज्ञान्तरादि। छलेत्यादिरपि सामान्यतो विशेषतश्चेति। अनवसरग्रहणं तु अवसरमप्राप्यातिक्रम्य वा ग्रहणम्। अनुक्तोच्यमानोक्तग्राह्येषु यथायथं छलजाती प्रोक्ते।५।२।२२।

[कथकान्योक्तिनिरूप्यनिग्रहस्थानद्वयप्रकरणम्।२।७।]

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः २।२।२३।

हेत्वाभासानां कथावसानिकत्वेन शेषे तदभिधानस्य न्यायप्राप्तत्वात् सङ्गतिः। कथकान्योक्तिनिरूप्यनिग्रहस्थानद्वयलक्षणं प्रकरणादिसंज्ञितहेत्वाभासयोः शास्त्रकारोक्ताभ्यां निरूपणात् सूत्रम्—"सिद्धान्त···अपसिद्धान्तः"। सिद्धान्तमभ्युपेत्यानियमात् परिगृहीतसिद्धान्तातिक्रमात् प्रसङ्गः प्रसञ्जनं वर्तते। तेन परिगृहीतसिद्धान्तविरुद्धार्थाभ्युपगमोऽपसिद्धान्तः। यथा साङ्ख्यस्य सत्कार्यवादमभ्युपेत्य सदुत्पद्यते इत्यभिधानम्। यद्यप्यत्रापि साङ्ख्योऽहमित्यादि प्राथमिकस्ववचनविरोध एव। तथापि नासदुत्पद्यत इत्यादि साङ्ख्यमतमित्येतस्यास्फुरणे स्ववचन······तीत्युपजीव्यत्वादावश्यकत्वाच्च आश्रितमतविरोध एवात्र दोष इति दिक्। उक्तिसम्भवस्त्वस्यास्फुरणदशायामस्मन्मतानभिज्ञोऽयमिति वा अवज्ञानाद्वा अन्यथा व्याख्यास्यामीति शौटीर्याद्वा। एकदेशिमतं तदिति वैजात्याद्वा साक्षान्नोक्तमिति व्यामोहाद्वेति।५।२।२३।

हेत्वाभासश्च यथोक्ताः।५।२।२४

सूत्रम्—"हेत्वाभासाश्च यथोक्ताः"। **हेत्वाभासाः यथा** येन प्रकारेण **उक्ताः** लक्षितास्तथैव तेनैव रूपेण निग्रहस्थानानि। तथा च येन रूपेणासिद्धत्वादिना तेषां हेतुदूषकत्वं तदेवरूपं पुरस्कृत्य हेत्वाभासप्रयोक्तृतया कथकाशक्त्युन्नयनमपीति सूत्रार्थः। तथैव परीक्षिता इति चात्र दोषो देय इत्येके। अनुक्तसमुच्चयार्थश्चकारः। तेन साध्यविकलानुपदर्शितान्वयविपरीतपदानुपदर्शितान्वयानुपदर्शितव्यतिरेकविपरीतोपदर्शितव्यतिरेकादयः, आत्माश्रयान्योन्याश्रयचक्रकानवस्थादयश्चोद्भावनप्रकारा संगृहीता भवन्ति। चतुर्द्धा निग्रहस्थानगतिः। वादे किञ्चिदसम्भावनीयमेव। यथा प्रतिज्ञाहानिः प्रतिज्ञासन्न्यासो निरर्थकमर्थान्तरमविज्ञातार्थमपार्थकं

चेति षट्कम् । स्वाशक्तिनिगूहनार्थं न सम्भवतीति तात्पर्यम् । किञ्चत् सदप्यनुद्भाव्यम् । यथा प्रतिज्ञान्तरं हेत्वन्तरमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणमिति सप्तकम् । तत्त्वनिर्णयपरिपन्थित्वात् किञ्चदनुद्भाव्यमात्रम्, न तु तद्वद्भावनादेव कथाविच्छेदः । यथा विरोधोऽप्राप्तकालं न्यूनमधिकं पुनरुक्तमयथार्थभाषणमपसिद्धान्त इति सप्तकम् । ते पञ्च न्यूनं निरनुयोज्यानुयोगापासिद्धान्तावित्यनिग्रहो वाद इति वृद्धाः ।

कथाधिकारिणश्च तत्त्वनिर्णयविजयादिफलाभिलाषिणः सर्वजनसिद्धानुभवानपलापिनः श्रवणादिपटवोऽकलहकराः कथोपयिकव्यापारसमर्था अवहिताश्च । वादाधिकारिणस्तु प्रकृतोक्तिका अविप्रलम्भकाः यथाकालस्फूर्तिकाः युक्तिसिद्धप्रत्येतारः तत्त्वबुभुत्सवश्च । तथाभूता तथाभूतेनैव वक्तुमर्हन्ति । तथैव फलसिद्धेः । नहि स्वसंभूयार्थं साधयतः किञ्चिच्च कथारसालिकं यथा हेत्वाभासो निरनुयोज्यानुयोगश्चेति द्वयम् । तयोः साक्षादेव तत्त्वधीविरोधित्वादिति । विरोधादिनिग्रहस्थानोत्तीर्णस्य हि प्रयोगस्य चतुर्द्धा दुष्टत्वम् । हेतुतो ऽनैकान्तिकत्वादिना, दृष्टान्ततः साध्यविकलत्वादिना, तर्कत आत्माश्रयत्वादिना, उक्तितोऽनुपदर्शितान्वयत्वादिना । एतेषां चतूरङ्गत्वात् हेत्वाभासपर्यवसायित्वम् । तथा च यथाश्रयासिद्धत्वादिनोद्भावनं तथा सिद्धसाधनत्वादिनापीति समुच्चीयत इति दिक् ।५।२।२४।

उभापतिसगर्भस्य श्रीविश्वधरजन्मनः ।
श्रीमत्केशवमिश्रस्य कृतिर्विजयतेतराम् ॥

श्रीकेशवेन व्यरचि प्रवन्धः
पूर्णानि विश्वान्यपि यद्यशोभिः ।
शिष्यैर्यदीयैश्च परः सहस्रै
पारेसमुद्रानपि भूषिता भूः ॥

नमामि सज्जनान् प्रीत्या न तु भीत्याऽपि दुर्जनान् ।
सज्जनः सानुवन्धश्चेत् दुर्जनः किं करिष्यति ॥

इति महामहोपाध्याय तर्काचार्यवेदान्तव्यासश्रीकेशवमिश्रकृते
गौतमीयसूत्रप्रकाशे पञ्चमोऽध्यायः समाप्तः ।४३।२४।

त्रित्रिद्वित्रिद्वित्रिकद्वित्रिद्वि द्वित्रिवामदृक् ।
द्विनाद्ये षडाम्नायत्रिद्विश्रुत्यग्नियुग्मकम् ॥
जातिषट्कं युग्मं द्वादशैकैकशः क्रमात् ।
षट्पक्षी पञ्चवेदाग्नि चन्द्राब्ध्यग्निद्विनिग्रहाः ॥

———

प्रथम ४०+२०=६० । द्वितीय ६८।६८।१३६। तृतीया ६६।७३।१४२। चतुर्थ ६८। ४९।११७। पञ्चम ४२।२४।६६।।६०।४।२२।

परिशिष्टम् (१)

द्वितीयाध्यायद्वितीयाह्निकस्थसूत्राणि

[प्रमाणचतुष्ट्वपरीक्षाप्रकरणम् १२।१]

न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् ।१। शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावादनर्थान्तरभावाच्चाप्रतिषेधः ।२। अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ।३। अनर्थापत्तावर्थापत्त्यभिमानात् ।४। प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात् ।५। तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ।६। नाभावप्रामाण्यं प्रमेयासिद्धेः ।७। लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धिः ।८। असत्यर्थे नाभाव इति चेन्न, अन्यलक्षणोपपत्तेः ।९। तत्सिद्धेरलक्षितेष्वहेतुः ।१०। न लक्षणावस्थितापेक्षसिद्धेः ।११। प्रागुत्पत्तेरभावोपपत्तेश्च ।१२।

[शब्दानित्यत्वप्रकरणम् २७।२।]

आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च ।१३। न घटाभावसामान्यनित्यत्वान्नित्येष्वनित्यवदुपचाराच्च ।१४। तत्त्वभाक्तयोर्नानात्वविभागादव्यभिचारः ।१५। सन्तानानुमानविशेषणात् ।१६। कारणद्रव्यस्य प्रदेशशब्देनाभिधानात् ।१७। प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च ।१८। तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः ।१९। अनुपलम्भादप्यनुपलब्धिसद्भावान्नावरणानुपपत्तिरनुपलम्भात् ।२०। अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ।२१। अस्पर्शत्वात् ।२२। न कर्मानित्यत्वात् ।२३। नाणुनित्यत्वात् ।२४। सम्प्रदानात् ।२५। तदन्तरालानुपलब्धेरहेतुः ।२६। अध्यापनादप्रतिषेधः ।२७। उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः ।२८। अभ्यासात् ।२९। नान्यत्वेऽप्यभ्यासस्योपचारात् ।३०। अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताभावः ।३१। तदभावे नास्त्यनन्यता तयोरितरेतरापेक्षसिद्धेः ।३२। विनाशकारणानुपलब्धेश्च ।३३। अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ।३४। उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः ।३५। पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः ।३६।

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ।३७। अस्पर्शत्वाद-प्रतिषेधः ।३८। विभक्त्यन्तरोपपत्तेश्च समासे ।३९।

[शब्दपरिणामप्रकरणम् १८।३।]

विकारादेशोपदेशात् संशयः ।४०। प्रकृतिविवृद्धौ विकारविवृद्धेः।४१। न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुः ।४२। द्विविधस्यापि हेतोरभावा-दसाधनं दृष्टान्तः ।४३। न, अतुल्यप्रकृतानां विकारविकल्पात् ।४४। द्रव्यविकारवैषम्यवद् वर्णविकारविकल्पः ।४५। न, विकारधर्मानुपपत्तेः ।४६। विकारप्राप्तानामपुनरापत्तेः ।४७। सुवर्णादीनां पुनरापत्तेरहेतुः ।४८। न, तद्विकारणां सुवर्णभावाव्यतिरेकात् ।४९। नित्यत्वेऽविकारादनित्यत्वे चान-वस्थानात् ।५०। नित्यानामतीन्द्रियत्वात् तद्धर्मविकल्पाच्च वर्णविकाराणाम-प्रतिषेधः ।५१। अनवस्थायित्वे च वर्णोपलब्धिवत् तद्विकारोपपत्तिः ।५२। विकारधर्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ।५३। प्रकृत्यनियमात् ।५४। अनियमे नियमान्नानियमः ।५५। नियमानियम विरोधादनियमे नियमाच्चाप्रतिषेधः ।५६। गुणान्तरापत्त्युपमर्दह्रासवृद्धि लेशश्लेषेभ्यस्तु विकारोपपत्तेर्वर्णविकाराः ।५७।

[शब्दशक्तिपरीक्षाप्रकरणम् १२।४।]

ते विभक्त्यन्ताः पदम् ।५८। व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः ।५९। या शब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्युपचयवर्णसमासा नुबन्धानां व्यक्तावुपचाराद्व्यक्तिः ।६०। न तदनवस्थानात् ।६१। सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मण-मञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः ।६२। आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः ।६३। व्यक्त्या-कृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः ।६४। नाकृतिव्यक्त्य-पेक्षत्वाज्जात्यभिव्यक्तेः ।६५। व्यक्त्याकृतिजातयस्तु पदार्थः ।६६। व्यक्तिर्गुणविशेषाश्रयो मूर्तिः ।६७। आकृतिर्जातिलिङ्गाख्या ।६८। समान-प्रसवात्मिका जातिः ।६९।

———

परिशिष्टम् (२)

आलोचनात्मिका टिप्पणी

१. १. १. (क) "तत्त्वं ज्ञायतेऽनेनेति" वृत्तिसन्दर्भस्य उपजीव्यो ग्रन्थस्तात्पर्यटीका। तद्यथा—"ज्ञायतेऽनेनेति ज्ञानमिति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रमुच्यते। शास्त्रनिःश्रेयसयोर्हेतुहेतुमद्भावः। तेन शास्त्रस्य निःश्रेयसे कर्तव्ये प्रमाणादितत्त्वागमोऽवान्तरव्यापार इति। तथा च प्रमाणादिपदार्थतत्त्वं प्रतिपाद्यं, प्रतिपादकं च शास्त्रमिति शास्त्रप्रमाणादिपदार्थतत्त्वयोर्ज्ञाप्यज्ञापकभावश्च प्रमाणादिपदार्थतत्त्वज्ञाननिःश्रेयसयोः कार्यकारणभावलक्षणश्च संबन्धः सूचितो भवति।"

(ख) "नन्वेवमपीत्यादि" वृत्तिसन्दर्भस्य उपजीव्यो ग्रन्थस्तात्पर्यटीका। तद्यथा—"स्यादेतत्, भवन्तु प्रमाणादयः पदार्थाः शक्यज्ञानाः, शास्त्रेण तु ते नाभिधीयन्ते इति न निःश्रेयसेन सङ्गतिः शास्त्रस्येत्यत आह—"शास्त्रस्य पुरुषश्रेयोऽभिधायकत्वात्"।

(ग) "अत्र निर्देशे" इति वृत्तिसन्दर्भस्यान्तिमांशस्य चोपजीव्यो ग्रन्थः **वार्त्तिकम्**। "यदेव निर्देशे वचनभेदोपादाने प्रयोजनं तदिहापि द्रष्टव्यमिति"। "शास्त्रं पुनः प्रमाणादि वाचकपदसमूहो व्यूहविशिष्टः। पदं पुनर्वर्णसमूहः। पदसमूहः सूत्रम्। सूत्रसमूहः प्रकरणम्। प्रकरणसमूह आह्निकम्। आह्निकसमूहोऽध्यायः। पञ्चाध्यायी शास्त्रम्"।

१. १. २. सिद्धान्तस्तु "अपवर्गो द्वेधा परापरभेदादिति" वृत्तिसन्दर्भस्य उपजीव्यो ग्रन्थस्तात्पर्यटीका—"चतस्रो हि प्रतिपत्तयः प्रमेये आत्मादौ। प्रथमा तावदागमात् यामाचक्षते श्रवणमिति। द्वितीया तु श्रुतस्य परीक्ष्य न्यायेन व्यवस्थापनम्। यामाहुर्मननमिति। सा चान्वीक्षिक्यामायतते।......तस्मादात्मादिसाक्षात्कारवतीं चतुर्थीं प्रतीतिमशेषतद्गोचरवासनाविपर्यासशमनीमर्थयमानेनादरनैरन्तर्याभ्यां ध्यानचिन्तादिशब्दवाच्या तृतीया प्रतीतिः साक्षात्कारफला दीर्घकालमुपासनीया"।

१. १. ४. "इह प्रत्यक्षलक्षणे" इति वृत्तिसन्दर्भस्योपजीव्यो ग्रन्थस्तात्पर्यटीका। तद्यथा—"इह द्वयी प्रत्यक्षजातिरविकल्पिका सविकल्पिका चेति। तत्रोभय्यपि इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारीति लक्षणेन संग्रहीताऽपि स्वशब्देनोपात्ता, तत्र विप्रतिपत्तेः। तत्राविकल्पिकायाः पदमव्यपदेश्यमिति। सविकल्पिकायाश्च व्यवसायात्मकमिति"।

१. १. ५. अत्र वृत्तौ वैकल्पिकव्याख्याने **भाष्यप्रभावः**। तत्र तथा दृश्यते। तथापि तानि ते तदिति विग्रहत्रयं कृत्वैकशेषः" इत्यादिवृत्तिपंक्तिः **वार्त्तिकमनुवक्ति**। त्रिविधमिति वृत्तिसन्दर्भोऽपि **वार्त्तिकमनुगच्छति**।

१. १. ६. अत्र **वार्त्तिकमनुवक्ति** वृत्तिकृत्। तद् यथा—"प्रसिद्धं साधर्म्यं यस्य, प्रसिद्धेन वा साधर्म्यं यस्य, सोऽयं प्रसिद्धसाधर्म्यो गवयः। तस्मात् साध्यसाधनमिति"।

× × ×

"गवा गवयसारूप्यं प्रतिपद्यते गवयसत्तां वा इत्यहो प्रमाणाभिज्ञता **भदन्तस्य**। गवा गवयसारूप्यप्रतिपत्तेस्तु संज्ञासंज्ञिसम्बन्धं प्रतिपद्यत इति सूत्रार्थः"।

इदमत्रावधेयम्। **भाष्य**मताद् **वार्त्तिक**मतस्य भेदः परिलक्ष्यते। उपमितिकरणस्वरूपं तु गवयदर्शनसमये गोसदृशो गवय इति अतिदेशवाक्ये यत्सादृश्यमुक्तं तदेवेति **भाष्यकारः**। **वार्त्तिकृतात्पर्यटीकाकृद्भ्यां** तु गवयदर्शनानन्तरं यत् तस्मिन् गोसादृश्यं दृश्यते तदेवोक्तातिदेशवाक्यस्मरणसहकृतमुपमितिकरणम्। तथा च **वार्त्तिक**मत्र---"आगमाहितस्मृत्यपेक्षं सादृश्यज्ञानमुपमान"मिति। वृत्तिकृद्केशवस्तु **वार्त्तिक**मनुसरति।

१. १. ७. "न च वेदेत्यादि" वृत्तिपंक्तिः **परिशुद्धि**कथामनुसरति। अत्र "इह केचिदित्यादि इत्याहुः पर्यन्तं" **परिशुद्धि**पंक्तिः। केचिदित्यनेन **भासर्वज्ञो**ऽभिमतः। तदीय**न्यायसारे** (३।२।) एतादृशविचारस्योपलम्भात्।

अनन्तरं **न्यायसूचीनिबन्धे न्यायसूत्रोद्धारे**ऽन्यत्र सूत्रमेकं—"स द्विविधः दृष्टादृष्टार्थत्वा" दिति विद्यते। परमिहवृत्तौ नास्य चर्चा विद्यते इत्याश्चर्यम्। अयं तु वृत्तिकारः स्वकीयवृत्तौ तत्सूत्रकथां संवदति।

१. १. १०. अत्र वृत्तेरुपजीव्यो ग्रन्थस्**तात्पर्यटीका**। तद्यथा—"अत्र चेष्टाश्रयत्वेनेन्द्रियाश्रयत्वेनार्थाश्रयत्वेन च प्रत्येकं समानजातीयेभ्य आत्मेन्द्रियादिभ्योऽसमानजातीयेभ्यः प्रमाणसंशयादिभ्यः शरीरं व्यवच्छिद्यते"।

"यद्यपि च दारुयन्त्रादिषु ईदृशो व्यापारोऽस्ति तथापि मूर्तान्तराप्रयोगे सति इति विशेषणात्........पाषाणमध्यवर्तिनश्च मण्डूकदेहस्य तद्व्यापारायोगेऽपि तद्योग्यत्वात्।"

१. १. १२. पृथिव्यापस्तेजो इति शुद्धपाठः। **केचित्तु** नैतत्सूत्रम् भाष्येऽस्योपदेशत्वेनाभिधानात् **न्यायसूचीनिबन्धे**ऽस्य दर्शनाच्च सूत्रत्वमङ्गीकरणीयम्।

१. १. २२. अत्र वृत्तिकृत् **वार्त्तिक**मनुसृत्य सूत्रम् व्याख्याति। अतएव त्रीण्येव विशेषलक्षणानि संशयस्य प्रतिपादयति। **भाष्ये** तु संशयस्य पञ्च प्रकाराः सन्ति वर्णिताः। **तात्पर्यटीकाया** अपि **वार्त्तिक**मत एव स्वारस्यम्।

१. २. १. तथा च नानाप्रवक्तृकविचारविषया वाक्यसन्दृब्धिः कथेति सामान्यलक्षणं पक्षप्रतिपक्षपरिग्रह इति सूत्रावयवेन सूचितमित्येतदप्यर्थादुक्तं भवतीति"। "प्रमाणतर्कसाधनोपालम्भता वादस्य वीतरागकथात्वेन तत्त्वनिर्णयावसानत्वात्"। **तात्पर्यटीकायाः** पंक्तिद्वयस्यास्य प्रभावः वृत्ताविह स्फुटं परिदृश्यते।

उपक्रमे तु **परिशुद्धि**मिहानुवक्ति वृत्तिकृत्। तद्यथा—"एवं प्रथमाह्निके साङ्गोपाङ्गो न्यायस्तावल्लक्षितः। स च परार्थोऽपि पृच्छोपक्रमप्रतियोगिनि एकवक्तृके विचारे विविच्य प्रवर्तनीयः।......तत्र चोपालम्भपरत्वं तस्य। एवं च प्रवर्तनीयविवेचनीयसिद्धपरसाङ्गन्यायलक्षणं प्रथमाह्निकार्थः। द्वितीयाह्निकार्थस्तु प्रवर्तनविवेचनोपालम्भपरपदार्थलक्षणमिति"।

१. २. ४. अत्रान्तिमा पंक्तिः **गङ्गेशोपाध्यायकृतचिन्तामणितः** संगृहीता। **सामान्यनिरुक्तेः** प्रथमलक्षणतया प्रसिद्धा। सा चानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम् इति।

१. २. ७. अत्र वृत्तिः **वार्त्तिकमनुगच्छति** ।

१. २. ८. "अत्र चासिद्धः साध्यसम इति वक्तव्ये साध्याविशिष्टग्रहणमन्यतरासिद्धस्यापि सिद्धेः प्रागहेतुत्वज्ञापनार्थम् । अन्यथा अत्यन्तासिद्ध एव साध्यसमो नान्यतरासिद्धः । तस्य कदाचित्सिद्धेरिति भ्रान्तिः स्यात् । नन्वेवं साध्याविशिष्टत्वेनान्यतरासिद्ध एव स्यात् नेतरे, तेषामसिद्धत्वेन साध्याविशेषाभावादित्युक्तं सूत्रकृता साध्यत्वात्" इमामेव **तात्पर्यटीकाकथामनु**वक्ति वृत्तिकारः । त्रैविध्यं चास्य **वार्त्तिके** वर्णितमस्ति ।

१. २. ९. हेत्वपदेशस्य हि साध्यसन्देहविशिष्टः कालः । यदाहुः "नानुपलब्धे न निर्णीते न्यायः प्रवर्तते इति" । "स हि प्रमाणतो विपरीतनिर्णयेन साध्यसन्देहविशिष्टं कालमतिपततीति" वृत्तेः पंक्तिद्वयं **तात्पर्यटीकातो** गृहीतम् । "लक्षणं तु बलवत्प्रमाणप्रमापितसाध्याभाववद्धर्मिकत्वम्" इत्यत्र **तात्पर्यटीकाभावध्वनिः** । तद्यथा—"स हि धर्मिणि बलवता प्रमाणेन तद्विपरीतधर्मनिर्णयं कुर्वता संशयकालमतिपातितः । स तादृशो हेतुः कालात्ययापदिष्टः कालातीत इति" ।

"स चायं संक्षेपाद् दशविध" इति **परिशुद्धिपंक्तिः** । दशविधता चास्य परिशुद्धावेवं वर्णिता—(१) अनुष्णोऽग्निर्द्रव्यत्वात् । (२) अश्रावणः शब्दो गुणत्वात् । (३) शुचि नरशिरःकपालं प्राण्यङ्गत्वात् इति प्रत्यक्षानुमानागमविरोधस्**तात्पर्यटीकायाम्** । **परिशुद्धिस्तु** अनुष्ण इत्यादिना प्रतिषेध्यविधेयधर्मग्राहकप्रमाणबाधो दर्शितः । धर्मिग्राहकप्रमाणबाधस्तु (४) घटो व्यापकः सत्त्वात् आकाशवदिति प्रत्यक्षेण । (५) परमाणुः सावयवो मूर्तत्वाद् घटवदित्यनुमानेन । (६) मेरुः पाषाणमयः पर्वतत्वाद् विन्ध्यवदित्यागमेन । हेतुग्राहकप्रमाणबाधस्तु (७) जलानिलावुष्णौ पृथिवीतो विपरीतस्पर्शवत्त्वात् तेजोवदिति प्रत्यक्षेण । (८) मनो विभु ज्ञानासमवायिकारणसंयोगाधारत्वात् आत्मवदित्यनुमानेन । (९) ब्राह्मणस्य राजसूयं कर्म स्वर्गसाधनत्वात् अग्निष्टोमवदित्यागमेन । एवं नवविधोऽयमेकविधोपमानबाधेन संक्षेपतो दशविध इति ।

१. २. १०. एतत्सूत्रोपक्रमस्तु **परिशुद्धिकथामेवाभिदधाति** । तद् यथात्र **परिशुद्धिः**—"एवं यत्नेनोद्भावनीयपरिहरणीयहेत्वाभासप्रकरणं समर्थितम् । अथ साधनवादी प्रमादी प्रतिवादी वा सदुत्तरसमाधानयोरपरिस्फूर्तौ तयोर्विजिगीषुस्तदाभासमपि ब्रूयात् इति तदाभासव्युत्पादनावसरः । तत्रापि जातेः स्वपक्षव्याघातापादकत्वेन जघन्यत्वाच्छलस्य तु तात्पर्यतो दुष्टत्वेऽपि वचनतोऽदुष्टत्वादस्फूर्तिदशायामपि तदेव प्रयोक्तव्यम् । तस्याप्यस्फूर्तौ जातिरिति विशेषज्ञापनार्थं जातेः पूर्वं छलोद्देशः ।"

१. २. १२. अत्र **परिशुद्धिकथामनुवक्ति** वृत्तिकारः । तद्यथात्र **परिशुद्धि**—"तदिदं वाक्छलमुत्तरदशायां नवविधम् । तद्यथा भूभृदयं वीर्यशाली महावयवत्वादित्यत्र धर्मिपदसञ्चारेण । न नखप्रसूनाञ्चितकरपल्लवोऽयं नित्यकर्मकरत्वात् इत्यत्र साध्यपदसञ्चारेण । अजा गर्भवती रक्तविलोचनत्वादित्यत्रोभयपदसञ्चारेण । तदेतत् प्रतिज्ञाश्रयं त्रयम् ।

आढ्योऽयं नवकम्बलत्वादित्यत्रासिद्धत्वोद्भावनेन । गजोऽयं विषाणित्वादित्यत्र विरोधोद्भावनेन । दुरालोकोऽसौ राजा तेजोमयत्वादित्यत्रानैकान्तिकत्वोद्भावनेन । तदेतत् हेत्वाश्रयं त्रयम् ।

द्रव्यं वायुः सावयवत्वादम्बरवदित्यत्र साधनविकलत्वेन। अस्मदादिदुरासदाः तारकाः गगनेचरत्वात् पतङ्गवदित्यत्र साध्यविकलत्वेन। पशुरेष विषाणित्वाद् गोवदित्यत्रोभयविकलत्वेन। तदेतद् दृष्टान्ताश्रयं त्रयम्''।

१. २. १३. अत्र **परिशुद्धिकथामनुवक्ति** वृत्तिकृत्। तद्यथा "यत्र तात्पर्यसंक्रान्तिस्तत् सामान्यच्छलमिति सूत्रार्थः। तच्च क्वचित् सम्भवविधिविशेष्येषु। यथा सम्भवद्विद्याचरणसपदयं ब्राह्मणत्वात्। अनित्यः शब्दः। शतं द्विजातयो भोजिताः। क्वचित्तु हेतुत्वोद्देशविशेषणेषु। यथा ब्राह्मणादुपजातोऽयं ब्राह्मणत्वात्। अनित्यं कार्यं द्विजशतं भोजितम्'' इति।

१. २. १४. अत्र **परिशुद्धिकथामनुवक्ति** वृत्तिकृत्। तद्यथाऽत्र **परिशुद्धिः**—"एतदप्युत्तरे नवविधम्। तद्यथा अयं माणवकः सिंहः, अयं सिंहो राजः, अयं पुरुषसिंहो राजशार्दूलस्येति प्रतिज्ञामाश्रित्य त्रयम्। वर्षासु नोसञ्चार्येयं भूमिर्गङ्गात्वात्, घोषाणां सुखवसतिहेतवस्ते देशा गङ्गात्वात्, स प्रदेशो घनाकाशादिवनो गङ्गात्वादिति हेतुमाश्रित्य त्रयम्। ये ध्वनिहेतवस्ते क्रोशन्ति, यथा मञ्चाः। ये क्रोशन्ति ते ध्वनिहेतवो, यथा मञ्चाः, ये क्रोशनप्रयोजनवन्तस्ते क्रोशन्ति यथा मञ्चाः, इति दृष्टान्तमाश्रित्य त्रयम्।''

× × ×

लोकसिद्धलक्षणाय प्रयोगेषु वक्तुर्दोषः इति पंक्तिस्थाने लोकसिद्धलक्षणाप्रयोगेषु न वक्तुर्दोष इति पंक्तिः समुचिता प्रतिभाति।

१. २. १५. अत्र "तदविशेषात्" इति सूत्रबहिर्भूतमिति **जयन्त** इत्युल्लिखति वृत्तिकृत्। किन्तु उपलब्धन्यायमञ्जरीग्रन्थे **जयन्तभट्टप्रणीते** नोपलभ्यते तथाविधा पंक्तिः। एतस्मिन् प्रसङ्गे **वार्त्तिके तात्पर्यटीकायामपि** नोपलभ्यते किमपि वक्तव्यम्। परमयं वृत्तिकारः **वर्तिकतात्पर्यटीके** स्वमतोपोद्बलकतया **जयन्तभट्ट**विरोधितया समुल्लिखति इति सुधिय एवात्र विचारयन्तु।

× × ×

२. १. १. **अनुमितिसङ्गति**ग्रन्थे षोढा सङ्गतिरुल्लिखिता।

सप्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा।
निर्वाहकैक्यकार्यत्वे षोढा सङ्गतिरिष्यते॥

१—प्रसङ्गत्वं तूपोद्घातादिपञ्चकभिन्नत्वे सति सङ्गतित्वम्। स्मृतस्योपेक्षानर्हत्वमिति वा।

२—हेतुत्वं कारणत्वं हेतुहेतुमद्भावरूपम्।

३—अवसरस्तु विषयसिद्धया प्रतिबन्धकीभूतजिज्ञासानिवृत्तावनन्तरमवश्यवक्तव्यम्।

४—निर्वाहकैक्यम् एकनिर्वाहकनिर्वाह्यत्वम्।

५—कार्यैक्यम् तदन्यत्वे सति तत्प्रयोज्यकार्यप्रयोजकत्वम्।

६—उपोद्घातः चिन्तां प्रकृतसिद्धयर्थमुपोद्घातं विदुर्बुधाः।

इह तु वृत्तिकृत् प्रसङ्गं हेतुहेतुमद्भावमवसरञ्चेति सङ्गतित्रितयं प्रदर्शयति।

२. १. ७. अत्र कश्चिदिति वृत्तिः वृद्धा इति वृत्तिश्च **परिशुद्धितः** संगृहीतेति मन्ये। तत्र भाष्याभिप्रायतोऽन्यदेव तात्पर्यं **परिशुद्धिकृता** व्याख्यातमिति **खद्योतः**।

२. १. ९. अत्रत्या वृत्तिस्तात्पर्यटीकायामक्षरश उपलभ्यते।

२. १. १० अत्र वृत्तौ तात्पर्यटीकातोऽक्षरशः साम्यं वर्तते।

२. १. १५. विश्वनाथवृत्तिरिह कथयति कोष्ठान्तर्गतश्चकारान्तः सूत्रांशः तत्त्वालोके द्वितीयवाचस्पतिकृतन्यायसूत्रवृत्तौ न सूत्रतया परिगृहीतोऽस्ति। तत्प्रभावादेव मन्येऽत्रापि वृत्तिकृता तदंशः सूत्रत्वेन न परिगृहीतः। परं न्यायसूत्रोद्धारे चकारान्तोऽपि सूत्रांशतया समुल्लिखितोऽस्ति।

अत्र तात्पर्यटीकायाः स्फुटः प्रतिध्वनिः। वृत्तेरन्तिमांशस्तु तात्पर्यटीकाया एव पंक्तिः। तद्यथा—"यत्पुनराक्षिप्यते यदनियतं न तत् परमार्थसत्। यथा रज्ज्वमारोपितं सर्पत्वम्। तामेव रज्जुं तदैव कश्चित् सर्प इति कल्पयति कश्चिद्धारेति। स एव कदाचित् सर्प इति कल्पयित्वा पश्चाद्धारेति कल्पयति। तथा च प्रमाणप्रमेयभावस्तस्मान्न परमार्थसन्निति।" इयं च पंक्तिस्तात्पर्यटीकायां २।१।१६ सूत्रस्यावतरणे दृश्यते। वृत्तौ तु समाक्षिप्सूचिका सूत्रसंख्या "सन्निति" पदानन्तरमुपलब्धा तथैव मुद्रिताऽपि। परमेष प्रमादः। वस्तुतः "प्रस्तुतस्य सिद्धि" रित्यत्रैव २।१।१५ सूत्रवृत्तिपर्यवसानम्।

२. १. २०. अत्र "केचित्तु इत्यादि" भाष्यावतरणम्। केचित् पदेनाचार्यदेशीया इति तात्पर्यटीका। अनिरुद्धाचार्यस्तु विवरणपञ्जिकायामाचार्यदेशीयपदेन बौद्धाचार्यविशेषं गृह्णाति।

"केवलं प्रकाशकत्वं सजातीयान्तरानपेक्षत्वे साध्ये विकल्पनीयम्। किमत्यन्तसजातीयमाहो सजातीयमात्रम्। यद्यत्यन्तसजातीयं ततः सिद्धसाधनम्। न हि चक्षुरादिप्रमाणे स्वग्रहणे चक्षुराद्यन्तरमपेक्षते। अथ कथञ्चित् सजातीयं तदपेक्षत्वमालोकस्याप्यस्ति। तस्यापि चक्षुराद्यपेक्षत्वात्। ततश्च साध्यहीनो दृष्टान्तः" अस्यैव तात्पर्यटीकासन्दर्भस्य संक्षेपतो प्रतिध्वनिः केशवमिश्रेण वृत्ताविह विहितः।

न्यायसूत्रोद्धारे नैतत्सूत्रमुपलभ्यते। न्यायसूचीनिबन्धेऽन्यत्र चोपलभ्यते।

२. १. २४-२५. अनिरुद्धाचार्यस्तु विवरणपञ्जिकायां कथयति टीकाकारगते सूत्रमेतद् द्वयम्। मञ्जरीगते [त्रिलोचनाचार्यप्रणीता न्यायमञ्जरी ग्रन्थकृतोऽभिमताऽत्र] तु भाष्यम्। वृत्तिकृत् केशवमिश्रस्तु वाचस्पतिमनुसरन् सूत्रतयैतद्द्वयं परिगृह्णाति न्यायसूत्रोद्धारेऽन्यत्र च सूत्रत्वेनैतयोरुपलब्धिः।

२. १. २६. ज्ञानोत्पत्तेरित्येव साधु पाठः कोष्ठान्तर्गतः ज्ञानोत्पत्तिरिति तु प्रामादिकः। ज्ञानोत्पत्तेः सन्निकर्षनिमित्तत्वात् 'इन्द्रियार्थसन्निकर्षस्य ग्रहणं' प्रत्यक्षलक्षणसूत्रे (१।१।४) इति भाष्यग्रन्थेन सम्बन्धः। इतः पूर्वं सूत्रमेकं न्यायसूचीनिबन्धे न्यायसूत्रोद्धारे च दृश्यते "प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम्"। परमिह केशवमिश्रः नैतत्सूत्रस्य चर्चामपि करोति।

२. १. ३०. वृत्तिकृत् केशवमिश्रः प्रत्यक्षस्यानुमानत्वपरीक्षाप्रकरणं सप्तभिः सूत्रैः प्रवर्तयति। प्रसङ्गागतमवयविप्रकरणं नाङ्गीकरोति।

विद्यासागरोऽत्र समुद्धृतः। स च वासुदेवसार्वभौमस्य पितृव्यपुत्रः पुण्डरीकाक्षविद्या-

सागरोऽत्राभिप्रेतः। अस्य परिचयः गुरुचरणैः प्रो० अनन्तलालठाकुरमहाशयैः वडौदाप्राच्य-विद्यापत्रिकायां १६७६ खिष्टाब्दस्य द्वितीयेऽङ्के साधु प्रतिपादितः।

२. १. ३२. तात्पर्यटीकाकृद् **वाचस्पतिः** "न चैकदेशोपलब्धिरित्यन्तं" न सूत्रतया परिगृह्णाति। अतएव **न्यायसूचीनिबन्धे** नास्योपलब्धिरस्ति। **टीकायामपि** "तदेतद् भाष्य-मनुभाष्य**वार्त्तिककारो** व्याचष्टे" इति व्याख्योपलभ्यते। **अनिरुद्धाचार्यस्तु** मौनमवलम्बते प्रसङ्गेऽस्मिन्। वृत्तिकृत् **केशवस्तु** सूत्रतया परिगृह्णाति। **तत्त्वालोके** द्वितीय**वाचस्पति**कृतवृत्ति-ग्रन्थे **वाचस्पति**मनुसरन् अवयविसद्भावादित्येव सूत्रत्वेन परिगृहीतमिति श्रूयते। **न्यायसूत्रोद्धारे** तु सम्पूर्णं सूत्रमुपलभ्यते।

२. १. ३४. अत्र तात्पर्यद्वयं वृत्तिकृतोऽभिमतम्। (१) सर्वस्य द्रव्यगुणादेरग्रहणं स्यात् यद्यवयवी न सिद्ध्येत्।

(२) सर्वैः प्रमाणैरग्रहणम्। कथं? प्रत्यक्षस्य वर्तमानमहद्विषयत्वात्। अवयवी यदि न स्यात् न बाह्यकरणप्रत्यक्षविषयः कश्चित् स्यादिति प्रत्यक्षस्याभावेऽनुमानादेरप्यभावः। सेयं सर्वप्रमाणनिवृत्तिरित्येव **वार्त्तिककारीयं** मतं "मानान्तरस्यापि मूलप्रत्यक्षाभावेऽनुपपत्ते"रिति वृत्या परिलक्ष्यते।

२. १. ३६. अत्र वृत्तौ कोष्ठगतप्रश्नचिह्नं निरर्थकमित्यधुना प्रतीयते।

२. १. ३७. अत्र वृत्तौ **तात्पर्यटीका**पंक्तिरुपलभ्यते। तद्यथा "अत्र नदीपूरमयूरवासिते शेषवत उदाहरणे।" "वर्षमूलकारणस्य तु महाभूतसंक्षोभस्य पिपीलकाण्डसञ्चरणं पूर्वकार्यं क्लिश्यमानाः खलु पिपीलिका भौमेनोष्मणा स्वान्यण्डानि भूमिष्ठान्युपरिष्टान्नयन्ति। तस्मात् पिपीलिकाण्डसञ्चारेण वर्षकारणमनुमाय यदि वर्षकारणात् कार्यमनुमिमते अनुमातारस्तदा पूर्ववदुदाहरणम्। अथ कार्यकारणभावमबुद्ध्वैव तदा कार्यकारणभावाभावेन सामान्यतो दृष्टस्यो-दाहरणमिति मन्तव्यम्"

२. १. ४२. अत्राक्षरशः**भाष्य**मुपलभ्यते वृत्तौ। तथा चात्र **भाष्यम्**—"उभयथा च वर्तमानः कालो गृह्यते। क्वचिदर्थसद्भावव्यङ्ग्यः। यथा अस्ति द्रव्यमिति। क्वचित् क्रियासन्तान-व्यङ्ग्यः। यथा पचति छिनत्तीति। नानाविधा चैकार्था क्रिया क्रियासन्तानः क्रियाभ्यासश्च। क्रियासन्तानः पचतीति स्थाल्यधिश्रयणमुदकासेचनं तण्डुलावपनमेधोपसर्पणमग्न्यभिज्वालनं दर्वीघट्टनं मण्डस्रावणमधोऽवतारणम्। छिनत्तीति क्रियाभ्यासः। उद्यम्योद्यम्य परशुं दारुणि निपातयन् छिनत्तीत्युच्यते।

२. १. ४४. अत्र वृत्तौ **भाष्य**कथायाः प्रतिध्वनिः।

२. १. ४५. अत्र वृत्तौ **तात्पर्यटीका**पंक्तिरानुपूर्वीतया परिगृहीता। तद्यथा—"प्रकर-णाद्यपेक्षं हि वाक्यं स्वार्थबोधकं न केवलम्"। "तदिह प्रतीतमहिषादिकं पुरुषं प्रति यदा यथा गौस्तथा गवय इति वाक्यमुच्चार्यते तदा महिषादिपरिहाराय भूयः साधर्म्यं विवक्षितमित्यवगतं तद्वाक्यार्थं स्मरति। महिषादिषु वने गोसाधर्म्यं पश्यन्नपि न गवयसंज्ञां निवेशयति" इति।

२. १. ५२. वृत्ताविह **वार्त्तिक**प्रतिध्वनिः पंक्तिसाम्यं च। तद्यथा—"यत्पुनरेतत् सम्बन्धाच्चेति। अस्ति शब्दार्थयोः सम्बन्धोऽनुज्ञातोऽस्ति च प्रतिषिद्ध इति। वाच्यवाचकभाव-

लक्षण: सम्बन्धोऽनुज्ञात: । अस्य शब्दस्यायमर्थो वाच्य इति । य: पुनरयं स्वाभाविक: सम्बन्ध: शब्दार्थयोरिति कैश्चिदभ्युपगम्यते स प्रतिषिद्ध इति । न स्वाभाविक: शब्दार्थयो: सम्बन्धोऽस्तीति'' **वार्त्तिकम्** ।

२. १. ५३. अत्र वृत्तौ **न्यायभाष्यप्रभाव:** । तद्यथा—''न चायमनुमानतोऽप्युपलभ्यते शब्दान्तिकेऽर्थ इति'' । ''अन्नाग्न्यसिशब्दोच्चारणे पूरणप्रदाहपाटनानि गृह्येरन् । न च गृह्यन्ते'' । अर्थान्तिके शब्द इति स्थानकरणासम्भवादनुच्चारणम्'' इति ।

२. १. ५६. अत्र **तात्पर्यटीका**प्रतिध्वनि: । द्रष्टव्यम् **तौतातितमततिलकम्** पृ० १०२,
स्तोत्रियानवकम्, श्रोत्रियानवकम् ।
त्रिवृच्छब्द: प्रयुक्तो य: स्तोत्रियानवं प्रति ।
कस्तं शक्तस्ततोऽन्यत्र नेतुं जन्मशतैरपि ॥
तन्त्रवार्त्तिकम् १।२।४।

२. १. ५७. अत्र **भाष्य**कथामनुसरति वृत्ति: । नाधिकमिह किमपि **भाष्यात्** ।
''श्यावोऽस्याहुतिमभ्यवहरति'' इति मन्त्र: **तैत्तिरीयब्राह्मणत:** परिगृहीत: सांख्यायनश्रौतसूत्रे (१. ५. ६.) च मिलति
''त्रि: प्रथमामन्वाह त्रिरुत्तमाम्'' इति मन्त्र: **शतपथब्राह्मणत:** (१. ३ ५.) परिगृहीत: ।

२. १. ५९. अत्र वृत्तौ **तात्पर्यटीका**प्रभाव: ।
श्यावशवलौ यमस्य सारमेयौ इति **शतपथब्राह्मणे** २।८-६।
श्वानौ द्वौ श्यावशवलौ वैवस्वतकुलोद्भवौ
ताभ्यां पिण्डं प्रयच्छामि स्यातामेतावहिंसकौ ॥ इति बलिमन्त्रोऽनुसन्धेय: ।

२. १. ६०. इह वृत्तौ **भाष्य**स्यैव पंक्ति: ।
''इदमहं भ्रातृव्यं पञ्चदशारेण वाग्वज्रेण बाधे योऽस्मान् द्वेष्टि यं च वयं द्विष्म:''

२. १. ६४. इह वृत्तौ **भाष्य**प्रभाव: स्फुटं परिलक्ष्यते । सोऽवलोकनीय: ।
हुत्वा वपामेवाग्रे अभिधारयन्त्यथ पृषदाज्यम् तदुह चरकाध्वर्यव: पृषदाज्यमेवाग्रेऽभिधारयन्ति अग्ने प्राण: पृषदाज्यमिति

२. १. ६८. अत्र **वार्त्तिका**नुगामिनी वृत्ति: ।

×× ×× ×× ××

३. १. ४. ''प्राणातिपाते पातकाभावप्रसङ्गादिति । अयं यद्यपि **भूतचैतनिकानां** नानिष्टप्रसङ्गस्तथापि **शाक्यान्** प्रति द्रष्टव्य:'' **तात्पर्यटीकाया:** पंक्तिरियं वृत्तावक्षरश: समुपलभ्यते ।

३. १. ६. सूत्रमिदं द्विधा व्याख्यातं **भाष्यकृता** । तदनुसृत्य वृत्तिकृताऽपि व्याख्यानद्वयं प्रस्तुतमिह । **न्यायसूत्रविवरणकारस्तु** वधादित्यस्य स्थाने बाधादिति पठतीति **खद्योते** म० म० डॉ० गङ्गानाथझामहाशया: । कार्यमदृष्टं तस्याश्रयस्य कर्तुरात्मन: बाधात् नाशाभावात्। [खद्योत:, पृ० १६१]

३. १. ७. **वाचस्पतिमिश्रः** चक्षुरद्वैतनिराकरणप्रकरणं प्रवर्तयति । वृत्तिकृत् **केशवमिश्र**स्तु चक्षुरद्वैतप्रकरणम् । इह **वार्त्तिकतात्पर्यटीकयो**र्मतभेदः । **वार्त्तिक**मनुगच्छति वृत्तिः । **वाचस्पति**स्तु **भाष्य**मिहानुसरति ।

३. १. १२. इत आरभ्य चतुर्दशतमसूत्रं यावत् आत्मनः प्रतिसन्धानानुमेयत्वप्रकरणमिति **तरणिमिश्रः** रत्नकोषकारः **यज्ञपत्युपाध्याय**स्यानुगामी । परं वृत्तिकृत् नात्र प्रकरणान्तरमङ्गीकरोति । **अनिरुद्धाचार्य**स्तु **विवरणपञ्जिकायां** चक्षुरद्वैतसाधनतयैव सूत्रत्रयं प्रवर्तयति । मन्ये तेनैव प्रभावितः **केशवमिश्र**स्तरणिमिश्रमतं निरस्यति ।

तात्पर्यटीकाकथाऽत्र वृत्तौ । तद्यथा—"कस्य चिदम्लचिरबिल्वादेरनुभूतस्य तेन सहचरितं रसमनुस्मरति, स्मृत्वा चेच्छति इच्छातो रसनेन्द्रियविकारो दन्तोदकसंप्लवलक्षणः प्रवर्तते । तद्दर्शनाचास्येच्छाऽनुमीयते, इच्छया च स्मृतिः । सेयं स्मृतिरसत्यात्मनि सर्वेन्द्रियविषयवेदिनि न भवितुमर्हतीति ।"

३. १. १३. "स्मृतिः कारणत्वेनावगमयेत् विषयत्वेन वा ? न तावत् कारणत्वेन, तस्याः संस्कारकारणत्वात् । न विषयत्वेन स्मर्तव्यविषयत्वात् । स्मृताच तस्मादिन्द्रियान्तरविकारोत्पत्तिः"-इति **तात्पर्यटीका**पंक्तिरेवात्र वृत्तावुपलभ्यते ।

तदात्मगुणेति ३. १ १४. सूत्रानन्तरम्—"अपरिसंख्यानाच स्मृतिविषयस्ये"ति सूत्रम् **न्यायसूत्रोद्धारे** दृश्यते । **न्यायसूचीनिबन्धे** नैतदुपलभ्यते । वृत्तिकृता केशवेन नोद्धृतम् भाष्यकारीयसूत्रमेतदिति **विवरणकृतः** इति **खद्योतः** ।

३. १. २३. "यौवनाद्यवस्थायां चेतनस्य प्रवृत्तिः क्षीरादौ पूर्वाभ्यस्तस्मृत्यनुबन्धहेतुका प्रतीतेति बाल्यावस्थायामपि चेतनस्य तद्धेतुकैव भवितुमर्हति" । "न च य एकं स्मरति तेनापरमपि स्मर्तव्यमिति कश्चिन्नियमहेतुरस्ति । येन जात्यन्धबधिरादयो रूपादिभेदान् व्याचक्षीरन् । अदृष्टपरिपाकोद्बोधितस्य संस्कारस्य तन्नियमेन नियमोपपत्तेरिति" **तात्पर्यटीका**सन्दर्भद्वयमिहानुसरति वृत्तिः ।

३. १. ३१. वृत्तिरिहानुगच्छति **भाष्यम्** ।

"सूर्यं ते चक्षुर्गच्छतात्" इति मन्त्रः **तैत्तिरीयारण्यकतः** (६. १.४, ७. ३.) परिगृहीतः

३. १. ३२. **भाष्यमते**नात्र सांख्यनैयायिकयोर्विप्रतिपत्तिः । **तात्पर्यटीकाकृन्मते** तु बौद्धनैयायिकयोरपीति । वृत्तिस्तु उभयोर्मतयोः संग्रहं विदधाति ।

३. १. ३४. **तात्पर्यटीका**नुगामिनीह वृत्तिः ।

३. १. ३७. अनन्तरं सूत्रमेकम् "अनेकद्रव्यसमवायात् रूपविशेषाच रूपोपलब्धिरिति" पठति **वाचस्पतिमिश्रः न्यायसूचीनिबन्धे** । न च तद् गृह्णाति वृत्तिकृत् । वस्तुतस्तस्य वैशेषिकसूत्रतयात्र वृत्तिकृतोऽग्रहणं समुचितमेव । तुलनीया चात्र वृत्तिः न्यायभाष्यपंक्त्या ।

३. १. ४७. अत्र सुस्पष्टं **भाष्य**मनुवदति वृत्तिः । इन्द्रियनानात्वप्रकरणे ३. १. ५४. एतत्सूत्रात् पूर्वमेकं सूत्रं **न्यायसूचीनिबन्धे** "विप्रतिषेधाच्च न त्वगेका" इति दृश्यते । **न्यायसूत्रोद्धारे** "न युगपत्त्वाच संशयः" इत्येतेन सह विप्रतिषेधाच्च त्वगेकेति सूत्रद्वयमुल्लिखितमस्ति । परं **केशव**-

मिश्रः कस्यापि चर्चामपि न करोति । अस्मिन्नेव प्रकरणे "भूतगुणविशेषोपलब्धेस्तादात्म्यम्" इति **न्यायसूचीनिबन्धे न्यायसूत्रोद्धारे** च दृश्यते । **केशवमिश्रस्तु** नोल्लिखत्येतत् सूत्रतयेति विभावनीयम् ।

३. १. ६१. अत्र वृत्तौ **तात्पर्यटीका**प्रतिध्वनिः ।

३. १. ६५. अत्र **खद्योते** म० म० **वर्द्धमानोपाध्याय**मतमुद्धृतम् । तच्चाक्षरशोऽत्र वृत्तावुपलभ्यते । तद्यथा—"पूर्वं पूर्वं घ्राणादि गुणानां गन्धादीनामुत्कर्षात् उत्तरसनाद्यवृत्तित्वे सति पूर्ववृत्तित्वात् तत्तत् प्रधानम् तेन तेन गुणेन प्रधानमित्यर्थः । यतस्तस्माद् घ्राणादिना न सर्वगुणोपलब्धिः । तथा च येनैव गुणेनोक्तरूपं प्रधानं स एवोद्भूतस्तेन गृह्यते न सर्वं इति भावः" [**खद्योतः** पृ० १६३] ।

३. २. १. "सम्प्रति शरीरान्तर्वृत्तिकारणप्रमेयपरीक्षा विधायिष्यते । सैव चाह्निकार्थः । तत्र द्वितीयाह्निके सप्त प्रकरणानि भवन्ती" ति **परिशुद्धिपंक्तिर्वृत्तावुपलभ्यते** ।

"यद्युपलभ्यमानविषयः संशयः सोऽनुपपन्नः । सांख्यानामपि तदनित्यत्वस्याभ्युपगमात् । अथ साङ्ख्याभिमतमहत्तत्त्वविषयः तस्य सत्त्व एव विप्रतिपत्तिरिति कुतस्तद्गतधर्मविचारः । सति धर्मिणि धर्माश्चिन्त्यन्ते न सन्दिग्धसत्त्वे इति" **तात्पर्यटीका**सन्दर्भप्रतिध्वनिरिह वृत्तौ ।

३. २. ३. अत्र **वार्त्तिकं तात्पर्यटीकां** चानुसरति वृत्तिः ।

३. २. ४. अत्राक्षरशः वार्त्तिकमनुवदति वृत्तिः ।

३. २. ६. अविभु चैकं मनः पर्यायेणेन्द्रियैः संयुज्यते इति **भाष्यावतरणं** वृत्तावपि ।

३. २. १०. **न्यायसूचीनिबन्धे न्यायसूत्रोद्धारे** च नास्य सूत्रतया परिगणनम् । **केशवमिश्रो**ऽस्य सूत्रत्वं युक्त्या समुपपादयति । भाष्यपंक्तिरूपेण चास्य दृश्यते समुल्लेखः ३।२।६ सूत्रभाष्ये । **विश्वनाथवृत्तौ** सूत्रतया परिगणनमस्य दृश्यते । **न्यायनिबन्धप्रकाशे परिशुद्धिव्याख्यात्मके** ग्रन्थे **वर्द्धमनोपाध्यायः** सूत्रत्वमस्य समर्थयति ।

३. २. ११. "प्रयोजनं चास्ये"ति वाक्यं निःप्रत्यूहाः भवन्तीत्यन्तं **परिशुद्धितो**ऽत्र सङ्कलितम् ।

३. २. १४. अत्राक्षरशः **भाष्यं** संवदतिः वृत्तिः ।

३. २. १५. इह **भाष्यस्य** प्रतिध्वनिः ।

३. २. १६. इह **भाष्यविहिता**प्रत्याख्यानं परिगृह्णाति । तद्यथा—"गुणान्तरप्रादुर्भाव इत्यपर आह । गुणान्तरप्रादुर्भावश्च सतो द्रव्यस्य पूर्वगुणनिवृत्तौ गुणान्तरमुत्पद्यत इति" **भाष्यम्** ।

३. २. १८. **भाष्यप्रतिध्वनिरिह** वृत्तौ । **भाष्यस्य** प्रारम्भिकी कथा द्रष्टव्या ।

३. २. २०. एतस्य सूत्रत्वं **परिशुद्धिः** समर्थयति । ज्ञानस्य स्थाने ज्ञेयमिति पाठः **न्यायसूत्रोद्धारे** ।

३. २. २१. एतस्य सूत्रत्वं निश्चिनोति **परिशुद्धिकृत्** ।तदानीमत्र सन्देह आसीत् सूत्रमेतत् भाष्यपंक्तिर्वेति । "तस्यापि सर्वेन्द्रियैः सम्बन्धस्याप्रतिषेधाद् युगपदुपलब्धिप्रसंग" इति **वार्त्तिक**पंक्तिरेव वृत्तौ ।

३. २. २३. एतस्य सूत्रत्वे सन्देहमुत्थाप्य **वार्त्तिकानुसारं** सूत्रत्वं निश्चाययति **परिशुद्धिकृत्** । अस्य वृत्तिस्तु **वार्त्तिका**भिप्रायं निगदति । **विश्वनाथवृत्तौ** सूत्रमिदं पूर्वपक्षतया वर्णितम् । बुद्धयुत्पत्तौ कारणस्यानपदेशात् अकथनात् नात्मगुणो बुद्धिरिति ।

३. २. २४. "गुणानां द्वौ विनाशहेतू आश्रयाभावो विरोधिगुणप्रादुर्भावश्च । तत्र नित्यत्वादात्मनोऽनुपपन्नः । पूर्वः विरोधी च गुणो नास्तीति नित्यत्वप्रसङ्गः" इति **वार्त्तिक**संवाद इह वृत्तौ ।

३. २. २९. "निःसृते च शरीराद्बहिर्मनसि धारकस्य प्रयत्नस्याभावाद् गुरुत्वात् पतनं स्यात् शरीरस्य स्मरतः" इति **भाष्यपंक्ति**रिह वृत्तेरुपजीव्यः ।

३. २. ३०. **भाष्यकथा**संवादोऽत्र वृत्तौ ।

३. २. ३१. **भाष्यकथा**संवादोऽत्र वृत्तौ ।

शरीरसंयोगानपेक्षश्चात्ममनःसंयोगो न स्मृतिहेतुः । शरीरस्योपभोगायतनत्वात् । उपभोगायतनं पुरुषस्य ज्ञातुः शरीरम् । न ततो निश्चरितस्य मनस आत्मसंयोगमात्रं ज्ञानसुखादीनामुत्पत्तौ कल्पते । क्लृप्तौ वा शरीरवैयर्थ्यम् इति **भाष्य**पंक्तिस्तुलनीया ।

३. २. ३२. **भाष्यकथा**संवादोऽत्र वृत्तौ ।

३. २. ३४. प्रणिधानलिङ्गेत्यादिसूत्रानन्तरं **वार्त्तिके** "प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्ते यौगपद्यप्रसंगः" इति सूत्रमुपलभ्यते परं **न्यायसूचीनिबन्धे** नोपलभ्यते **न्यायसूत्रोद्धारे** तु समुद्धृतस्तत्र टिप्पण्यां भाष्यपंक्तितया स्वीकृतम् वृत्तिकृत्**केशवस्तु** नैतत् सूत्रत्वेन परिगृह्णाति ।

३. २. ३६. अत्र **तात्पर्यटीकापंक्तिः वृत्तौ** । "यदि यस्यारम्भनिवृत्ती तस्येच्छाद्वेषौ यस्य चैतौ तस्य चैतन्यम् । हन्तायातमनेन क्रमेण भूतचैतन्यमस्मदभिमतं भूतेष्वेव कायाकारपरिणतेषु आरम्भनिवृत्तिदर्शनात्" । "अत्रान्तरे लब्धावकाशो भूतचैतनिकः प्रत्यवतिष्ठते" इति **तात्पर्यटीका** ।

३. २. ३९. अत्र वृत्तौ **तात्पर्यटीका**संवादस्तत्पंक्तिश्च दृश्यते । (क) तद्यथा—"अत्र च हेतुशब्देनेच्छादिसूत्रं सुसंगृहीतं भावप्रत्ययेन हेतुत्वविषया परीक्षोपलक्षिता" । (ख) "यस्तु कश्चिदभ्युपेतवेदप्रामाण्यः पुरुषमचेतनं फलभागिनमभ्युपगम्य शरीरादीनां चैतन्यं रोचयते तं प्रति तेषामचैतन्ये हेतुमाह "स्वकृताभ्यागमाच्च" । (ग) "शरीरादीनां चैतन्ये चेतनस्य स्वातन्त्र्यात्त एव कर्मणः कर्तारः । न चैतेषां भस्मसाद्भूतानामामुष्मिकफलशालितासम्भव इत्यात्मनोऽचेतनस्य तद्भागिताभ्युपगन्तव्या"

३. २. ४०. इह वृत्तावपेक्षितसारसङ्ग्रहो **भाष्यात्** । "यद्वा" कल्पोऽपि **भाष्य**संवाद एव ।

३. २. ४२. अत्राक्षरशः **भाष्य**संवादः वृत्तौ ।

३. २. ४३. इह वृत्तौ **भाष्यवार्त्तिका**भिप्रायध्वनिः । यद्वेत्यादिवृत्तिस्तु **परिशुद्धि**सन्दर्भस्तुलनीया । तद्यथा "चात्मनो ज्ञस्वाभाव्या" दित्युक्तम् । तदेतत् सर्वं सति स्मरणे स्यात् । तच्च सति संस्कारे । स च ज्ञानस्याशुतरविनशित्वे न त्वन्यथेति तद्विचार्यते" ।

३. २. ४५. इतः परं **न्यायसूत्रोद्धारे** "ग्रहणे हेतुविकल्पाद् ग्रहणविकल्पो न बुद्धि विकल्पात्" इति सूत्रमुपलभ्यते । **न्यायसूचीनिबन्धे** अत्र च नैतदस्ति ।

३. २. ४५. इह वृत्तौ **भाष्य**संवादः । "उत्पन्नापवर्गिणी बुद्धिरिति प्रतिषेद्धव्यम् । तदेवाभ्यनुज्ञायते विद्युत्सम्पाते रूपाव्यक्तग्रहणवदिति" ।

"ग्रहणे हेतुविकल्पाद् ग्रहणविकल्पो न बुद्धिविकल्पात् । यदिदं क्वचिदव्यक्तं क्वचिद्व्यक्तं ग्रहणमयं विकल्पो ग्रहणहेतुविकल्पात् । यत्रानवस्थितो ग्रहणहेतुः तत्राव्यक्तं ग्रहणं यत्रावस्थितस्तत्र व्यक्तम् । न तु बुद्धेरवस्थानानवस्थानाभ्याम्" इति **भाष्य**सन्दर्भस्तुलनीयः ।

३. २. ४७. इह वृत्तौ भाष्याशयस्य प्रतिध्वनिः ।

३. २. ४८. इह वृत्तौ संशोधनमपेक्षितमिति प्रतीयते । ये हि शरीरगुणास्ते यावच्छरीरभाविनः, न तु यावद्द्रव्यभाविनः 'यथा रूपादय इति' वार्त्तिके एवमेवपंक्तिः दृश्यते । यस्या अत्र संवादः "ये हि शरीर गुणा भवन्ति ते यावच्छरीरं वर्तन्ते यथारूपादयः" इति तत्रत्या पंक्तिः ।

३. २. ५०. अत्रावतरणवृत्तौ तात्पर्यटीकापंक्तिः । "तदेवमात्यन्तिकानात्यन्तिकत्वं वैधर्म्यमुक्त्वा सप्रतिद्वन्द्वित्वासप्रतिद्वन्द्वित्वं वैधर्म्यान्तरमाहे" ति तात्पर्यटीका ।

३. २. ५१. अत्र वृत्तौ प्रथमं परिशुद्धिकृन्मतमुक्त्वा पश्चात् वार्त्तिककाराशयं यद्वेत्यादिना प्रकाशयति वृत्तिकारः । तद्यथा परिशुद्धिः "यदि चेतना शरीरस्य विशेषगुणः स्यात् शरीरव्यापिनी स्यात् मूर्तविशेषगुणानामाश्रयव्यापकत्वनियमात् ।.........तदयं प्रयोगः, चेतना न शरीरविशेषगुणः अव्याप्यवृत्तित्वात् शब्दवत् । एप चार्थः शरीरव्यापित्वादित्यस्य सूत्रस्य स्फुटत्वात् भाष्यकारादिभिरुपेक्षितः । उत्तरसूत्रावतारपरैस्तु एकस्मिन्नपि शरीरे चेतनबहुत्वप्रसङ्गपरतया सूत्रं व्याख्यातमिति मन्तव्यम्" ।

३. २. ५३. "शरीरावयवत्वं केशनखादीनां हेतुरसिद्धः इन्द्रियाश्रयत्वं हि शरीरलक्षणम् । त्वक्पर्यन्तश्चावयवसमूहस्तथा न तु केशनखादयस्तादृशा" इति तात्पर्यटीका । "तथा च साधनविकलो दृष्टान्तः असाधारणश्च हेतु"रिति परिशुद्धिश्च वृत्ताविहोपलभ्यते ।

३. २. ५४. भाष्यवार्त्तिकसंवादोऽत्र वृत्तौ ।

३. २. ५७. अत्र परिशुद्धिसंवादो वृत्तौ । तद्यथा "तदेवं पञ्चभिः प्रकरणैः बुद्धिः परीक्षिता ।.........तदनन्तरलक्षितत्वेन मनः परीक्षणीयम् । × × × अन्यथा त्वेकस्मिन् प्रत्याहृतेऽपि मनोऽन्तरविक्षेपादसञ्चारित्वे वैभवे वाशक्यत्वान्न प्रत्याहारादिसिद्धिः । तथा च निदिध्यासनासिद्धौ मननानुपयोगे न्यायविद्यावैयर्थ्यमापद्येत" ।

३. २. ५८. "अयं खल्वध्यापकोऽधीते, व्रजति, कमण्डलुं धारयति, पन्थानं पश्यति,......स्मरति च गन्तव्यं स्थानीयमिति......मनसो बहुत्वमिति" भाष्यपंक्तिरेवात्र वृत्तौ ।

३. २. ५९. भाष्यपंक्तिरिह वृत्तौ ।

३. २. ६० यथोक्तनिमित्तत्वाच्चाणु इत्यपि पाठ उपलभ्यते । काशीसंस्करणे वार्त्तिके टिप्पण्यामेवमुद्धृतम् ।

३. २. ६१. अत्र परिशुद्धिसन्दर्भ एव दृश्यते वृत्तौ । तद्यथा—"इदानीमदृष्टनिष्पाद्यत्वप्रकरणम् ।" "प्रयोजनं चास्य प्रकरणस्य विग्रहव्यवस्था संसारापवर्गव्यवस्था प्रायणव्यवस्था च" । "तथा च सर्वस्य सर्वाणि शरीराणि सर्वाणि इन्द्रियाणि सर्वाणि च मनांसि स्युः" अकस्माद्भूतस्वाभाव्याच्च शरीराद्यारम्भे आरम्भानुपरमेऽपवर्गाभावः स्यात् तन्निमित्तान्तरसंभवे च तदपगमे प्रायणमुपपद्येत । अन्यथा तु भूतानां नित्यत्वे तन्न स्यात् । "अदृष्टाख्य निमित्तसंभवे च वर्णाश्रमप्रवृत्तयस्तदर्थानि च शास्त्राणि सार्थकाणि स्युः" ।

३. २. ६२. भाष्यपंक्तिरेवात्र वृत्तौ ।

३. २. ६३. भाष्यपंक्तिरेवात्र वृत्तौ ।

३. २. ६४-६५, भाष्यकथासंवादोऽत्र वृत्तौ ।

३. २. ६६. दृष्टं कारणं शरीरोत्पत्तिं व्यभिचरत् तदतिरिक्तमदृष्टमपेक्षते इति परिशुद्धिकथासंवादोऽत्र वृत्तौ ।

३. २. ६८. अत्र **वृत्तिस्तात्पर्यटीका**पंक्तिमुद्धरति। तद्यथा—"न कर्मनिबन्धनः शरीरसर्गोऽपि तु प्रकृत्यादिनिबन्धनः। प्रकृतयो हि स्वयमेव धर्माधर्मरूपनिमित्तानपेक्षाः सत्त्वरजस्तमस्तया प्रवृत्तिशीलाः स्वं स्वं विकारमारभन्ते। तद्यथा कृषीवलः केदारादपां पूर्णात् केदारान्तरमपूर्णमापिप्लावयिषुरेषां सेतुमात्रं भिनत्ति। तास्तु निम्नाभिसर्पणस्वभावा अपहृतसेतवः स्वयमेव केदारमाप्लावयन्ति। एवमाप्लावयन्ति प्रकृतयोऽपि विकारानिति। तान् प्रत्याह—**एतेनेति**। एतेन कर्मसापेक्षाणां भूतानां शरीरसर्गे अनियमाभिधानेन तन्निरपेक्षाणां व्यतिरेकमुखेनानियमः प्रत्युक्तः। शरीरसर्गे तस्या एकत्वात् सर्वात्मसाधारण्याच्च न शरीराणामस्त्यसाधारण्ये हेतुः"।

३. २. ६९. **भाष्ये** व्याख्यान्तरतया परिगृहीतस्य विषयस्य वृत्ताविह समावेशः। "तददृष्टकारितमिति चेत् कस्यचिद् दर्शनम्" इति **भाष्यम्** आर्हतमतमुत्थापयति। तस्यैव विषयस्य पल्लवनं **तात्पर्यटीकायाम्**—"आर्हता अदृष्टं परमाणुगुणं वर्णयन्ति। पार्थिवानामणूनां मनसश्च स्वगुणप्रयुक्तं तच्छरीरमाविशति। तच्च स्वकादेवादृष्टात् पुद्गलस्य सुखदुःखोपभोगं साधयति। न तु पुद्गलस्य धर्मोऽदृष्टमिति"। इयमेव पंक्तिरिह वृत्तौ दृश्यते। **राधामोहनोऽपि केशवमिश्र** इव "पुनस्तत्प्रसङ्गोऽपवर्गे" इत्येतावन्मात्रं सूत्रत्वेनाङ्गीकरोति स्वकीयवृत्तौ। इतः पूर्वं सूत्रमेकं परं चैकं सूत्रमुपलभ्यते **न्यायसूत्रोद्धारे** "उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः" इति। "न करणाकरणयोरारम्भदर्शनात्" इति च। **न्यायसूचीनिबन्धे** तु नैते परिगृहीते विद्येते वृत्तिकृदप्येते नोद्धरति इति विभावनीयम्।

३. २. ७१. "यादृच्छिके तु प्रायणे प्रायणभेदो न स्यात्" इति **वार्त्तिकम्**। "कश्चित् गर्भगत एव प्रैति कश्चिज्जातमात्रः कश्चित् कुमारक इत्यादि" रिति **तात्पर्यटीका** चेह तुलनीया।

३. २. ७३. इह **वार्त्तिकतात्पर्यटीका**भिप्रायप्रतिध्वनिः। "न च परमार्थताभ्यासताप्यनादि"रिति प्रामादिकः पाठः। न च परमाणुश्यामताऽप्यनादिरित्येव **तात्पर्यटीका**पंक्तिरुद्धृता वृत्तौ। मूले तथा दर्शनेन यथावत् पाठः मुद्रितः। परमर्थसङ्गतिस्तु टीकापंक्त्यैव जायते।

"प्रमाणेनाविषयीकृतमकृतम्। प्रत्युत प्रत्यक्षागमविरुद्धमिति यावत्। तस्याभ्यागमोऽभ्युपगमस्तत्प्रसङ्गादित्यर्थः। न च परमाणुश्यामताप्यकारणा पार्थिवत्त्वाल्लोहितरूपवदित्यनुमानेन तस्यापि पाकजत्वाभ्युपगमात् इति भावः। यथाश्रुति वा सूत्रार्थः। अकृतस्य कर्मणः फलोपभोगप्रसङ्गादिति।............

तस्याकृतस्यैव फलं पुरुषैरुपभुज्यते। ततश्चायमास्तिकानां विहितनिषिद्धप्रवृत्तिनिवृत्तिनिचयोऽनर्थकः शास्त्रप्रणयनं चाप्यनर्थकं भवेदिति **तात्पर्यटीका** पंक्तिरेवाक्षरशः वृत्तावुपलभ्यते। अन्तिमा च पंक्तिरिह **भाष्यस्य**।

×× ×× ××

४. १. १. अत्र प्रथमा वृत्तिपंक्तिस्तुलनीया **परिशुद्धितः**। तद्यथा "तृतीयाध्याये कारणरूपप्रमेयषट्कं परीक्षितम्। इहेदानीं कार्यरूपप्रमेयषट्कं क्रमप्राप्तं परीक्षिष्यते।

४. १. ३. तत्र "कामक्रोधावित्येके" इत्यादि दोषा इति बहुवचनेन सूचित इत्यन्तं वृत्तिवाक्यं **परिशुद्धितस्तुलनीयम्**। तद्यथाऽत्र **परिशुद्धिः**—"तथाहि केचिदाहुः कामक्रोधौ पुरुषं दूषयतः। शोकमोहावित्यपरे। अविद्याऽस्मितारागद्वेषाभिनिवेशा इत्यन्ये। अविद्यैवेत्येके।

मानमदमात्सर्यादय इति चापरे। तस्माद् दोषा इत्यनेन रागद्वेषमोहा एव तत्रानागतावेक्षणेन विवक्षिताः।'' ''तेषां दोषाणामित्यादि'' वृत्तिवाक्यं तु भाष्यात् तुलनीयम्। यत्राक्षरशः साम्यमुपलभ्यते पदानाम्।

अत्र प्रकरणविभागः **वर्द्धमानोपाध्यायानुमतः** वृत्तिकृता स्वीकृतः। तदीय **न्यायनिबन्धप्रकाशे** एवमेव दृश्यते। केचिदाद्यसूत्रादेकं प्रकरणं द्वितीयसूत्रान्नवमसूत्रपर्यन्तं द्वितीयं प्रकरणमिति तदुपेक्षितम्।

४. १. ६. इह **भाष्यसंवादः** वृत्तौ। निदानोच्छेदं विना निदानिनो नोच्छेद इति तु **तात्पर्यटीकया** सह तुलनीयं वृत्तिवाक्यम्।

४. १. ७. अत्र ''प्राप्तस्तर्हि'' इत्यंशः **भाष्यस्य** सूत्रत्वेनात्रैव समुल्लेखो नान्यत्रेति विभावनीयम्।

४. १. १०. इह वृत्तौ **तात्पर्यटीकासंवाद** उपलभ्यते।

''प्रेत्येति ल्यब् मुखं व्यादाय स्वपितीतिवद् द्रष्टव्यः। तथा च भूत्वा प्रायणमिति भवनप्रायणयोः समानकर्तृत्वमप्युपपन्नमिति पूर्वपक्षः।'' इति **तात्पर्यटीका**पंक्तिस्तुलनीया वृत्तिवाक्यात्।

४. १. ११-१३ सूत्रेषु अपेक्षित**भाष्य**कथासारसंवादस्तुलनीयाऽत्र वृत्तिः भाष्यपंक्तेः।

४. १. १७. ''बीजविनाशश्चेदङ्कुरोत्पादहेतुरथ विनष्टे बीजे तदवयवेषु परस्परविच्छिन्नेषु असति तेषां व्यूहान्तरे कस्मादङ्कुरो न भवति। भवति तु तेषां व्यूहे। तस्माद् विनष्टेभ्योऽङ्कुरानुत्पत्तेरसति व्यूहे न बीजनाशः कारण'' मिति **तात्पर्यटीका**संवादः वृत्ताविह दृश्यते।

४. १. १९. ''कार्यमात्रं ब्रह्मोपादानकं न वेति संशय'' इत्यत्र वृत्तिपंक्तिस्**तात्पर्यटीका**प्रभावं परिबोधयति। वृत्तिपंक्तिरपि **तात्पर्यटीका**मक्षरशः संवदति। तद्यथा ''मा भूदयं नामरूपप्रपञ्चः शून्यतोपादानोऽपि तु ब्रह्मोपादानो भविष्यति। ब्रह्मैव हि प्रपञ्चरूपेण परिणमते। मृत्तिकेव घटशरावोदञ्चनादिभावेन।

चेतनाशक्तिः क्रियाशक्तिश्चेशना। सा चास्ति ब्रह्मणीति ब्रह्मेश्वरः कारणं जगतः। श्रूयते हि ''तदैक्षत बहु स्यां प्रजायेय'' इति मन्त्रः **छान्दोग्योपनिषदः** (६. ३. २.) इह परिगृहीतः।

× × ×

''ननु जीवा एव चेतनास्तत्कर्मनिमित्तो नामरूपप्रपञ्चो भविष्यति। कृतमत्र भगवतेश्वरेणेत्यत उक्तम् पुरुषकर्माफल्यदर्शनादिति'' **तात्पर्यटीका**।

इदमत्राभिधेयम् **वार्त्तिकतात्पर्यटीकयो**रत्र प्रसङ्गे स्फुटं परिलक्ष्यते मतभेदः । कर्मनिरपेक्षेश्वरकारणतावादः पाशुपतदर्शनप्रसिद्धः **वार्त्तिककारा**भिमतः पक्षः । अत एव सिद्धान्तोपक्रमोऽस्मिन् सूत्रे । आक्षेपोऽग्रिमे विंशतितमे सूत्रे । परिहारस्तस्य चैकविंशति तमे सूत्रे ।

तात्पर्यटीकाकारमते तु पूर्वपक्षसूत्रमेतत् । पूर्वपक्षश्च वेदान्तिनः । एतस्योत्तरम् विंशतितमे सूत्रे सिद्धान्तोपन्यासश्चैकविंशतितमे सूत्रे ईश्वरस्य निमित्तकारणत्वमिति । **केशवमिश्र**स्त्विह **वाचस्पतिमिश्र**मनुगच्छति । अतएव विंशतितमं सूत्रं सिद्धान्तसूत्रत्वेनाभिदधाति वृत्तिकृत् । **विद्यासागर**मतं चात्र समुद्धृतम् वृत्तिकृता । तच्च **वार्त्तिक**मनुगच्छतीति ध्येयम् । **परिशुद्धि**स्तु "यद्यपि कारणपदमिह सामान्यपरं किन्तूक्तश्रुतिबलादिहोपादानपरमिति नासङ्गति**र्वाचस्पते**र्वचसि सम्भावनीयेति कथयन् **वाचस्पति**मनुयाति ।

४. १. २२. अत्र वृत्तौ **परिशुद्धि**भावध्वनिः । चार्वाकस्य तत्रोल्लेखः दृश्यते । तद्यथा **परिशुद्धिः**—इदानीं व्यक्ताद् व्यक्तानिष्पत्ति निराकर्तुमाकस्मिकत्ववादं गुडजिह्विकया शरीरादौ निमित्तकारणनिराकरणमुखेन चार्वाक उपतिष्ठते । मतस्यास्य मूलं "कालः स्वभावो नियति र्यदृच्छेति" **श्वेताश्वतरोपनिष**दिति (१।२।) । **प्रमाणसमुच्चये** दिग्नागेनास्योल्लेखः कृतः—

नित्यसत्त्वा भवन्त्येके नित्यासत्त्वाश्च केचन ।
विचित्राः केचिदित्यत्र तत्स्वभावो नियामकः ।।
अग्निरुष्णो जलं शीतं समस्पर्शस्तथानिलः ।
केनेदं रचितं तस्मात् स्वभावात् तद्व्यवस्थितिः ।।इति ।

सुश्रुतसंहिताटीकायां डल्हणाचार्यः कथयति—

कः कण्टकाणां प्रकरोति तैक्ष्ण्यं
चित्रं विचित्रं मृगपक्षिणां च ।
माधुर्यमिक्षौ कटुता मरीचे
स्वभावतः सर्वमिदं प्रवृत्तम् ।।

४. १. २५. अत्र **वार्त्तिक**मनुसरति वृत्तिः । अत्र "विनापि उत्पत्तिधर्मकस्येतिवृत्तौ (पृ० ७७ प० १३) विनापीति पदं व्यर्थम् । मतमेतत् सुप्राचीनं चार्वाकस्येति **न्यायभाष्यव्याख्या**यां म० म० **फणिभूषणतर्कवागीश**चरणाः ।

४. २. २८. अत्र प्राञ्चस्तु इत्यनेन यदुक्तं वृत्तौ तत् **तात्पर्यटीका**यां दृश्यते । अतएव "सिद्धान्ती एकदेशिमतमुपन्यस्य दूषयती" ति **टीका** पंक्तिः ।

४. १. २६. यद्यपि "प्रकृतिपुरुषयोरन्यत् सर्वमनित्यम्" इति **सांख्यसूत्रं** (५।७२।) "हेतुमदनित्यमव्यापि" इत्यादि सांख्यकारिका (१०) च न समेषां पदार्थानां नित्यत्वं कथयति । तथापि सत्कार्यवादे आविर्भावादपि पूर्वं वस्तुसत्ता विद्यत इति तदाशयमादाय इह "सांख्यः पूर्वपक्षयति" इति सङ्गमनीया वृत्तिः ।४।१।३३ सूत्रावतरणटीकायां सांख्यमतत्वेनास्योल्लेखो दृश्यते । तत्प्रभावादेवेह "सांख्यः पूर्वपक्षयति" इति कथयति वृत्तिकृत् ।

४. १. ३३. स्वायम्भुवमतं पातञ्जलयोगदर्शनसिद्धान्तपरम् । एतन्मतोल्लेखस्तु तात्पर्यटीकायाम् तत एव इहोद्धृतः । सकलधर्मिणोऽवस्थात्रयमस्मिन् मते धर्मपरिणामः लक्षणपरिणामोऽवस्थापरिणामः । यथा कुण्डलादिः सुवर्णधर्मिणः धर्मपरिणामः । अतीतभविष्यद्वर्तमानभावश्च लक्षणपरिणामः । एकस्य लक्षणस्य तिरोधाने लक्षणान्तरस्याविर्भावः । नूतनपुरातनावस्थापरिणामश्च तृतीयः प्रकार इति विशेषस्तु पातञ्जलदर्शने विभूतिपादे १३तमसूत्रे तदीयव्यासभाष्ये च द्रष्टव्यः ।

४. १. ३४. अत्र सौत्रान्तिकवैभाषिकसम्प्रदाययोश्चर्चा तात्पर्यटीकायां परिशुद्धौ दृश्यते तस्या एवेह तदुल्लेखः । तद्यथा परिशुद्धिः—"सौत्रान्तिकाः वैभाषिकाश्चेति व्याप्तिसिद्धये । तेन तन्मतमाश्रित्य घटादिशब्दा एवोदाहृताः" । "न रूपाद्यतिरिक्तं द्रव्यं नाम किञ्चिदस्ति । नाप्यवयवातिरिक्तः कश्चिदवयवीति सौत्रान्तिकाः वैभाषिकाश्च प्रतिपेदिरे" इति तात्पर्यटीका ।

४. १. ३६. अत्र वृत्तौ व्याख्यानद्वयं भाष्यात् संगृहीतम् ।

४. १. ३७. सर्वंशून्यत्वपक्षोऽत्र यद्यपि माध्यमिकमतरूपेणोल्लिखितः । किन्तु "मुख्यो माध्यमिको विवर्तमखिलं शून्यस्य मेने जगत्" इत्यादि जनश्रुत्या पारिभाषिकं शून्यत्वं जगदुपादानतयाऽसौ स्वीकरोतीति परिलक्ष्यते न तु जगदसत् तुच्छं वेत्युच्यते तेन । अत एवात्र वृत्तौ माध्यमिकस्य पूर्वपक्षोऽयमिति सुधीभिश्चिन्तनीयम् ।

४. १. ३९. अत्र वृत्तौ तात्पर्यटीकासंवादः । तद्यथाऽत्र तात्पर्यटीका—"सर्व एव हि भावा भिन्नस्वभावाः । भिन्नत्वं च तेषामन्यापेक्षम् । तथा हि नीलं भिन्नं पीताद्यपेक्षया न तु स्वभावतः । यच्च परस्परापेक्षं तन्न स्वाभाविकम् । यथा जवाकुसुमापेक्षं स्फटिकस्य रक्तत्वम्"

४. १. ४१. अत्र तात्पर्यटीकासंवादो वृत्तौ । तद्यथा टीकापंक्तिः—"संख्या एकान्तो येषु वादेषु ते तथोक्ताः । अथ शून्यतावादानन्तरं ते परीक्ष्यन्ते इत्यर्थः । तत्र प्रथमं ब्रह्माद्वैतमुत्थापयति ।······प्रकृतिपुरुषाविति वा । पञ्च स्कन्धा इति वा । पशुपाशतदुच्छेदेश्वरा इति वा ।"

यद्यपि पाशुपतसम्प्रदाये कार्य, कारण, योग, विधि, दुःखान्तरूपाः पञ्च पदार्थाः पाशुपतसूत्रे (······) समुल्लिखिताः इह तु पशुपाशतदुच्छेदेश्वररूपा वाचस्पतिमिश्रमनुसृत्य समुद्धृताः । अतोऽस्य मूलमाकलनीयं धीधनैः ।

रूपादिस्कन्धपञ्चकेन च रूपसंज्ञासंस्कारवेदनाविज्ञानस्कन्धाः विवक्षिताः सौत्रान्तिक सम्प्रदाये प्रसिद्धाः ।

४. १. ४२. अत्र तात्पर्यटीकापंक्तिरविकलं वृत्तावुपलभ्यते ।

४. १. ४३. वृत्तिरत्र तात्पर्यटीकामनुगच्छति ।

४. १. ४४. अत्र परिशुद्धिमनुसरति वृत्तिः । तद्यथा—"तथापि क्रियैव यागादिका संशयविषयः । क्रियात्वं च संशयकारणम् । चेतनप्रवृत्तिर्हि काचित् सद्यःफला भवति । यथा पचनदोहनादिः । काचित्तु कालान्तरभाविफला कर्षणसेवनादि । अतः प्रकृते साधकबाधकप्रमाणा-

भावे सति सन्देहः। न च पक्त्याद्यनन्तरोपलम्भ एव सद्यःफलत्वसाधक इतरस्य बाधक इति साम्प्रतम्। स्वर्गफलत्वश्रुत्या तस्य प्रतिहतत्वात्। तर्हि सैव कालान्तरभाविफलत्वे क्रियायाः साधिका सद्यःफलत्वबाधिकाऽस्त्विति चेन्न स्वर्गस्य कर्तृविशेषणतयोपात्तस्याप्रधानतया आपाततः साध्यत्वानवधारणात्'' इति।

४. १. ४५. म० म० **फणिभूषणतर्कवागीशचरणप्रणीते न्यायदर्शने** भाष्यपंक्तिरूपेणै-तत्सूत्रोल्लेखः। यतो हि **न्यायसूचीनिबन्धे** नास्य सूत्रतया परिगणनम्। किन्तु **परिशुद्धिः** समर्थयति सूत्रत्वम्। **वार्तिकमप्यत्र** प्रमाणं **विश्वनाथवृत्तिरपि** अनुमनुते। अत एवास्यवृत्तौ सूत्रतया परिगणनं समुचितम्। यद्यपि म० म० गङ्गानाथ झा सम्पादित **न्यायसूचीनिबन्धे** सूत्रतया स्योपलब्धिरस्ति तथापि **खद्योते** समर्थितमसूत्रत्वम् इति विभावनीयम्।

४. १. ४८. अत्रावतरणवृत्तिः **परिशुद्धितः** संगृहीता। तद्यथा तत्र—''स्यादेतत् हेतु फलभावसिद्धौ सद्यः कालान्तरे वेति तद्विशेषचिन्ता स्यात्। हेतुफलभाव एव तु सर्वथा विचारं न सहते इति''।

४. १. ४९. अत्र ''प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा उत्पादव्ययदर्शनादिति'' समष्टिः **वृत्तिकृन्मते** सूत्रम्। प्रमादात् अधीतसूत्रपाठस्मृतेश्च ''उत्पादव्ययदर्शनात्'' इत्येता-वन्मात्रं सूत्रतया मुद्रणावसरे परिगृहीतम्। फलतः कोष्ठान्तर्गतस्य ''कस्मादिति'' पदस्य आवश्यकता नास्ति। यतो हि वृत्तिरिह तथैवोपलभ्यते। म० म० **फणिभूषणतर्कवागीशचरणास्तु परिशुद्धे**:''······सूत्रत्वे सिद्धे ''प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा उत्पादव्ययदर्शनात्। बुद्धि-सिद्धं तु तदसदित्यनयोरपि सिद्धं भवतीति'' ४।१।५३। **विश्वनाथवृत्तेः राधामोहनगोस्वामि-**प्रणीतवृत्तेश्चावलोकनेन समष्टिमेव सूत्रत्वेन प्रतियन्ति। किन्तु **न्यायसूचीनिबन्धे न्यायसूत्रोद्धारे** च प्रागुत्पत्तेरित्येतन्मात्रं सूत्रतयोल्लिखितम्।

४. १. ५१. इह **वार्त्तिकतात्पर्यटीकयोः** संवादस्तदीयपंक्तिसाम्यं चावलोकनीयम्। तद्यथा—''मूलसेकफलोत्पादयोरेकवृक्षाश्रयत्वम्। कर्मणस्तु होमादेराश्रयः शरीरम्। न चामुष्मिकस्य स्वर्गादेः शरीरमाश्रयः, तस्मिन्नष्टेऽस्य भावात्। तस्मादाश्रयव्यतिरेकात् स्वर्गादेः वृक्षफलोत्पत्तिवदित्ययं दृष्टान्तः स्वर्गफलत्वे होमस्याहेतुरित्यर्थः'' इति **तात्पर्यटीका**।

४. १. ५४. अत्र **भाष्यवार्तिकसंवादः** स्फुटं परिलक्ष्यते वृत्तौ।

४. १. ५५. ''एकविंशतेस्तत्वे'' इति वृत्तिपंक्तिः दुःखस्यैकविंशतिप्रकारान् **वार्तिके-**ऽभिहितान् स्मारयति। तद्यथा **वार्तिकम्**—''एकविंशतिप्रभेदभिन्नं पुनर्दुःखम्। शरीरं षडिन्द्रि-याणि, षड्विषयाः, षड्बुद्धयः सुखं दुःखं चेति। शरीरं दुःखायतनत्वात् दुःखम्। इन्द्रियाणि विषया बुद्धयश्च तत्साधनभावात्। सुखं दुःखानुषङ्गात्। दुःखं स्वरूपतः।'' [१।१।१। वार्त्तिकम्।]

इह वृत्तौ उपक्रमे **परिशुद्धिकथायाः** सूत्रार्थे च **भाष्यस्य** भावसाम्यमवलोकनीयम्।

४. १. ५९. अत्र **भाष्यसंवादः** वृत्तौ। तत्पंक्तिर्यथा—''ऋणानुबन्धान्नास्त्यपवर्गः जायमानो ह वै ब्राह्मणस्त्रिभिरृणैरृणवान् जायते ब्रह्मचर्येण ऋषिभ्यः, यज्ञेन देवेभ्यः प्रजया पितृभ्य इति ऋणानि'' मन्त्र एष **तैत्तिरीयसंहितायाः** (६. ३. १०.) परिगृहीतः।

श्लोकस्तु **तात्पर्यटीकात** उद्धृतोऽत्र । **मनुसंहितायां** मूलं तु—

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ।।६।३५।।

४. १. ६०. इह वृत्तौ **तात्पर्यटीकातः** सारसंकलनं कृतमिति तुलनया प्रतीयते । पञ्चयज्ञेन चात्र

अध्यापनं ब्रह्मयज्ञः पितृयज्ञश्च तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ।।३।७०।। **मनुस्मृत्यु**
क्तमवधेयम् ।

४. १. ६१. "मृत्युना ह वेति" "जरया ह वेति" मन्त्रः **शतपथमाध्यन्दिनतः** (१२. ४. १. १.) परिगृहीतः प्राजापत्यामिष्टिं **मनुसंहितातश्च** (६. ३८)

४. १. ६८. इह वृत्तौ **भाष्यसंवादः** । तत्पंक्तिर्यथा—"कर्मनिमित्तत्वादितरेतर निमित्तत्वाच्चेति समुच्चयः । × × × × × सर्वमिथ्यासंकल्पानां तत्त्वज्ञानादनुत्पत्तिः । कारणानुत्पत्तौ कार्यानुत्पत्तेरिति रागादीनामत्यन्तमनुत्पत्तिरिति" ।

४. २. १. " तदेवं संशयप्रमाणप्रमेयाणि परीक्षितानि । प्रयोजनादयोऽपि यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्ग इत्यतिदेशेन परीक्षिता इति षोडशापि प्रमाणादयः परीक्षिताः । × × × × तत्रापि प्रमेयतत्त्वज्ञानं साक्षान्निःश्रेयसहेतुरितरेषां तु तत्त्वज्ञानाङ्गतयेत्युक्तम्" इति **तात्पर्यटीकापंक्तिः**

"इदानीं तस्य धर्मस्तत्त्वज्ञानं परीक्षणीयं किं विषयं किं लक्षणा कथमुत्पद्यते कथं परिपाल्यते कथं विवर्द्धते चेति तत्त्वज्ञानपरीक्षैवाह्निकार्थः" इति **परिशुद्धिपंक्तिः वार्त्तिकपंक्तिः** [१।१।१।] "आत्मादीनां तत्त्वज्ञानमिति चाक्षरशः वृत्ताविहोपलभ्यते । **तात्पर्यटीकासंवादश्चेह** तुलनीयः ।

४. २. ३. इह वृत्तौ **तात्पर्यटीकासंवादः** । तत एव निमित्तसंज्ञा अनुव्यञ्जनसंज्ञयो यथार्थारोपप्रत्यायकयोरिह समुल्लेखः । द्रवत्कनकेत्यादि मज्जामरस्थ्नामित्यादि श्लोकयोश्च शुभाशुभसंज्ञाभ्यां सहात्र समुद्धृतिश्च ।

इह "तथा च प्रथमसूत्रेणात्मनः शरीरादिभेदाध्यवसायः तत्त्वज्ञानमित्यादि" पंक्तिः **वर्द्धमानोपाध्यायमतं** समुद्धरति । एतैर्महानुभावैः **न्यायनिबन्धप्रकाशे**—तत्त्वज्ञानस्यानुद्दिष्टस्य कथं परीक्षा प्रवर्तते कथं चाह्निकद्वयस्य समानविषयत्वं येनैतयोरेकाध्यायावयवत्वामित्याशङ्क्य तत्त्वज्ञानमुद्दिष्टमाद्ये सूत्रे, लक्षितं च द्वितीये सूत्रे। कार्यरूपप्रमेयपरीक्षैव चतुर्थाध्यायविषयः, तत्त्वज्ञानमपि कार्यरूपमेवेत्यादि" कथितमिति **खद्योते** तदुल्लेखो विद्यते ।

४. २. ४. वृत्ताविह **परिशुद्धिसंवादः** । अत एव विज्ञानवादिनेति यदुक्तं **तात्पर्यटीका** कृता **तत्रोदयनाचार्यः**—"विज्ञानवादिनेति प्रधानतयोपन्यासः । सौत्रान्तिकवैभाषिकयोरपि तथाभ्युपगमादित्युक्तवान् ।

"....प्रथममवयवी निराक्रियते, पश्चात् परमाणुस्ततश्च ज्ञानमात्रमर्थरहितं सिद्धं भवतीत्यभिप्रायः × × × × × × उपलब्धिर्विद्या अनुपलब्धिरविद्या सच्च नोपलभ्यते यथा तड़ागे तोयम्, असच्चोपलभ्यते यथा मरुमरीचिकायामुदकम्। सच नोपलभ्यते यथा चिरनिखातं भूमौ निध्यादि" इत्यादि **तात्पर्यटीका**पंक्तिरक्षरशः वृत्ताविहोपलभ्यते।

४. २. ६. अत्र सूत्रे "तर्हि" पदं सर्वत्र नोपलभ्यते। अनन्तरं सूत्रद्वयं **न्यायसूचीनिबन्धे न्यायसूत्रोद्धारे** च दृश्यते "कृत्स्नैकदेशवृत्तित्वादवयवानामवयव्यभावः" "तेषु चावृत्तेरवयव्यभावः" इति। म० म० **फणिभूषणतर्कवागीश**चरणेन म० म० **गङ्गानाथ झा** महाशयेन च परिगृहीते एते किन्तु **केशवः** नैतयोश्चर्चां करोति नवा वृत्तिमुभयोर्लिखति।

४. २. ७. अत्र **विश्वनाथवृत्तेः** यद्वाकल्पीयव्याख्यानसाम्यम्

४. २. ८. अत्र **तात्पर्यटीकायाः** भावध्वनिः

४. २. ११. अत्र वृत्तौ **भाष्य**संवादोऽवलोकनीयः।

४. २. १३. अत्र **तात्पर्यटीका**संवादः। तद्यथा "योऽयमवयवेषु अवयविवृत्तिविकल्पानुपपत्त्या अवयविनो भाव आपाद्यते स आ प्रलयाद्वा निवर्तत, आ परमाणोर्वा, न क्वचिदपि निवर्तत इति। तत्र प्रथमद्वितीयविकल्पावाश्रित्येदं सूत्रम्"।

"यथैव वृत्तिविकल्पः स्थूले घटादाववयवेषु तदवयवेष्विति तदभावात् प्रलये व्यवतिष्ठेत ......दर्शन विषयाभावादनाश्रयो विकल्प आत्मानमेव न लभते। उपलक्षणं चैतदा प्रलयादिति। आ परमाणोरित्यपि द्रष्टव्यम्। परमाणूनामतीन्द्रियत्वेन दर्शनविषयत्वाभावादनाश्रयता विकल्पस्य तदवस्थैवेति" **तात्पर्यटीका**ऽखिलाऽक्षरशः वृत्तौ समुपलभ्यते।

४. २. १६. "तस्याणोर्निरवयवस्य नित्यस्यानुपपत्तिः। कस्मात्, आकाशव्यतिभेदात्" इत्यादि **भाष्य**पंक्तिस्तत्कथा चेह वृत्तौ परिदृश्यते।

४. २. २४. विज्ञानवाद्याहेति **तात्पर्यटीका**शयमासाद्य वृत्तौ योगाचारपदोल्लेखः। अत्र **तात्पर्यटीका**संवादः।

४. २. ३४. "यस्तु माध्यामिको मिथ्याबुद्धिदृष्टान्तेन बाह्यापह्नवं कृत्वा तेनैव दृष्टान्तेन विज्ञानाभावं कृत्वा विचारासहत्वं तत्त्वं भावानां व्यवस्थापयांबभूव तं प्रत्याह" इति **तात्पर्यटीका**वतरणपंक्तिरक्षरशः वृत्ताविहोपलभ्यते।

४. २. ३५. इह वृत्तौ **भाष्य**संवादः स्फुटं परिलक्ष्यते।

४. २. ३६. इह वृत्तौ **परिशुद्धि**संवादस्तुलनीयः। तद्यथा **परिशुद्धिः**—"एवं प्रासङ्गिकं बाह्यार्थव्यवस्थाप्रकरणं समर्थितम्। पूर्वस्मिंश्च दोषनिमित्ततप्रकरणे तत्त्वज्ञानोत्पत्तये विषयविशेषः क्रमविशेषश्च दर्शितः। न चैतावता कृतार्थता युक्ता। तस्य साक्षात्कारि मोहोन्मूलनासमर्थनत्वात्। अतस्तथाविधतत्त्वज्ञानसमुत्पादपर्यन्तमेतद् विवर्धनीयम्। तदर्थमिदं पञ्चमं प्रकरणमारम्भणीयम्"। इह **विश्वनाथवृत्ते**र्मतभेद अवलोकनीयः।

४. २. ३६. इह **तात्पर्यटीकापंक्तिः** वृत्तौ । **तात्पर्यटीकायामिह** यथा "पूर्वकृतः समाधिस्तस्य फलं संस्कारः तस्यानुबन्धः स्थेमा तस्मादिति सूत्रार्थ" इति ।

४. २. ४४. अत्र **परिशुद्धिप्रभावः** । अत एव तदर्थमित्यस्य तत्त्वसाक्षात्कारार्थमिति व्याख्योपलभ्यते । यमो निविवर्जनमित्यस्य स्थाने यमो निषिद्धवर्जनमिति समुचितपाठः ।

"पातञ्जलादेरवगते यत्" इत्यस्य स्थाने पातञ्जलादेरवगतैरध्यात्मविध्युपायैरिति योजयित्वा अर्थसङ्गतिकरणे स्पष्टप्रतिपत्तिः ।

४. २. ४६. अत्र **तात्पर्यटीकाभावध्वनिः** । अत एव **विश्वनाथवृत्त्या** मतैक्याभावः ।

४. २. ४८. अत्र **परिशुद्धिसंवादोऽवलोकनीयः** ।

"यद्यपि चैवं प्रत्यनीकपरिवर्जनेनोपायाभ्यासात् तत्त्वज्ञानमुत्पद्यते विवर्द्धते च तथापि तदपलापितं सत् पुनरपि संशयादिभिरेवान्तरायैरभिभूयते । अतस्तत्परिपालनाय षष्ठं तत्त्वज्ञानरक्षाप्रकरणम्" इति **परिशुद्धिपंक्तिः** ।

×× ×× ××

५. १. १. (क) इह सूत्रान्तिमांशे **म. म. फणिभूषणतर्कवागीशचरणाः** "अनित्यनित्य कार्यसमाः" इति सूत्रापाठमकुर्वन् । यतो हि प्रथममनित्यसमलक्षणं विधाय पश्चान्नित्यसमलक्षणं **सूत्रकारो** निर्दिशति यथाक्रमं ३२ तम ३५ तम सूत्रयोः । परन्तु **न्यायसूचीनिबन्धे न्यायसूत्रोद्धारे न्यायमञ्जर्यां न्यायभाष्ये न्यायवार्त्तिकादौ** च यथात्र मुद्रितस्तथैवोपलभ्यते पाठः । वृत्तिकृतः **केशवमिश्रस्यालोचनं** यथामुद्रितपाठानुकूलं ५. १. ३४. तमसूत्रवृत्तौ द्रष्टव्यम् ।

(ख) जातिलक्षणं तु **वादिविनोदतः** (पृ० २२) परिगृहीतम् । द्वितीयं तत्राभिहितं लक्षणं **तार्किकरक्षातः** संगृहीतं **आचार्योदयनस्य** च सम्मतम् ।

प्रयुक्ते स्थापनाहेतौ दूषणाशक्तमुत्तरम् ।
जातिमाहुरथान्ये तु **स्वव्याघातकमुत्तरम्** ॥ इति **तार्किकरक्षा** ।

(ग) इह वृत्तौ **तात्पर्यटीकाभावध्वनिः** । तद्यथा **टीकापंक्तिः**—"यद्यपि जातिनिग्रहस्थानभेदा जातिनिग्रहस्थानसामान्यलक्षणानन्तरं प्रथमेऽध्याये युक्ता लक्षयितुं तथाप्येषां बहुत्वात् प्रमेयपरीक्षायां विलम्बो मा भूदपेक्षिता चासौ शिष्यैः । संशयादिपरीक्षां तु विना प्रमेयपरीक्षा न शक्यते । तस्मात् मुनिः शिष्यानुरोधेन परीक्षां तावद् वर्त्तयांबभूव । तदनन्तरमवशिष्टं जातिनिग्रहस्थानविशेषलक्षणं वर्तयति । समशब्दार्थनिर्वचने तु **उदयनाचार्यमनुगच्छति** वृत्तिः । इह **वृत्तौ परिशुद्धिसाम्यं** परिलक्ष्यते ।

५. १. २. अत्र **वार्त्तिकमनुगच्छति** वृत्तिः । पंक्तिरपि काचन तस्योपलभ्यते । "वैधर्म्येणोक्ते हेतौ तद्विपरीतवैधर्म्येण प्रत्यवस्थानं साधर्म्येणोक्ते हेतौ तद्विपरीतवैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमः । यथा तस्मिन्नेव हेतावाकाशवैधर्म्यादनित्य इत्युक्ते यदि नित्याकाश वैधर्म्यादनित्यः, अनित्येनापि घटेनास्य वैधर्म्यममूर्तत्वमतो नित्यः प्राप्तः । तस्मिन्नेव हेतौ

घटसाधर्म्यादित्युक्ते यद्यनित्यघटसाधर्म्यादनित्यः वैधर्म्यमप्यस्यास्त्यमूर्तत्वमतो नित्यः प्राप्तः ।'' इति **वार्त्तिकसन्दर्भ**स्तुलनीयोऽत्र वृत्तेरिति ।

वृत्तावत्र **वादिविनोद**प्रभावः परिलक्ष्यते । काचन पंक्तिरपि तत्रत्या समुपलभ्यते । तद्यथा—''अस्याः सद्दूषणास्फुरणं प्रौढिवादो वा अवसरः । विपक्षान्वयिधर्मवत्वप्रदर्शनमात्रं कारणम् । हेतुर्दूष्यः सत्प्रतिपक्षत्वमारोप्यम्, तद्भ्रान्तिः फलम् ।''

''असाधारणं तु युक्ताङ्गहीनत्वम्, युक्तस्याङ्गस्य व्याप्तेर्हानात् अयुक्ताङ्गाधिक्यं तु साधर्म्य-वैधर्म्ययोरयुक्तयोरेवाङ्गत्वोपगमात्'' इत्यादि **वादिविनोद**पंक्त्या वृत्तेस्त्रुटितांशपूर्तिरपि भवति ।

५. १. ७. ''साध्यव्या[प्रा]प्तिबलेन विशेषापादनात् साधकदोषाभिधानं प्राप्तिसमः । साध्याप्राप्तिबलेनातिप्रसङ्गात् साधकदोषाभिधानम् अप्राप्तिसमः । × × × × कार्येण नाप्राप्तं जनकमतिप्रसङ्गात्, तेन प्राप्तं वाच्यम् । सच्च प्राप्यते नासदिति कारणवत् कार्यस्यापि सत्त्वा-विशेषात् कार्यकारणभावः । × × × × अप्राप्तिसमा चैवं प्रवर्तते कारकं ज्ञापकं वा न प्राप्तं वाच्यमविशेषात् × × × × तथा सति चाप्राप्य जनकत्वं ज्ञापकत्वं वाच्यम् । तच्च न सम्भवत्य-तिप्रसङ्गात् । नहि अप्राप्तोऽग्निर्दहति प्रदीपो वा ज्ञापयतीति'' इत्यादि **वादिविनोदसन्दर्भ** इह वृत्तावक्षरश उपलभ्यते ।

५. १. ९. इह वृत्तौ **वरदराजकृततार्किकरक्षा**प्रभावः । तद्यथा

''सिद्धे दृष्टान्तहेत्वादौ साधनप्रश्नपूर्वकम् ।
अनवस्थाभासवाचः **प्रसङ्गसम**जातिता ।।

इयमपि कृतिज्ञप्तिसाधारणी जातिः । तथा च साधनमुत्पादकं ज्ञापकं वा । सिद्धिश्च स्वरूपतो ज्ञानतश्च । दृष्टान्तस्य कारणानपदेशादिति सूत्रखण्डे दृष्टान्तपदं स्वरूपतो ज्ञानतश्च सिद्धिमात्र-मुपलक्षयति । कारणं कारकं ज्ञापकं वेति तत्पंक्तिः । एतत्सूत्रोपसंहारवृत्तिस्तु **आचार्योदयनस्य बोधसिद्धितः** प्रभावितेत्यत्र **खद्योतटिप्पणावलोकनेन** प्रतीयते । (द्र० २१८ पृ० खद्योतः) ।

५. १. १२. इहाचार्योदयनानुसारिणः **वरदराजस्य तार्किकरक्षा**भिमतस्य मतस्य प्रतिध्वनिः । **वादिविनोदस्य** तु पंक्तिरपि वृत्तावक्षरशः काचन परिगृहीता (२६ पृ० द्रष्टव्यं तस्य)

५. १. १४. वृत्ताविह त्रुटिः (१०५ पृ० १ पंक्तौ) । अत्र तार्किकरक्षानुसारी पाठस्तु नित्यानित्येति विपक्षसपक्षपरं साधर्म्यपदं च संशयहेतुपरम् । तेनेत्यादि ततो योज्यम् । इहान्तिमांशवृत्तिस्तु **तात्पर्यटीका**पंक्त्या तुलनीया । संशयसमायाः लक्षणं **वादिविनोदतः** परिगृहीतम् । पंक्तिरपि तत्रत्या दृश्यत एवेह ।

५. १. १६. प्रकरणसमलक्षणे **तार्किकरक्षा**प्रभावः । **तार्किकरक्षा**तोऽर्थसङ्गतिरपि । ''साधर्म्यं तुल्यता नैकस्याप्यधिकबलत्वमि''त्यत्र वृत्तिः समुचिता न तु नैकस्याप्यधिकरणत्वमिति यथामुद्रितम् । एवं तेनानधिकबलत्वानभ्युपगतेन हेतोर्बाधाभिमानं प्रकरणसम इति पाठः समुचितो वृत्तेः । तुलनीया च **तार्किकरक्षा**—''अनभ्युपगतानधिकबलेन प्रतिप्रमाणेन परकीय-हेतोर्बाधाभिमाने प्रत्यवस्थानं प्रकरणसमा जातिरिति'' ।

५. १. १७. वृत्ताविहापि "स्थापनायामनधिकरणादपि" इत्यस्य स्थाने "अनधिकबलादपि" पाठः समुचितः प्रतिभाति । एवं प्रतिपक्षादनधिकबलादिति योज्यम् । सम्भवति लेखकप्रमादोऽत्र मदीयबुद्धिदोषो वेति ।

५. १. १८. अहेतुसमस्यान्तिमलक्षणं तु **वादिविनोदे** (पृ० २७) अन्येषां मतरूपेणोल्लिखितमस्ति । इह वृत्तौ **वादिविनोदा**भिप्रायस्तु स्फुटमुपलभ्यते ।

५. १. २१. वृत्ताविहार्थापत्तिसमलक्षणं **वादिविनोदतः** परिगृहीतम् । वादिविनोदाशयप्रतिध्वनिस्तु वर्तत एव । पंक्तिरपि वृत्तौ तदीया परिगृहीतेति द्रष्टव्या पादटिप्पणी । यत्र पाठभेदरूपेणोद्धृता **पंक्तिर्वादिविनोदस्य** (पृ० २७) सन्दृश्यते वृत्तौ

५. १. २५. अत्र **वादिविनोद**प्रभावो दृश्यते वृत्तौ । **वादिविनोदे** आधुनिकमतेनैतस्या आकृतिगणत्वमुल्लिखितमस्ति इह तु वृद्धमतेन । "विपक्षबाधकशून्यमहाविद्यानुमानानामप्यत्रैवान्तर्निवेश" इति **वादिविनोद**प्रभावादेवात्र "एके" इति वृत्तौ ।

५. १. २६. वृत्ताविह **तात्पर्यटीकापंक्तिस्तुलनीया** ।

५. १. २७. अत्र **तार्किकरक्षाभावसाम्यं** दृश्यते । **खद्योतस्त्वत्र** आचार्यस्याभिमतान् पञ्च प्रकारानेतस्या एवं प्रदर्शयति (१) "साध्याभावेऽपि धर्म्युपलभ्यत इति बाधः । (२) साधनाभावेऽपि धर्म्युपलभ्यत इत्यसिद्धिः । (३) उभयाभावेऽपि धर्म्युपलभ्यत इत्युभयम् । (४) साधनाभावेऽपि साध्यधर्म उपलभ्यत इत्यव्याप्तिः (५) साध्यधर्माभावेऽपि साधनधर्म उपलभ्यत इत्यतिव्याप्तिरित्यादि प्रपञ्चितं बोधसिद्धावुदयनाचार्यैरिति । **वादिविनोद**प्रभावः काचन पंक्तिस्तस्य समुद्धृता चोपलभ्यते वृत्तौ ।

५. १. २९. इह "तदनुपलब्धेरनुपलम्भादभावसिद्धा"विति शुद्धसूत्रपाठः । अभावा सिद्धाविति प्रमादः ।

वृत्ताविह **बोधसिद्धिप्रभावः** । "अनुपलब्धिरत्र विषयिणो धर्मस्योपलक्षणम् । तेनोपलब्ध्यनुपलब्धी इच्छानिच्छे कृत्यकृती शक्यशक्ती उत्पत्त्यनुत्पत्ती व्यवहृत्यव्यवहृती इत्यादयः संगृहीता भवन्तीति **बोधसिद्धिरिति खद्योतः, म. म. तर्कवागीशचरणाश्च** । वादिविनोदपंक्तिरपि (पृ० २८) काचन परिगृहीता वृत्तौ ।

५. १. ३२. इह वृत्तौ **उदयनाचार्यप्रभावः** । साधर्म्यपदस्योपलक्षणपरत्वमङ्गीकृत्य वैधर्म्यस्यापि संग्रहमकुर्वन् **आचार्या** इति **म. म. तर्कवागीशचरणाः, खद्योतकारः** म. म. **गङ्गानाथझा** महाशयश्च । लक्षणं च वृत्तावनित्यसमस्य **वादिविनोदतः** परिगृहीतम् । वादिविनोदस्य [पृ०, २९] पंक्तयोऽप्युपलभ्यन्ते वृत्तौ ।

१. १. ३३. इह म. म. **तर्कवागीशचरणः** कथयति **तात्पर्यटीकायां न्यायसूत्रोद्धारे**ऽन्यत्र च सूत्रान्तिमांशः "प्रतिषेध्यसामर्थ्याच्चे" ति पाठो दृश्यते । परमधिकसम्मतपाठस्तु निर्दिष्ट एवात्र वर्तते ।

५. १. ३५. वृत्ताविह **बोधसिद्धिप्रभाव** इति **म. म. तर्कवागीशचरणकृतटिप्पण्या** अवलोकनेन निश्चीयते । **वादिविनोदस्य** (पृ० २९) प्रभावः पंक्तिसाम्यं चावलोकनीयं वृत्तौ ।

५. १. ३७. अत्र **सानातनिमतमुद्धृतम्** । **सानातनिः** प्रौढगौडनैयायिकनाम्ना **उदयनाचार्येणोद्धृतो**ऽस्ति । अत एवायं वाचस्पतेः समसामयिकः, तस्मात् प्राचीनो वा प्रतिष्ठितनैयायिक आसीदिति प्रतीयते । **द्वितीयवाचस्पतिमिश्रेण** न्यायसूत्रवृत्तौ **तत्त्वालोके शङ्करमिश्रेण वादविनोदे** च समुद्धृतोऽयं **केशवमिश्रेणा**प्युल्लिखितः ।

५. १. ३८. **न्यायमञ्जर्या जयन्तभट्टा**स्तु "अनुपलब्धिकारणानुपपत्ते" रिति सूत्रान्तिमांशं पठन्ति । परमन्यत्र यथामुद्रितपाठ एवोपलभ्यते । **तात्पर्यटीका**पंक्त्याऽपि मुद्रितसूत्रपाठस्यैव पुष्टिर्भवति ।

× × ×

५. २. १. "तत्र कथकोद्देश्यकथाफलप्रयोजककथाहेतुयथार्थज्ञानाभावलिङ्गत्वं निग्रहस्थानत्व"मिति वृत्तिः **वादिविनोदे** (पृ० ३०) "केचित्तु" मतरूपेणोल्लिखितमस्ति ।

"तेन स्वयमुपन्यासे कथावाह्याना" मित्यादिवृत्तिः **वादिविनोदपंक्तिः** (पृ० ३०) ।

५. २. २. अस्य पञ्चप्रकारता **वादिविनोदे** समुल्लिखिता, तत्प्रभावादेवात्रापि समाविष्टा पंक्तिरपि **वादिविनोदस्य** (पृ० ३०) परिगृहीताऽत्र वृत्तौ ।

५. २. ३. वृत्ताविह **वादिविनोदस्य** (पृ० ३०-३१) प्रभावः पंक्तिसाम्यं चावलोकनीयम् । अतएव प्रतिज्ञान्तरलक्षणं तस्य चतुर्विधता चोभयत्राक्षरशस्तुल्यतया प्रतिपादिता विद्यते ।

५. २. ५. इह वृत्तौ **वादिविनोदोक्तस्य** (पृ० ३१) चतुर्विधत्वस्य कथाक्षरश उपलभ्यते किन्तु वृत्तिकृत् पञ्च विधत्वं प्रतिपादयतीति विशेषोऽत्र ।

५. २. ६. **वृत्ताविह वादिविनोदस्य** (पृ० ३१-३२) पदानि भावाश्च समुपलभ्यन्ते । **वादिविनोद**पंक्त्याऽपेक्षाकृतमधिकमर्थसङ्गतिर्भवति ।

५, २. ७. वृत्ताविह **वादिविनोदस्य** (पृ० ३२) भावसाम्यं पदसाम्यं चावलोकनीयम् ।

५. २. ८. वृत्तावत्र **वादिविनोदस्य** (पृ० ३२) लक्षणमुद्धृतम् । विषयसाम्यं चास्ति ।

५. २. ९. वृत्तावत्र पंक्तयो विषयाश्च **वादिविनोदतः** (पृ० ३२) परिगृहीताः ।

५. २. १०. वृत्तौ पंक्तयो विषयाश्च **वादिविनोदतः** (पृ० ३२, ३३) परिगृहीताः । वृत्ताविह सप्तदशतमायां पंक्तौ या त्रुटिस्तत्र "इत्याद्यनाकांक्षातः । अग्निरयं वृद्धस्तेनेति" एतद्ग्रन्थपाठं योजयित्वा पाठपूर्तिः सम्भवति ।

५. २. ११. वृत्तौ लक्षणं पंक्तयो विषयाश्च **वादिविनोदतः** (पृ० ३३) परिगृहीताः ।

५. २. १२. वृत्तौ **वादिविनोदस्य** भावसाम्यं द्रष्टव्यम् ।

५. २. १३. वृत्तौ लक्षणं विषयाः पंक्तयश्च **वादिविनोदतः** (पृ० ३३) परिगृहीताः ।

इति

परिशिष्टम् (३)

न्यायसूत्राणां वर्णानुक्रम सूची

परिशिष्टम् (४)

अत्र प्रकाशे समुद्धृता आचार्याः सम्प्रदायाः ग्रन्थाश्च

परिशिष्टम् (५)

विशिष्टशब्दसूची

श

●●